कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

M-2951

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विकम सवंत)	Additional Particulars / Remark
श्रीमद्भागवत	—	पुराण	पूर्ण	-	3/12	276	मोडी	कागद	10	64		

॥प्रथमस्कंदप्ररंभः॥

श्रीगणेशायनमः॥ वागीशायस्यवदनेलक्ष्मीर्यस्यचवक्षसि॥यस्यास्तेहृदयेसंवित्तंनृसिंहमहंभजे॥१॥ विश्वस
र्गविसर्गादिनवलक्षणलक्षितं॥श्रीकृष्णाख्यंपरंधामजगद्धामनमामितत्॥२॥माधवोमाधवावीशौसर्व
सिद्धिविधायिनौ॥वंदेपरस्परात्मानौपरस्परनतिप्रियौ॥३॥ संप्रदायानुरोधेनपौर्वापर्यानुसारतः॥श्रीभा
वार्थदीपिके [illegible] च्यते॥४॥ काहंमंदमतिःक्वेदंमंथनंक्षीरवारिधेः॥किंतत्रपरमाणुर्वैयत्रमज्जति
मूकंकरोति [illegible] वाचालंलंघयतेगिरिं॥यत्कृपातमहंवंदेपरमानंदमाधवं॥५॥ श्रीमद्भागवताभि
स्तारांग [illegible] र्द्वादशभिस्ततः॥प्रविलसद्भक्त्यालवालोदयः॥द्वात्रिंशत्त्रिशतंचयस्य
र [illegible] ष्टदशेष्टदोऽतिसुलभोवर्वर्तिसर्वोपरि॥६॥ अथना [illegible] म्नायप्रवंधैर्वि
मानस्वतंत्र [illegible] नकथानारदोपदेशतः॥श्रीमद्भगवद्गुणवर्णनप्रधानंश्र
स्तत्रतिप [illegible] तुस्मरणलक्षणंमंगलमाचरति।जन्मादीति

तस्मिन्देरस्थानेवा

क्वत्रैःसंगमश्चासबभूवावरीयसीश्रेष्ठोऽल्पस्यार्थस्योदयोयस्मात्तथाभूतोनभवति।साधुवादेनसम्मतिमोदनेनउपबृंहितःसंवर्द्धितः।यद्वासाधोर्मैत्रेयस्य वादेनोत्तरेणश्लाघितइत्यर्थः॥४॥५॥ त्यागानर्हस्यप्रियगृहस्यत्यागेहेतुत्वेनकौरवापराधानाह।यदेत्येकादशभिः।एतेषांचतदासक्तत्वाद्यादित्येकादे

श्रीराजोवाच॥ क्वत्रक्षत्तुर्भगवतामैत्रेयेणाससंगमः।कदावासहसंवादएतद्वर्णयनःप्रभो [illegible] नह्यल्पार्थोदयस्तस्यविदुरस्यामलात्मनः। तस्मिन्वरीयसिप्रश्नःसाधुवादोपबृंहितः॥४॥ श्रीसूतउवाच॥ सएवमृषिवर्योऽयंपृष्टोराज्ञापरीक्षिता।प्रत्याहतंसुबहुवित्प्रीतात्माश्रूयता मिति॥५॥ श्रीशुकउवाच॥ यदातुराजास्वसुतानसाधून्पुष्णन्नधर्मेणविनष्टदृष्टिः।भ्रातुर्यविष्ठस्यसुतान्विबंधून्प्रवेश्यलाक्षाभवने ददाह॥६॥ यदासभायांकुरुदेवदेव्याःकेशाभिमर्शंसुतकर्मगर्ह्यं।नवारयामासनृपःस्नुषायाःस्वास्रैर्हरंत्याःकुचकुंकुमानि॥७॥ द्यूतेत्वधर्मेणजितस्यसाधोःसत्यावलंबस्यवनंगतस्य।नयाचतोऽदात्समयेनदायंतमोजुषाणोयदजातशत्रोः॥८॥ ॥

शेषक्रियासंबंधः।यविष्ठस्यकनिष्ठस्यपांडोःविबंधून्पितृहीनान्॥६॥ कुरुदेवस्ययुधिष्ठिरस्यदेव्याःद्रौपद्याआत्मनःस्नुषायाःस्वीयैरस्रैरश्रुभिःचकुचकुंकुमा निरिष्टस्त्रीणांवातद्भर्तृत्वेनहरंत्याः॥७॥ सत्यावलंबस्यसत्याश्रयस्यवनात्प्रत्यागतस्यसमयेनपूर्वकृतेनदायंयाचमानस्ययत्तद्यदानस्वदानंददौ।तमोमोहं जुषमाणःभजन्सेवमानः।अविवेकाद्वा॥८॥ ॥

लाट.
२

यानिवचनानिपुंसांलीलादीनांअमृतायनानिअमृतप्रावर्वीणि।राजाधृतराष्ट्रःदुर्योधनोवाउरुबहुनमेनेक्षतोनष्टःपुण्यलेशोयस्यसःनष्टस्वकीर्त्तिधर्म्मादि
हेतुः।किंतुराज्यप्राप्तिमात्रहेतुःपुण्यलेशएवासीत्तस्यापिनष्टत्वादनादृतवानित्यर्थः॥७॥इदानींविदुरस्यैवकृतंपराभवंदर्शयतिषड्भिः।यदापूर्वजेनमं
त्रायचोपहूतोऽतवगृहंप्रविष्टोमंत्रंपृष्टःसन्नथअनंतरं।तदाह।किं।मंत्रिणोद्यापियद्वैदुरिकंविदुरवाक्यमितिप्रसिद्धंवदंति।१।तदेवाह।अजातश
त्रोरितितितिक्षितुः।तवआगः।अपराधंसहमानस्यदायंप्रतियच्छदेहि।यत्रापराधेअनुजैःसहवर्त्तमानोवृकोदररूपोहिःक्रोधेनश्वसन्वर्त्तते।यत्यस्मात्

यदाचपार्थप्रहितःसभायांजगद्गुरुर्यानिजगादकृष्णः।नतानिपुंसाममृतायनानिराजोरुमेनेक्षतपुण्यलेशः॥७॥यदोपहूतोभवनं
प्रविष्टोमंत्रायपृष्टःकिलपूर्वजेन।अथाहतन्मंत्रदृशांवरीयान्यन्मंत्रिणोवैदुरिकंवदंति।१।अजातशत्रोःप्रतियच्छदायंतितिक्ष
तोदुर्विषहंतवागः।सहानुजोयत्रवृकोदराहिःश्वसन्रुषायत्त्वमलंबिभेषि।२।पार्थांस्तुदेवोभगवान्मुकुंदोगृहीतवान्सक्षि
तिदेवदेवः।आस्तेस्वपुर्यांयदुदेवदेवोविनिर्जिताशेषनृदेवदेवः॥१२॥ ॥

मत्वर्थंविभेषि।२।ममतादृशाःपुत्राबह्वःसन्तीतिगर्वंमाकृथाइत्याह।पार्थांस्तुमुकुंदःआत्मीय[illegible]हीतवान्सचदेवःतत्रापिभगवानतएवप्राप्त
तः।किंच।सहक्षितिदेवैःविप्रैःदेवैःइंद्रादिभिर्वर्त्तमानः।यतोसौतत्रैवविप्रादेवाश्चेत्यर्थः।स्वपुर्यामेवसुखमास्तेनत्वन्यत्रगतः।किंभूतः।यदुदेवा
नांदेवःपूज्यः।यतोऽसौतानैवयदुप्रवीराइत्यर्थः।किंचनृदेवेषुमंडलेश्वरेषुदीव्यंतिप्रकाशंतइतिनृदेवदेवाराजानः।विनिर्जिताअशेषानृदेवदेवाये
नयतोसौतत्रैवसर्वेराजानःअतःपार्थानांदायंदेहीति॥२॥ ॥

२

नूजधः सर्वज्ञाः इस २

अ॰ २

दुर्योधनस्तन्मन्यतऽतिचेतन्न आह। स एष मूर्त्तो दोष एव गृहान् प्रविश्य आस्ते॥ दोषत्वे हेतुः पुरुषद्विट् श्रीकृष्णद्वेष्टा कोसौ। यं त्वमपत्यमत्या उल्लासि। न त्वपत्यमसौ न पतंत्यस्मादि-
ति त्वपत्यं प्राहुः। गता श्रीयस्मान्नूमलमित्याक्रोशति। एनं अशेषमंगलं आशु त्यज। कथं पुत्रस्याज्यत्वमत्राह। कुलस्य कौशलाय। त्यजेदेकं कुलस्यार्थे इति हि न्यायः।
२३ इत्थं विद्वान् एवमुक्तवान् असौ क्षत्ता। सतां स्पृहणीयं शीलं यस्य सः। कर्णदुःशासनशकुनिसहितेन दुर्योधनेन असत्कृतः॥ २४॥ तिरस्कारमाह। क इति दासीसु-

स एष दोषः पुरुषद्विडास्ते गृहान्प्रविष्टो यमपत्यमत्या। उल्लासितल्लाद्विमुषो गतश्रीस्त्यजाश्वऽशेषं कुलकौशलाय॥ २३॥ इत्थं विवांस्यन्नसु-
योधनेन प्रहृष्यत्कोपस्फुरिताधरेण। असत्कृतः सत्स्पृहणीयशीलः क्षत्ता सकर्णानुजसौबलेन॥ २४॥ क एनमत्रोपजुहाव जिह्मं दा-
स्याः सुतं यः खलिनैव पुष्टः। तस्मिन्प्रतीपः परकृत्य आस्ते निर्वास्यतामाशु पुरात्श्मशानः॥ २५॥ स इत्थमत्युल्बणकर्णवाणैर्भ्रातुः
पुरो मर्मसु ताडितोऽपि। स्वयं धनुर्द्वारि निधाय मायां गतव्यथोऽयादुरुमानयानः॥ २६॥ ॥

श्व

तोऽयं त्राह्वानानार्हः। जिह्मः कुटिलः। जिह्मतामाह। यस्य खलिना अन्नेन पुष्टस्तस्मिन्नेव प्रतीपः प्रतिकूलः। परेषां कार्ये वर्त्तते अतः पुरान्निर्वास्यतां श्वसानः
श्व सन् जीवमात्रशेष इत्यर्थः। पाठान्तरे श्मशानवदमंगलः॥ २५॥ अत्युल्बणैः कर्णयोर्वाणवत्प्रविशद्भिः परुषवाक्यैर्मर्मसु ताडितोऽपि गतव्यथः।
तत्र हेतुः मायोरुवर्द्धमानयत्न। अहो मायायामाहात्म्यमिति तामेव तत्र हेतुं मन्यमानः। तत्रिः साराणाम्पूर्वं स्वयमेव आयत्यनिर्जगाम। किं कृत्वा एतेनू-
नं मरिष्यति किं धनुषेति तत्सहायं धनुर्निधायायद्वा। भीमादिभिः संगत्य अस्माभिर्योत्स्यतीति माशंकीति धनुर्निधानम्॥ २६॥ ॥

सर्वं धनादिकं गृहं त्यानिकास्पतामिति भावः।

म२

नानिमानिनाभेददृश्याजग्गमस्य ये: २

भा.टी.
३

ततोनिर्गतश्चतीर्थाटनप्रकारमाह।सइत्यष्टभिः।सगजाह्वयान्निर्गतःसन्तीर्थपादोयस्यतस्यहरेःपदानिक्षेत्राणिपुण्यचिकीर्षयाअन्वाक्रमत्प्राप्नुवत।कौरवाणांपुण्येनलब्धः।इतितेषांभाग्यमेवतेनरूपेणगतमितिसूचितं।उर्व्यांसहस्रमूर्तिर्ब्रह्मरुद्राद्यनेकमूर्तिःसन्तीर्थपादयानिअधिष्ठायस्थितः॥१७॥पुण्यानियान्युपवनादीनितेषु।कुंजंलतादिगृहं।अपंकानितोयानियेषांतेषुसरित्सरःसु।तीर्थेषुआयतनेषुच।देवक्षेत्रेषु।कीदृशेषुअनंतस्यलिंगैर्मूर्तिभिःसम

सनिर्गतःकौरवपुण्यलब्धोगजाह्वयात्तीर्थपदःपदानि।अन्वाक्रमत्पुण्यचिकीर्षयोर्व्यामधिष्ठितोयानिसहस्रमूर्तिः॥१७॥पुरेषुपुण्योपवनाद्रिकुंजेष्वपंकतोयेषुसरित्सरस्सु।अनंतलिंगैःसमलंकृतेषुचचारतीर्थायतनेष्वनन्यः॥१८॥गांपर्यटन्मेध्यविविक्तवृत्तिःसदाप्लुतोधःशयनोऽवधूतः।अलक्षितःस्वैरवधूतवेषोव्रतानिचेरेहरितोषणानि॥१९॥इत्थंव्रजन्भारतमेववर्षंकालेनयावद्गतवान्प्रभासं।तावच्छशासक्षितिमेकचक्रामेकातपत्रामजितेनपार्थः॥२०॥

गलंकृतेषु।अनन्यःएकाकी॥१८॥किंचगांपर्यटन्व्रतानिचेरे।आचरत्।मेध्यापवित्रा।असंकीर्णावृत्तिर्जीविकायस्यसः।सदाप्लुतःप्रतितीर्थंस्नातः।अधःशयनंयस्य।अवधूतःअसंस्कृतदेहः।अवधूतवेषोवल्कलादिधारी।अतएवस्वैरलक्षितः॥१९॥एकस्यैवचक्रंसैन्यंयस्यां।एकमेवराजचिह्नंश्वेतातपत्रंयस्यांतां।अजितेनश्रीकृष्णेनसहायेन॥२०॥

३

तत्र प्रभासे परस्परं स्पर्द्धया निमित्तभूतया सुहृदां कौरवाणां विनष्टिं विनाशमशृणोत् । परस्परनाशे दृष्टांतः । वेणुजं वह्निं संश्रयते यद्वनं तद्यथा दग्धं भवति तथा प्रत्यक्उदङ्मालि
मुखं । २१ त्रितादीनामेकादश तीर्थानि तत्र नामग्रामप्रसिद्धान्यासेवितवान् । इह द्विजदेवैः ऋषिभिर्देवैश्च कृतानि । अंगमंगं प्रतिवर्त्तते इति प्रत्यंगानि आयुधानि तेषु मुख्यं चक्रं तेनां
कितानि मूर्द्धन्य हेमकुंभेषु चिह्नितानि मंदिराणि येषु तानि नानाविधानि विष्णोरायतनानि क्षेत्राणि तीर्थानि च आसिषेवे । २२ येषां चक्रांकितमंदिरवतां दर्शनात् । २३

तत्राथ सुश्राव सुहृद्विनष्टिं वनं यथा वेणुजवह्निसंश्रयम् । संस्पर्द्धया दग्धमथानुशोचन् सरस्वतीं प्रत्यगियाय तूष्णीं । २१ । तस्यां त्रितस्योशन
सो मनोश्च पृथोरथाग्नेरसितस्य वायोः । तीर्थं सुदासस्य गवां गुहस्य यच्छ्राद्धदेवस्य स आसिषेवे । २२ अन्यानि चेह द्विजदेवदेवैः कृतानि नानाय
तनानि विष्णोः । प्रत्यंगमुख्यांकितमंदिराणि यद्दर्शनात्कृष्णमनुस्मरंति । २३ ततस्त्वतिव्रज्य सुराष्ट्रमृद्धं सौवीरमत्स्यान्कुरुजांगलांश्च ।
कालेन तावद्यमुनामुपेत्य तत्रोद्धवं भागवतं ददर्श । २४ स वासुदेवानुचरं प्रशांतं बृहस्पतेः प्राक्तनयं प्रतीतम् । आलिंग्य गाढं प्रणयेन
भद्रं स्वानामपृच्छद्भगवत्प्रजानां । २५ कच्चित्पुराणौ पुरुषौ स्वनाभ्यपाद्मानुवृत्त्येह किलावतीर्णौ । आसात उर्व्याः कुशलं विधाय कृत
क्षणौ कुशलं शूरगेहे । २६ ॥ ॥

अतिव्रज्य अतिक्रम्य यावदुद्धवः प्राप्तस्तावत्स्वयमपि यमुनामुपेत्य । २४ स विदुरः प्राक्तनं पूर्वशिष्यं नीतिशास्त्रे पाठांतरे प्राक्तनयो नीतिशास्त्रं येन तं प्रतीतं प्रख्यातं स्वानां ज्ञाती
नां भद्रमपृच्छत् । प्रश्ने हेतुः भगवतः प्रजानां पोष्याणां । २५ प्रथमं तावद्रामकृष्णयोः कुशलं पृच्छति । कच्चिदिति प्रश्ने स्वनाभौ लब्धः स्वनाभ्यः पाद्मो ब्रह्मा । तस्या
नुवृत्त्या प्रार्थनया । इहावतीर्णौ कुशलमासाते वर्त्तेते । कृतक्षणौ दत्तावसरौ । सर्वेषां कृतोत्सवाविति वा । तयोर्नित्यकुशलत्वेपि उक्तविशेषणविशिष्टो शूरसेनस्य गृहे क
च्चिदासाते इति प्रश्नः । २६ ॥ ॥

रू

यं

यदूनां कुशलं पृच्छति नवभिः॥ भामः॥ वृष्ण्यः॥ शौरिर्वसुदेवः॥ यद्वा भामो भगिनीभर्त्ता कुंती वसुदेवस्य भगिनी अतो देवकी पांडोर्भगिनीति लोकव्यवहारः॥ वरानर्थी
भ्यो वदान्यः॥ अत्युदारः॥ वराणां तत्पतीनां तर्पणेन संतोषणेन सह २७ वरूथाधिपतिः॥ सेनानीः॥ आदिसर्गे पूर्वजन्मनि स्मरं कामं सुतं॥ लिलेखे लेभे॥ पुत्रं लब्धवती॥ २८
सात्वतादीनामधिपः॥ उग्रसेनः॥ शतपत्रनेत्रः॥ श्रीकृष्णः॥ नृपासनाशां राज्याभिलाषं परिहृत्य प्राणलये न दूरात्तु स्थितमित्यर्थः॥ २९॥ हे सौम्य हरेः सुतः॥ तेन स

कच्चित्कुरूणां परमः सुहृन्नो भामः स आस्ते सुखमंग शौरिः॥ यो वै स्वसॄणां पितृवद्ददाति वरान्वदान्यो वरतर्पणेन॥ २७॥ कच्चिद्वरूथा
धिपर्यदूनां प्रद्युम्न आस्ते सुखमंग वीरः॥ यं रुक्मिणी भगवतो लिलेखे आराध्य विप्रान्स्मरमादिसर्गे॥ २८॥ कच्चित्सुखं सात्वतवृष्णिभोजदा
शार्हकाणामधिपः स आस्ते यमभ्यषिंचच्छतपत्रनेत्रो नृपासनाशां परिहृत्य दूरात्॥ २९॥ कच्चिद्धरेः सौम्य सुतः सदृक्ष आस्तेऽग्रणी र
थिनां साधु सांबः॥ असूत यं जांबवती व्रताढ्या देवं गुहं योऽम्बिकया धृतोऽग्रे॥ ३०॥ क्षेमं स कच्चिद्युयुधान आस्ते यः फाल्गुनाल्लब्धध
नूरहस्यः॥ लेभेऽञ्जसाधोक्षजसेवयैव गतिं तदीयां यतिभिर्दुरापाम्॥ ३१॥ कच्चिद्बुधः स्वस्त्यनमीव आस्ते श्वफल्कपुत्रो भगवत्प्र
पन्नः॥ यः कृष्णपादांकितमार्गपांसुष्वचेष्टत प्रेमविभिन्नधैर्यः॥ ३२॥ ॥

ति

ह

दृक्षः सदृशः॥ साधु सुखमास्ते॥ गुहं स्वामिकार्त्तिकेयं॥ अग्रे पूर्वजन्मनि यो भवान्या गर्भे धृतः॥ तं॥ ३०॥ युयुधानः सात्यकिः॥ क्षेमं कुशलमास्ते॥ फाल्गुनादर्जुनात्ल
ब्धं धनुषो रहस्यं येन॥ तदीयां अधोक्षजसंबंधिनीं॥ ३१॥ श्वफल्कपुत्रोऽक्रूरः॥ बुधो विद्वान्॥ अतो भगवंतं प्रपन्नः॥ अनुरक्तः॥ अत एवानमीवो निष्पापः॥ भक्तो लिं
गं यो चेष्टत अलुठत् प्रेम्णा विभिन्नं विदीर्णं धैर्यं यस्य सः॥ स्वस्ति क्षेमम् अस्ति॥ ३२॥

देवकनामा योलोजन्तस्य पुत्र्या देवक्या विश्रुतः प्रजापुत्रेयस्याः तस्या देवमातुरदितेरिव कांक्षितशिवम्। यज्ञवितानरूपमर्थं त्रयीयथा प्रकाशकतयाविलक्षितिथ्यादधार २३ सा
त्वतानापुपासकानां कामान्दोग्धि पूरयतीति कामदुघः भगवत्वे हेतुः यं शब्दस्य शास्त्रस्य योनिं कारणं आमनंति वेदाः उतः मनोमयं मनसः प्रवर्त्तकं ततत्कुतः सत्व
घ्यात्तःकरणस्य चतुर्विधस्य तुरीयं तत्वं चतुर्थमधिदैवं चित्ताहंकारबुद्धिमनसांत्यंतःकरणेतेदानां क्रमेणवासुदेवसंकर्षणप्रद्युम्नानिरुद्धाह्यधिष्ठातारः मनसश्चशब्दयोनि

कश्चिच्छिवं देवकलोऽजपुत्र्या विश्रुतप्रजायाइवदेवमातुः। यावैश्वगर्भेण दधार देवं त्रयीयथा यज्ञवितानमर्थं ॥२३॥
अपिश्चिदाख्ये भगवान्सुखं वो यः सात्वतां कामदुघोऽनिरुद्धः। यमामनन्ति स्म हशब्दयोनिं मनोमयं सत्वतुरी
यतत्वं ॥२४॥ अपिश्चिदन्येचनिजात्मदैवमनन्यवृत्त्या समनुव्रतायो। हृदीकसत्यात्मजचारुदेष्णग
दादयः स्वस्ति चरंति सोमम ॥२५॥ ॥ श्रीरामयनमः ॥ ॥

त्वं प्रसिद्धं मनः पूर्वरूपं वा सुतरद्रूपमितितथाऽन्योऽंतरआत्मा मनोमय इति प्रक्रत्य तस्य यजुरेव शिरः ऋग्दक्षिणः पक्षः सामोत्तरः पक्ष इत्यादि श्रुतेः तथा च शि
क्षायां। आत्माबुध्या समेत्यर्थान्मनो युंक्ते विवक्षया मनः कायाग्निमाहंति सप्रेरयति मारुतं। मारुतस्तूरसि चरन्मंद्रं जनयति स्वरमित्यादि २४ अपिश्चिद
किंचित् अन्ये च स्वस्ति चरंति निजस्य देहादिव्यतिरिक्तस्यात्मनो दैवं श्रीकृष्णं अनन्यवृत्त्या एकांतभक्तिभावेन ये समनुगतव्रताः अनुसृताः हृदीकश्च सत्यभामायात्र
त्मजाश्च। चारुदेष्णश्च गदश्च आदिर्येषां तेपि ॥२५॥ ॥

२८ दुर्योधनः साम्राज्यं दृष्ट्वा ऽतप्यत। न केवलं साम्राज्यलक्ष्म्या ऽतप्यत। किं तु विजयो कृष्णार्जुनौ तयोरनुरक्त्या सेवनेन =

स्व

सा॰ट॰ ५

इदानीं अनूनुपृच्छति षड्भिः॥ अपि किं स्विद्दोर्लब्धा बहुवत् वर्त्तमाना त्वां विजयासुता त्वां अर्जुनहस्तात् त्वां धर्ममार्गेण धर्मो युधिष्ठिरः सेतुं धर्ममर्यादां परिपाति। यस्य सत्तायां विजयानुवृत्त्याज्यपरंपरया अर्जुनस्य सेवयेति वा। एवंभूतं यस्यैश्वर्यमित्यर्थः॥ २६॥ कृताघेषु कृतापकारेषु एकतिकमेवं दीर्घतमं बहुकालानुचिं- रोषं
तितं अहिवदत्यमर्षी भीमः॥ किं व्यमुचन्नो वा। गदया विविधमार्गचरः॥ ॥ २७॥ रथयूथपानां मध्ये यशोधाः कीर्तिधारी। यद्वा स्वीयानां तेषां कीर्तिप्रदः॥ उपरतात्रे

अपि स्वदोर्भ्यां विजयाच्युताभ्यां धर्मेण धर्मः परिपाति सेतुम्॥ दुर्योधनोऽतप्यत यत्सभायां साम्राज्यलक्ष्म्या
विजयानुवृत्त्या॥ २६॥ किं वा कृताघेष्वघमत्यमर्षी भीमोऽहिवद्दीर्घतमं व्यमुंचन्। यस्यांघ्रिपातं रणभूर्न से-
हे मार्गं गदायाश्चरतो विचित्रं॥ २७॥ कच्चिद्यशोधा रथयूथपानां गांडीवधन्वोपरतारिरास्ते॥ अलक्षितो यच्छरकू-
टगूढो मायाकिरातो गिरिशस्तुतोष॥ २८॥ यमावुतस्वित्तनयौ पृथायाः पार्थैर्वृतौ पक्ष्मभिरक्षिणीव रेमात[illegible] उ
द्दाय मृधे स्वरिक्थं परात्सुपर्णाविव वज्रिवक्त्रात्॥ २९॥ ॥ व

रयो यस्मात्। यस्य शरकूटेन बाणसमूहेन गूढः॥ आच्छन्नः॥ २८॥ उतस्वित् किंस्वित् नृपमौ नकुलसहदेवौ रेमाते क्रीडेते इत्यर्थः॥ माद्र्यां सुतावपि पृथायास्तनयौ ५
पृथायाः॥ वृतौ॥ सुपर्णाविव रेमाते किं कृत्वा परात् दुर्योधनात् स्वरिक्थं स्वीयं राज्यं उद्दाय आच्छिद्य वज्रिवक्त्रात्। इंद्रस्य मुखात् स्वरिक्थम् अमृतं गरुड इवेति।
यद्वा सुपर्णाविवेति। यदि द्वौ गरुडौ वमृतमानयेतां तर्हि तद्दृष्टांतः॥ २९॥ ॥

बाल्यमरर १-पत्र[illegible]ाल
नातं

१ आक्षणी वेतिमणी नादिवा[illegible]
[illegible]न सैधिः मा

पृथायाः किं त्वं कुशलं पृच्छेयं यतस्तस्याः पांडुना विना प्राणधारणमेवाश्चर्यमित्याह। अहो इति। ध्रियते जीवति। न चात्याश्चर्यं यतोऽर्भकार्थे ध्रियते न लोभार्थे तथापि त्वाश्चर्यमेवेत्याह। तेन तथाभूतेन विना। तदेवाह। यस्त्विति। धनुरेव द्वितीयं सहायो यस्य॥ ४०॥ पृथा अर्भकार्थे जीवतीति युक्तमेवोऽत्राह। हा हे सौम्य तं धृतराष्ट्रं जीवंतं अनुशोचामि। तत्किमधःपतंतं। तत्र हेतुः। परेताय मृताय भ्रात्रे पांडवे तत्पुत्रद्रोहेण यो विदुद्रुहे द्रोहं कृतवान्। किं च जीवतोपि त्वत्तोऽधर्मात्पद्वात

किंबत १

कु

अहो पृथापि ध्रियतेऽर्भकार्थे राजर्षिवर्येण विनापि तेन। यस्त्वेकवीरोऽधिरथो विजिग्ये धनुर्द्वितीयः
ककुभश्चतस्रः॥ ४०॥ सौम्यानुशोचे तमधःपतंतं भ्रात्रे परेताय विदुद्रुहे यः। निर्यापितो येन सुहृत्स्वपु-
र्या अहं स्वपुत्रान्समनुव्रतेन॥ ४१॥ सोहं हरेर्मर्त्यविडंबनेन दृशो नृणां चालयतो विधातुः॥ ना-
न्योपलक्ष्यः पदवीं प्रसादाच्चरामि पश्यन्गतविस्मयोऽत्र॥ ४२॥ ॥

वानित्याह। येन सुहृत्त्वात्ता अहं स्वपुर्याः सकाशान्निर्यापितः विवासितः॥ ४१॥ अहो खलु विस्मयो जानतोपि तस्यैवं दुःचेष्टितं यतः त्वं साधुरपि दुःखं प्रापितोसीत्यत आह। सोहं हरेः प्रसादात्तस्य पदवीं माहात्म्यं पश्यन् गतविस्मयः। अत्र भूतले नान्योपलक्ष्यः गूढः सन्स्वैरं विचरामि। कथंभूतस्य मर्त्यविडंबनेन नरस्वर्पीक्रादकेन मानुष्यानुकरणेन नृणां दृशश्चित्तवृत्तीश्चालयतः भ्रामयतः॥ ४२॥ ॥

धा ध नंन

ननु हरेः किमेवं लीलया येन स्वभक्तानां वनवासादिक्लेशा लवं तिष्ठस्य च दौत्ये बंधनोद्यमादिपराभवः । तद्दूरं तेषामपराधानंतरमेव हननम् । नापराधोपन्हेत्यत आह नूनं निश्चितं त्रिभिर्मदैरुत्पथानामुद्वृत्तानां वधाद्धेतोः प्रपन्नानामार्तिजिहीर्षया ईशः । असमय एव हंतुं समर्थोपि कुरूणामघमुपैक्षत । तदानीमेव तेषां वधे सर्वदुष्टराजवधो न स्यादित्याशयेनेत्यर्थः । विद्यामदो धनमदस्तथैवाभिजनो मदः । एते मदा मदांधानां त एव हि सतां दमाः । इति त्रयो मदाः ॥४३॥ सर्वदुष्टवधाद्यर्थमेव भगवतो जन्मकर्माणि

नूनं नृपाणां त्रिमदोत्पथानां महीं मुहुश्चालयतां चमूभिः । वधात्प्रपन्नार्तिजिहीर्षयेशोप्युपैक्षताघं भगवान्कुरूणाम् ॥४३॥ अजस्य जन्मोत्पथनाशनाय कर्माण्यकर्तुर्ग्रहणाय पुंसां । नन्वन्यथा कोर्हति देहयोगं परो गुणानामुत कर्मतंत्रम् ॥४४॥ तस्य प्रपन्नाखिललोकपानामवस्थितानामनुशासने स्वे । अर्थाय जातस्य यदुष्वजस्य वार्त्तां सखे कीर्त्तय तीर्थकीर्त्तेः ॥४५॥ ॥

इति तृतीये प्रथमोध्यायः ॥ ॥

प्र

नान्यथेति किमुत तत्प्रायेणाह । अजस्यापि जन्म अकर्तुरपि कर्माणि पुंसां ग्रहणाय कर्मोद्धृत्तये । अन्यथा न चेदेवं तर्हि भगवतो जन्मादिकथा तावदास्तां को वान्योपि गुणानां परो गुणातीतो देहयोगं कर्मविस्तारं चार्हतीति ॥४४॥ तस्मादेवंभूताचिंत्यमायाविनोदस्य कथां कथयेत्याह । तस्य प्रपंना ये अखिललोकपालास्तेषां अन्येषां च स्वीयेऽनुशासने स्थितानां अर्थाय प्रयोजनाय यदुषु जातस्य तीर्थं संसारतारणी कीर्तिर्यस्येति ॥४५॥ ॥ तृतीये प्रथमोध्यायः ॥ ॥

रख २

द्वितीये कृष्णविश्लेषशोकवह्न्योद्धवः। क्षत्त्रे बालचरित्राणि कृष्णस्यावर्णयत्श्वसन्। तदेवं प्रियवार्त्तां पृष्टस्योद्धवस्य श्रीकृष्णविरहोत्कंठ्यावेशेन प्रतिवचनासामर्थ्यमाह
षड्भिः। इतीति। स्मारितईश्वरो यस्य सः॥१॥ एतदेव कैमुत्यन्यायेन प्रपंचयति। हायनः। पंचवर्षोऽपि बाललीलयेति कृष्णं कंचित्परिकल्प्य कल्पितैरेव साधनैः परिचर्यां कुर्वन्मा-
ता प्रातर्भोजनार्थं प्रार्थितोऽपि तद्भोजनं नैच्छत्॥२॥ जरसं वृद्धत्वं गतः प्राप्तः॥३॥ श्रीकृष्णांघ्रिसुधया साधुनिर्वृतः। तस्यामेव तीव्रेण विवशत्वापादकेन भक्तियोगेन भृशं निम-

श्रीशुक उवाच॥ ॥इति भागवतः पृष्टः क्षत्त्रा वार्त्तां प्रियाश्रयां। प्रतिवक्तुं न चोत्सेह औत्कंठ्यात्स्मारितेश्वरः॥१॥ यः पंचहाय-
नो मात्रा प्रातराशाय याचितः। तन्नैच्छद्रचयन् यस्य सपर्यां बाललीलया॥२॥ स कथं सेवया तस्य कालेन जरसं गतः। पृष्टो वा-
र्त्तां प्रतिब्रूयाद्भर्तुः पादावनुस्मरन्॥३॥ स मुहूर्तमभूत्तूष्णीं कृष्णांघ्रिसुधया भृशं। तीव्रेण भक्तियोगेन निमग्नः साधुनि-
र्वृतः॥४॥ पुलकोद्भिन्नसर्वांगो मुंचन्मीलद्दृशा शुचः। पूर्णार्थो लक्षितस्तेन स्नेहप्रसरसंप्लुतः॥५॥ शनकैर्भगवल्लोकान्नृलो-
कं पुनरागतः। विमृज्य नेत्रे विदुरं प्रीत्याहोद्धव उत्स्मयन्॥६॥ ॥

ग्नः॥४॥ पुलकैरुद्भिन्नानि उच्छ्वसितानि सर्वाण्यंगानि यस्य मीलंत्या दृशा शुचः अश्रूणि मुंचन् तेन विदुरेण पूर्णार्थः कृतार्थो लक्षितः। यतो भागवति यः स्नेहस्तस्य प्रसरः पूरः तस्मि-
न् संप्लुतो निमग्नः॥५॥ भगवानेव लोकः तस्मान्नृलोकं देहानुसंधानं। उत्स्मयत्। यदुकुलसंहारादि भगवच्चातुर्यस्मरणेन विस्मयं प्राप्नुवन्॥६॥ राम॥ ॥

ला·ह·
७

श्रीकृष्णविरहेण संतप्यमानः प्रत्याह। श्रीकृष्ण एव द्युमणिः सूर्यस्तस्य निम्लोचे अस्तमये सति अजगरेण कालमहासर्पेण गीर्णेषु गिलितेषु नोऽस्मद्गृहेषु कुशलं त्वत्पृष्टानां बं
धूनां किं नु ब्रूयां ।७। अनुशोचन्नाह। दुर्भगो भाग्यहीनः। ये संवसंतः श्रीहरिरयमिति न विदुः। यथा क्षीरसमुद्रे जातमुडुपं तदा तत्रत्या मीनाः। केवलं क
मनीयं कम्बीलं र इत्येवं विदुर्न त्विष्टतमयं इति तद्वत्। यद्वा जले प्रतिबिंबितं उडुपं यथेति। भाग्यहीनत्वादेव न विदुः न तु ज्ञानसामग्र्यभावादित्याह। इंगितं

अयतमयं चंद्र

अ१

उद्धव उवाच ॥ कृष्णद्युमणिनिम्लोचे गीर्णेष्वजगरेण ह। किं नु नः कुशलं ब्रूयां गतश्रीषु गृहेष्वहम् ॥७॥ दुर्भगो बत लोकोयं य
दवो नितरामपि। ये संवसंतो न विदुर्हरिं मीना इवोडुपम् ॥८॥ इंगितज्ञाः पुरुप्रौढा एकारामाश्च सात्वताः। सात्वतामृ
षभं सर्वे भूतावासममंसत। देवस्य मायया स्पृष्टा ये चान्यदसदाश्रिताः। भ्राम्यते धीर्न तद्वाक्यैरात्मन्युप्तात्मनो ह
रौ ॥१०॥ प्रदर्श्यातप्ततपसामवितृप्तदृशां नृणां। आदायांतरधाद्यस्तु स्वबिंबं लोकलोचनं ॥११॥

चित्तस्थं जानंतीति तथा। पुरु अतिशयेन प्रौढाः पंडिताः। एकस्मिन्नेव स्थाने आरमंतीति तथा। एवंभूता अपि भूतानामावासमीश्वरं संतं सात्वतामृषभं सात्वतश्रेष्ठं अमं
सत ।९। ये यादवा देवमायया व्याप्ताः यादवोऽयमस्मद्बंधुरिति वदंति। ये च शिशुपालादयोऽसदेवान्यद्वैरमाश्रिताभिर्द्वेति। तेषां वाक्यैरात्मनि हरौ उप्ता आत्मानो
त्रिषात्मनो निश्चितात्मनो निश्चितचित्तस्य मादृशस्य तु बुद्धिर्न भ्राम्यते मोहं न प्राप्यते। अन्ये तु मूढा एवेत्यर्थः ।१०। कोसौ हरिरित्यपेक्षायामाह। प्रदर्श्येति। न तप्तं
तपो यैः अन्येऽवितृप्ता दृशो येषां तेषां स्वबिंबं मूर्तिं एतावंतं कालं दर्शयित्वा योऽन्तर्हितवान्। लोकस्य लोचनमादाय आच्छिद्य तादृशस्यान्यस्याविलोकनीयस्याभावात् ॥११॥

७

रि२

यदुकुलतिलके श्रीकृष्णे

तदेवविवृणोतित्रिभिः। यन्मर्त्यलीलाउऔपयिकं योग्यं स्वस्यापि विस्मयजनकं। यतः सौभगर्द्धेः सौभाग्यातिशयस्य परं पदं। पराकाष्ठा भूषणानां भूषणान्यंगानि यस्मिन् १२ दृशांस्व
स्त्ययनं परमांदकरं। त्रिभुवनस्थो लोकः प्राणिमात्रं अद्य इदानीं इहा विश्वे अर्वाक्सृतौ अर्वाचीनसंसारनिर्माणे [illegible] प्रपंचनिर्माणे वा यत्कौशलं नैपुण्यं तत्कार्त्स्न्येन गतं सुपन्दीयं।
नातःपरं तस्य कौशलमस्तीवं मेने [illegible] तनूक्ते विधातुः इजलाभावेपि लोकस्य दृष्टिरियमुक्ता ॥ १३ ॥ अनुरागेण प्लुतो व्याप्तो यो हासः। रासो विनोदः। लीलावलोकश्च तैः। स्वकांतहासावयनंत

भा॰ स्कं ३

ञा

णभूष

यन्मर्त्यलीलौपयिकं स्वयोगमायाबलं दर्शयता गृहीतं विस्मापनं स्वस्य च सौभगर्द्धेः परं पदं भूषणांगं ॥ १२ ॥ यद्धर्मसूनोर्वत राजसूये निरीक्ष्य दृ
क्स्वस्त्ययनं त्रिलोकः। कार्त्स्न्येन चाद्येह गतं विधातुरर्वाक्सृतौ कौशलमित्यमन्यत ॥ १३ ॥ यस्यानुरागप्लुतहासरासलीलावलोकप्रति
लब्धमानाः। व्रजस्त्रियो दृग्भिरनुप्रवृत्तधियोवतस्थुः किल कृत्यशेषाः ॥ १४ ॥ स्वशान्तरूपेष्वितरैः स्वरूपैरभ्यर्द्यमाने[illegible]नुकंपितात्मा।
परावरेशो महदंशयुक्तो ह्यजोपि जातो भगवान् यथाग्निः ॥ १५ ॥ श्रीरामायनमः ॥ ॥

रंप्रतिलब्धो मानो याभिः ताः दृग्भिः सह अनुप्रवृत्ता गच्छंतं तमेवानुगता धियो यासां ताः कृत्येषु शेषो यासां ताः असमापितकृत्या एव तस्थुः ॥ १४ ॥ एवंभूतविविधप्रदर्शनेना
[illegible]माहा। स्वीयान्येव शान्तानि च रूपाणि तत्र शान्तरूपेषु इतरैः पीड्यमानेषु अनुकंपितः कृतानुकंपः आत्मा यस्य। अजोपि जातः। आविर्भूतः। महाभूतरूपेण नित्यसिद्ध इव
अग्निर्यथा काष्ठेषु। आविर्भवति तद्वत्। अजस्य जन्मनि हेतुः। महान् महत्तत्त्वं अंशः कार्यलेशो यस्माव्यक्तस्य तन्महदंशं तद्युक्त इति ॥ १५ ॥ ॥

॥ परंपुण्यंचवरंपापंतयोःईराः पुण्यपापफलदाता ॥

ला॰टी॰ वरा ८

णडक्रातोसौपरमेशानामीशैःपारतंत्र्यप्रतीतेश्चत्राहाहाकल्यां।ममाप्येतत्दुर्वितर्क्यंदुर्घटंचखेदयतीतितदेवाह।वसुदेवगेहेवंधनागारेयज्जन्मनोविडंवनंअनुकरणंन्
नृसिंहवदकस्मादाविर्भावः।कंसभयादिवनिलीयव्रजेवासःसचकालयवनादिरिपुभयादिवपुरान्मथुरायाव्यवात्सीत्।पलायित॥१६॥एतच्चहरेश्चरितंस्म
रतोममचेतःकर्मदुनोतिव्यथयतीतितदेवदर्शयतियदाहेतिहेतातहेअंबयुवांप्रसीदतं।प्रसादंकुरुतं।नकृतानिष्कृतिःशुश्रूषणंयैःतेषांनोअस्माकं

वा॰ट॰ २

मांखेदयत्येतदजस्यजन्मविडंवनंयद्वसुदेवगेहे।व्रजेचवासोऽरिभयादिवस्वयंपुराद्व्यवात्सीद्यदनंतवीर्यः॥१६॥दुनोतिचेतःस्मरतोममै
तद्यदाहपादावभिवंद्यपित्रोः।तातांवकंसादुरुशंकितानांप्रसीदतंनोकृतनिष्कृतीनाम्॥१७॥कोवाअमुष्यांघ्रिसरोजरेणुंविस्मर्तुमी
शीतमान्विजिघ्रन्।योविस्फुरद्भ्रूविटपेनभूमेर्भारंकृतांतेनतिरश्चकार॥१८॥दृष्टाभवद्भिर्ननुराजसूयेचैद्यस्यकृष्णंद्विषतोपिसिद्धिः।यां
योगिनःसंस्पृहयंतिसम्यक्योगेनकस्तद्विरहंसहेत॥१९॥तथैवचान्येनरलोकवीराय आहवेकृष्णमुखारविंदं।नेत्रैःपिवंतोनय
नाभिरामंपार्थास्त्रपूताःपदमापुरस्य॥२०॥ ॥

पु३

८

इतिवक्तुंवचनंत्वरामाद्यलिखायं॥१७॥ ननुतर्ह्यनीश्वरएवकिंनस्यात्तवतुअश्रद्धामात्रमेतत्।तत्राहत्रिभिः।कोवाअमुष्यांघ्रिसरोजयोरेणुंसमपिविजिघ्रन्सेवमानःविस्मर्तुमीशीतश
क्नुयात्।विस्फुरन्भ्रूविटपःभ्रूलतासएवकृतांतस्तेन॥१८॥ नचतस्येश्वरत्वंसाधनीयंभवद्भिरपिदृष्टत्वादित्याह।दृष्टेति।यांसिद्धिंसम्यक्योगेनप्राप्तुमिच्छंति॥१९॥
आहवेयुद्धेपार्थस्यास्त्रैःपूताःनिःपापाःसंतः॥२०॥ ॥

गुपानां २

तदेवं परमैश्वर्ये सत्यपि यदुग्रसेनाद्यनुवर्त्तित्वं तत्तु नरस्मान्नतरां व्यथयतीत्याह। स्वयं तु य एवंभूतस्तस्य तत्तत्कैंकर्यं नोऽस्मान् विग्लापयतीत्युत्तरेणान्वयः। तत्साम्यातिशयो यस्य य
मपेक्ष्यान्यस्य साम्यमतिशयश्च नास्तीत्यर्थः। तत्र हेतवः। त्रयाणां कुरुपाणामीशः स्वाराज्यलक्ष्म्या परमानंदघनरूपसंपत्त्यैव प्राप्तसमस्तभोगः। बलिं करं अर्हणं वा हरद्भिः
समर्पयद्भिः। चिरकालीनैर्लोकपालैः। किरीटाग्रेणेडितं स्तुतं पादपीठं यस्य। प्रणमतां किरीटसंघट्टनध्वनिरेव स्तुतिस्तेनेत्युक्ते। २१। अंग विदुरात्तान्यनुपत्यनुग्र

ति २

स्वयं त्वसाम्यातिशयस्त्र्यधीशः स्वाराज्यलक्ष्म्याप्तसमस्तकामः। बलिं हरद्भिश्चिरलोकपालैः किरीटकोट्येडितपादपीठः॥२१॥ त
त्तस्य कैंकर्यमलं भृतान्नो विग्लापयत्यंग यदुग्रसेनं। तिष्ठन्निषण्णं परमेष्ठिधिष्ण्ये न्यबोधयद्देव निधारये॥२२॥ अहो बकी यं स्तनका
लकूटं जिघांसयाऽपाययदप्यसाध्वी। लेभे गतिं धात्र्युचितां ततोऽन्यं कं वा दयालुं शरणं व्रजेम॥२३॥ ॥

+ तनुरगाधिभरस्या
ने

सेनेयत्किंकरत्वं तदेवाह। परमेष्ठिधिष्ण्ये राजासने निषण्णे आसीनं स्वयं तिष्ठन्। हे देव त्वं वधारयेति न्यबोधयत्। विज्ञापितवान्। २२॥ एवमत्यद्भुतचरित्रः कृपयैवेति सूचय
न् अपकारिण्यपि तस्य कृपालुतां दर्शयन्नाह। अहो आश्चर्यं दयालुतायां हंतुमिच्छयापि स्तनयोः संश्लिष्टं कालकूटं विषं यमपाययत्। बकी पूतना असाध्वी। दुष्टा
पि धात्र्या यशोदाया उचितां गतिं लेभे तेन रूपवेषमात्रेणाप्यसद्गतिं दत्तवानित्यर्थः। ततोऽन्यं कं वा व्रजेम॥२३॥ ॥

भा॰टि॰
९
२

नतु भागवतानेव भगवाननुगृह्णातीति प्रसिद्धं सत्यं । असुरानप्यहं भागवतानेव मन्ये यतो भागवता इव तेपि भगवद्ध्यानाभिनिवेशेन भगवंतमपरोक्षं पश्यं
तीत्याह । संरंभः क्रोधावेशः तेन मार्गेण अभिनिविष्टचित्तं येषां तान् । अत एव ये संग्रामे तार्क्ष्यः कश्यपः । तस्य पुत्रं गरुडं । अंसे स्कंधे सुनाभायुधश्चक्रायु
धो हरिस्तं पश्यंत । अत्र पश्यंत्यां तस्मात्तेषामनुग्रहो युक्त एवेत्यर्थः । वक्ष्यति च । तस्मात्केनाप्युपायेन मनः कृष्णे निवेशयेदिति । २४ । इदानीं तस्यावतारं तद्दीनग्र

मन्येऽसुरान्भागवतांस्त्र्यधीशे संरंभमार्गाभिनिविष्टचित्तान् । ये संयुगेऽचक्षत तार्क्ष्यपुत्रमंसे सुनाभायुधमापतंतं ॥ २४ ॥ वसु
देवस्य देवक्यां जातो भोजेंद्रबंधने । चिकीर्षुर्भगवानस्याः शमजेनाभियाचितः ॥ २५ ॥ ततो नंदव्रजमितः पित्रा कंसाद्वि
बिभ्यता । एकादश समास्तत्र गूढार्चिः सबलोऽवसत् ॥ २६ परीतो वत्सपैर्वत्सांश्चारयन्व्यहरद्विभुः । यमुनोपव
रा नेकूजद्द्विजसंकुलितांघ्रिपे ॥ २७ ॥ कौमारीं दर्शयंश्चेष्टां प्रेक्षणीयां व्रजौकसां । रुदन्निव हसन्मुग्धबालसिं
हावलोकनः ॥ २८ ॥ ॥

कारं चक्रमादित आरभ्य तच्चरितं संक्षेपतः कथयति । वसुदेवस्य भार्यायां जातः । भोजेंद्रः कंसः तस्य बंधनागारे । अस्याः पृथिव्याः शं सुखं चिकी ९
र्षुः । अजेन ब्रह्मणा याचितः सन् । २५ । पित्रा हेतुभूतेन नंदव्रजं इतः गतः । समाः संवत्सरान् गूढार्चिः गुप्ततेजाः । २६ । व्यहरत् अत्र क्रीडन् । कूजद्भिर्द्वि
जैः पक्षिभिः संकुलिता व्याप्ता अंघ्रिपा यस्मिन् । २७ । रुदन्निवेति इवशब्दस्य यथायोगं सर्वत्राप्यन्वयः । मुग्धो बालश्च यः सिंहस्तद्वदवलोकनं यस्य सः । २८ । ॥

म २

सएवाधिकंवयःप्राप्तःसन्लक्ष्म्याःशोभादिसंपदोनिकेतनंसितागोवृषायस्मिन्नानावर्णेगोसंघेरणन्शब्दंकुर्वन्वेणुर्यस्यसअरीरमत्रमय
मास २९ ॥ व्यनुदत्जघान क्रीडनकान्तृणादिनिर्म्मितान्नृसिंहादीन्यथा ३० विपन्नान्मृतान्गोपान्गावइतिगाश्चोत्थाप्यतदेवतोयंप्रकृति

२

सएवगोधनंलक्ष्म्यानिकेतंसितगोवृषं।चारयन्ननुगान्गोपान्रणद्वेणुररीरमत् ॥ २९ ॥ प्रयुक्तान्भोजराजेनमायिनः
कामरूपिणः।लीलयाव्यनुदत्तांस्तान्बालःक्रीडनकानिव ॥ ३० ॥ विपन्नान्विषपानेननिगृह्यभुजगाधिपं।उत्थाप्यापायय
द्गावस्तत्तोयंप्रकृतिस्थितं ॥ ३१ ॥ अयाजयद्गोसवेनगोपराजंद्विजोत्तमैः।वित्तस्यचोरुभारस्यचिकीर्षन्सद्व्ययंविभुः
॥ ३२ ॥ वर्षतीन्द्रेव्रजःकोपात्भग्नमानेतिविह्वलः।गोत्रलीलातपत्रेणत्रातोभद्रानुगृह्णता ॥ ३३ ॥ शरच्छशिकरैर्मृष्टंमा
नयन्रजनीमुखं।गायन्कलपदंरेमेस्त्रीणांमंडलमंडनः ॥ ३४ ॥ ॥ इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेविदुरोद्धव

संवादेद्वितीयोध्यायः ॥ ॥

स्थितंनिर्विषं ३१ इंद्रपूजालंघनेनकृतागवांपूजैवगोसवःतेन।गोपराजंनंदंवित्तस्यचेतिचकारादिहूस्यमानलंगंकुर्वन्नुरुभारस्यअतिसमृ
द्धस्य ३२ कोपाद्वर्षति गोत्रःपर्वतएवलीलातपत्रंतेन।हेलइ ३३ मृष्टमुज्वलंस्त्रीणांमंडलंमंडयतीतितथा ३४ ॥ तृतीयेद्वितीयः ॥ ॥

तृतीये मधुरामेत्य बजातकं सवधादिकं। यत्कृतं द्वारकायांच कृष्णेन तदवर्णयत्॥ शमित्यव्ययं पित्रोः सुखं स्यादिति चिकीर्षया इत्यर्थः। तुंगात् राजमंचात् रिपुयूथानां नाथं कंसं॥ व्यसोरपि निकर्षणं पित्रोः सुखार्थं॥१॥ ब्रह्म वेदं सविस्तरं षडंगादिसहितं। पंचजनोदरविदारणद्वारा पुत्रं मृतं आनीयेत्यर्थः॥२॥ भीष्मककन्यया रुक्मिण्या ये राजानः समाहूताः कृष्णमार्गे समाहूता इति पाठे आहूता इत्यर्थः। केन साधनेन श्रियो लक्ष्म्याः सवर्णेन सम

श्रीशुक उवाच॥ ततः स आगत्य पुरं स्वपित्रोश्चिकीर्षया शं बलदेवसंयुतः। निपात्य तुंगाद्रिपुयूथनाथं हतं व्यकर्षद्व्यसु-
मोजसोर्व्याम्॥१॥ सांदीपनेः सकृत्प्रोक्तं ब्रह्माधीत्य सविस्तरं। तस्मै प्रादाद्वरं पुत्रं मृतं पंचजनोदरात्॥२॥ समाहूता भीष्म-
ककन्यया ये श्रियः सवर्णेन बुभूषयैषां। गांधर्ववृत्त्या मिषतां स्वभागं जह्रे पदं मूर्ध्नि दधत्सुपर्णः॥३॥

नरूपेण। यद्यपि तया केवलं श्रीकृष्ण एवाहूतः न सर्वे तथापि तस्या लावण्यं तेषामागमने हेतुरिति ते एवाहूता इत्युच्यते। एषां मिषतां पश्यतां मूर्ध्नि पदं दध-
त्। तया सह गांधर्ववृत्त्या परस्परसमयरूपया उभूषया लविद्युमिच्छया जहार कथंभूतो स्वभागं लक्ष्मीं शात्वात्तया चात्मनोर्पितत्वाच्च। सुपर्णः सुप-
तनैः। यद्वा सुपर्ण इवानु स्वभागं सुधामित्यर्थः। यद्वा श्रियः रुक्मिण्याः समानवर्णं हृद्यं वाचकं यस्य सः श्रियः सवर्णो रुक्मी तेन समाहूताः शिशुपा-
लादयः। किमर्थं भीष्मकन्यया सह तेषां बुभूषया भूतिर्भवतीति तेन तदर्थं तत्र शिशुपालस्य श्यानं वरत्वेन बुभूषया जरासंधादीनां तद्विवाहोत्सवे नाशे

सोभन्नरथरे
स्थैः

[illegible]

१०

रा २

ककुद्मतो वृषभान्नुग्रविड्ढनासिकान् विड्ढनासिका कृत्वैर्भिवातैर्वृषभैस्सुहृन्मनेनचलग्रोमानो येषां तथापि तां गृध्यतः कामयमानान्नॄन् अत एवाज्ञान्नॄन् शस्त्रभृतो राज्ञः तच्छस्त्रैरेव जघान॥४॥ यदा अदित्याः कुंडले दातुं स्वर्गं गतः तदा प्रभुः स्वतंत्रोपि ग्राम्यः परतंत्र इव प्रियायाः सत्यभामायाः प्रियं विधातुमिच्छुः स्वतरुं पारिजातं आनीतवान्॥ यदर्थं यन्निमित्तं तं हृतं स्म वज्री शचीप्रेरितः योद्धुमभ्यधावत्॥ स्व कार्यसाधकेन तेन युद्धोद्यमस्त

ककुद्मिनो विड्ढनसो दमित्वा स्वयंवरे नाग्निजितीं सुबाहाः तद्गृध्यमानानपि गृध्यतोऽज्ञाञ्जघ्ने कृतः शस्त्रभृतः स्वशस्त्रैः॥४॥ प्रियं प्रभुर्ग्राम्य इव प्रियाया विधित्सुराच्छिद्य तरुं यदर्थे। वज्राद्रवन्तं सगणोऽपोक्षः क्रीडागृहे गोत्रनमयं वधूनां॥५॥ सुतं शुधेषं वसुधाग्रसत्तं हृस्याम्बुनाभोन्मथितं धरित्र्याः॥ आमंत्रितस्तत्तनयायुशेषं दत्वा तदन्तःपुरमाविवेश॥६॥ तत्रो हृता या नरदेवकन्याः कुजेन दृष्ट्वा हरिमात्तवंशाः। उत्थाय सद्यो जगृहुः प्रहर्षव्रीडानुरागप्रहितावलोकैः॥७॥ आसां मुहूर्त एकस्मिन्नानागारेषु योषितां। सविधिं जगृहे पाणीननुरूपः स्वमायया॥८॥ ॥

युक्ता एवेत्याह। क्रीडागृहमिति। अयं वज्री॥५॥ सुनालेन वक्रेणोत्कृन्मथितं हृतं सुतं भौमं दृष्ट्वा तस्य मात्रा धरित्र्याभूलक्ष्म्या आमंत्रितः प्रार्थितः सन् तस्य तनयाय भगदत्ताय हृतशेषं राज्यं दत्वा। तत्रान्तःपुरे कुजेन भौमेन या आहृताः ताः॥६॥ प्रहर्षश्च व्रीडा च अनुरागश्च तैः प्रहिताः प्रेरिताः ये अवलोकास्तैर्जगृहुः॥ ॥ स्वीकृतवत्य॥७॥ आसां योषितां पाणीन् तत्तदनुरूपः सन्। सविधिर्विवाहोचितप्रकारसहितं यथा भवति॥ ८॥

॥ह॥

भा.टी.
२२

सर्वतः सर्वैर्गुणैः स्वतुल्यानि प्रकृतेर्मायाया विविधं लवनं विस्तारः तदिच्छया यद्वा प्रकृतेर्हेतोर्विविधं भवितुमिच्छया ९ कालः कालयवनः रुंधतः आवृण्वतः स्वपु
रुंदलीमादिभिर्निमित्तमात्रैः स्वयमेव अजीघनत् घातितवान्। तेन स्वपुंसां तेजः प्रभावं कीर्तिं वा दत्तवान्॥ १०॥ शंबरद्विविदबल्वलानन्यानपि कांश्चित् प्रद्यु
म्नरामादिभिर्घातयत् अघातयत्। घातयच्चेति वा पाठः। दंतवक्रादीनुक्ष्यमवधीन्नृपान् अघातयदित्यनुषंगः। कथंभूतान्। कुरुक्षेत्रमापततां गच्छतां येषां

तास्वऽपत्यान्यऽजनयदात्मतुल्यानि सर्वतः। एकैकस्यां दश दश प्रकृतेर्विबुभूषया॥ ९॥ कालमागधशाल्वादीन
नीकैः रुंधतः पुरं। अजीघनत् स्वयं दिव्यं स्वपुंसां तेज आदिशत्॥ १०॥ शंबरं द्विविदं बाणं मुरं बल्वलमेव च।
अन्यांश्च दंतवक्रादीनवधीत्कांश्च घातयत्॥ ११॥ अथ ते भ्रातृपुत्राणां पक्षयोः पतितान्नृपान्। चचाल भूः
कुरुक्षेत्रं येषामापततां बलैः॥ १२॥ स कर्णदुःशासनसौबलानां कुमंत्रपाकेन हतश्रियायुषं। सुयोधनं सा
नुचरं शयानं भग्नोरुमुर्व्यां न ननंद पश्यन्॥ १३॥ कियान्भुवोयं क्षपितोरुभारो यद्द्रोणभीष्मार्जुनभीममूलैः। अष्टा
दशाक्षौहिणिको मदंशैरास्ते बलं दुर्विषहं यदूनाम्॥ १४॥

बलैः सैन्यैर्भूः सर्वापि चचाल चकंपे॥ १२॥ सः कृष्णः हता श्रीः आयुश्च यस्य स भग्न ऊरुर्यस्य तं ऊर्व्यां शयानं पश्यन्नपि न ननंद तोषं न प्राप॥ १३॥ अत्र नलिनं
दनप्रकारमेवाह। कियानिति। द्रोणादिभिर्मूलैः कारणभूतैः यदिति यः अष्टादशाक्षौहिणीयुक्तः भुवो भारः। क्षपित उरुभारो भुवः अयं कियान्भुव
त्मल्प इत्यर्थः। यस्मात् मदंशैः प्रद्युम्नादिभिर्हेतुभूतैः दुर्विषहं बलमास्ते॥ १४॥

रू
२२

11९३113

नवान्यच्युतपायः॥ भवति किं तामसुनाय त्रामदः सर्वतोमदः तेन आताम्रविलोचनानामेषां विवादो यदा भविष्यति तदा इयानेवैषां वधोपर्य्यः
अतोऽन्यो नास्ति। एकात्मनोपि मय्युद्यते समिछ्छयमेव विवादेनांतर्द्धीरस्वित्यर्थः॥१५॥ एवं श्लोकद्वयेनोक्तं क्रमेण संचिंत्य स्वराज्ये स्थाप्य

मिथो यदैषां भविता विवादो मध्वामदाताम्रविलोचनानाम्। नैषां वधोपाय इयानतोऽन्यो मय्युद्यतेंऽतर्द्धते स्वयं स्म॥१५॥
एवं संचिंत्य भगवान्स्वराज्ये स्थाप्य धर्म्मजं। नंदयामास सुहृदः साधूनां वर्त्म दर्शयन्॥१६॥ उत्तरायां धृतः पूरोर्वंशः सा
ध्वभिमन्युना। स वै द्रौण्यस्त्रसंछिन्नः पुनर्भगवता धृतः॥१७॥ अयाजयद्धर्म्मसुतमश्वमेधैस्त्रिभिर्विभुः। सोपि क्ष्मा
मनुजै रक्षन्रेमे कृष्णमनुव्रतः॥१८॥ भगवानपि विश्वात्मा लोकवेदपथानुगः। कामान्शिषेवे द्वार्वत्यामसक्तः
सांख्यमास्थितः॥१९॥ स्निग्धस्मितावलोकेन वाचा पीयूषकल्पया। चरित्रेणानवद्येन श्रीनिकेतेन चात्मना॥२०॥ इमं लो
कममुं चैव रमयन्सुतरां यदून्। रेमे क्षणदया दत्तक्षणस्त्रीक्षणसौहृदः॥२१॥ तस्यैवं रममाणस्य संवत्सरगणान्बहू
न्। गृहमेधेषु योगेषु विरागः समजायत॥२२॥ ॥

यित्वा॥१६॥ धृतः रक्षितः॥१७ अनुजैः सह॥१८॥ सांख्यं प्रकृतिपुरुषविवेकं॥१९॥ स्निग्धो यः स्मितसहितोऽवलोकस्तेन। पीयूषकल्प
या सुधातुल्यया। पाठांतरे सुधाप्रवाहरूपया आत्मना देहेन॥२०॥ क्षणदया रात्र्या दत्तः क्षणः अवसरः उत्सवो वा यासां स्त्रीणां ता
सु क्षणं सौहृदं यस्य सः॥२१॥ गृहमेधेषु योगेषु कामभोगोपायेषु विरागः उदासीनं जातमित्यर्थः॥२२॥ ॥

यदास्वाधीनेष्वपिभगवतोविरागस्तदादैवावाधीनेषुकोविश्रंभेतविश्वासंप्रीतिंवाकुर्यात्।योगेनवेनृयोगेश्वरंश्रीकृष्णमनुव्रतः।२३।शेपुःशापं
ददुः।भगवतोमतेअभिप्रायेकोविदाःअभिज्ञाः।२४॥२५वयःशीलादिबहुगुणोपेताः।याःगावस्ताः।२६।कन्याःअग्रहस्तिकरींजीविकापर्याप्तां।२७

दैवाधीनेषुकामेषुदैवाधीनःस्वयंपुमान्।कोविश्रंभेतयोगेनयोगेश्वरमनुव्रतः।२३॥पुर्यांकदाचित्क्रीडद्भिर्यदुभोजकु
मारकैः।कोपितामुनयःशेपुर्भगवन्मतकोविदाः।२४ततःकतिपयैर्मासैर्वृष्णिभोजान्धकादयः।ययुःप्रभासंसंहृष्टारथै
र्देवविमोहिताः।२५॥तत्रस्नात्वापितॄन्देवानृषींश्चैवतदंभसा।तर्पयित्वाथविप्रेभ्योगावोबहुगुणाददुः।२६।हिरण्यं
रजतंशय्यांवासांस्यजिनकंबलान्।यानंरथानिभान्कन्याधरांवृत्तिकरीमपि।२७।अन्नंचोरुरसंतेभ्योदत्वाभगवदर्प
णं।गोविप्रार्थासवःशूराःप्रणेमुर्भुविमूर्द्धभिः॥ ॥इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेविदुरोद्धवसंवादेतृ
तीयोध्यायः॥ ॥उद्धवउवाच॥ ॥अथतेतदनुज्ञाताभुक्त्वापीत्वाचवारुणीं।तयाविभ्रंशितज्ञानादुरुक्तैर्मर्मपस्पृ
शुः॥१॥ ॥

भगवदर्पणंयथाभवति।गोविप्रार्थाअसवोयेषां।२८॥ ॥तृतीयेतृतीयोऽध्यायः॥ ॥चतुर्थेवंशनिधनंश्रुत्वात्मज्ञानलब्धयेउद्धवस्यो
पदेशेनक्षत्तामैत्रेयमागमत्।तेब्राह्मणैरनुज्ञाताःवारुणींपैष्टींमदिराम्॥१॥ ॥मर्मस्पस्पृष्टवंतः।मर्मोद्घाटनंचक्रुरित्यर्थः।१

कृता २

२ आत्ममायामवलंब्य स्थितं +२

+ वृक्षः प्रपंचः तस्य मूले अस्मत तदुपाविशत । एकांते अस्मीभूतो व भ्रवेस्य पेः

रवौ
मायायाः संवरणं इच्छु
कामोहं एष्टो अन्वगमं
२

वारुण्येव मैरेयं तस्य दोषेण निम्लोचति अस्तं गच्छति सति मर्दनं कदनं ॥ २ ॥ उपस्पृश्य सरस्वत्यामाचम्य ॥ ३ ॥ अहं चोक्तः पूर्वमेव द्वारकायां ॥ ४ ॥ तदभिप्रेतं कुलसंहारादिकं ॥ ५ ॥ कृतकेतं वासं अकेतनं अनाश्रयं ॥ ६ ॥ विरजं विरजसं शुद्धसत्वं विदितं लक्षितं । कौशं कौशेयं ॥ ७ ॥ अधिश्रित्य उपरि स्थापयित्वा अपा

तेषां मैरेयदोषेण विषमीकृतचेतसां । निम्लोचति रवावासीद्वेणूनामिव मर्दनम् ॥ २ ॥ भगवान्स्वात्ममायाया गतिं तामवलोक्य सः । सरस्वतीमुपस्पृश्य वृक्षमूलमुपाविशत् ॥ ३ ॥ अहं चोक्तो भगवता प्रपन्नार्तिहरेण ह । बदरीं त्वं प्रयाहीति स्वकुलं संजिहीर्षुणा ॥ ४ ॥ अथापि तदभिप्रेतं जानन्नहमरिंदम । पृष्ठतोऽन्वगमं भर्तुः पादविश्लेषणाक्षमः ॥ ५ ॥ अद्राक्षमेकमासीनं विचिन्वन्दयितं पतिं । श्रीनिकेतं सरस्वत्यां कृतकेतमकेतनं ॥ ६ ॥ श्यामावदातं विरजं प्रशांतारुणलोचनं । दोर्भिश्चतुर्भिर्विदितं पीतकौशांबरेण च ॥ ७ ॥ वाम ऊरावधिश्रित्य दक्षिणांघ्रिसरोरुहं । अपाश्रितार्भकाश्वत्थमकृशं त्यक्तपिप्पलं ॥ ८ ॥ तस्मिन्महाभागवतो न२ द्वैपायनसुहृत्सखः । लोकाननुचरन्सिद्धः आससाद यदृच्छया ॥ ९ ॥ तस्यानुरक्तस्य मुनेर्मुकुंदः प्रमोदभावानतकंधरस्य । आशृण्वतो मामनुरागहाससमीक्षया विश्रमयन्नुवाच ॥ १० ॥ ॥

श्रितः पृष्ठतोऽवष्टब्धः अर्भकः बालः कोमलोऽश्वत्थो येन तं । त्यक्तं पिप्पलं विषयसुखं येन । तथापि अकृशं आनंदपूर्णं ॥ ८ ॥ द्वैपायनः सुहृत्सख वयस्यसखः । स्वयं सुहृत्त्वात् । पराशरशिष्यो मैत्रेय इत्यर्थः ॥ ९ ॥ प्रमोदेन भावेन च नता कंधरा यस्य । पाठांतरे प्रमोदस्य भारेण । अनुरागेण हासो यस्यां तया समीक्षया विश्रमयन् विगतश्रमं कुर्वन् ॥ १० ॥ ॥

+ स्वहृत् सुहृत्ः सखा सहाध्यायी । २

गतवातावशः अश्वत्थमूले स्थितः नरगति +१

भा॰टी॰
१२

+ अवशिष्टः अतः परं तव जन्म नास्ति ॥

तेन मनसीप्सितं अहं अंतस्थितो वेद वेद्मि दाने हेतुः विश्वसृजां च मिलितानां सत्रे हे वसो इति। पुरा पूर्वजन्मनि त्वं वसुरहः। तदा मत्प्राप्तिकामेन त्वयाह
मिष्टः। अतस्तत्साधनं ददामि दास्यामि। अन्यैर्मत्पराङ्मुखैर्दुःप्राप ॥११॥ तस्य भाग्यमभिनंदति। स एष भवो जन्म तेषां भवानां मध्ये चरमः। यद्यस्मिन्म
दनुग्रहः आसादितः लब्धः। यत्तु नमां रहः एकांते विशदानुवृत्त्या एकांतभक्त्या दृष्टवान् दृष्टवानसि। एतत् दिष्ट्या लब्धं जातमित्यर्थः॥१२॥ नृलोकान्स्व

श्रीभगवानुवाच ॥ वेदाहमन्तर्मनसीप्सितं ते ददामि यत्तद्दुरवापमन्यैः। सत्रे पुरा विश्वसृजां वसूनां। मत्सिद्धिकामेन वसो
त्वयेष्टः ॥११॥ स एष साधो चरमो भवानामासादितस्ते मदनुग्रहो यत्। यन्मां नृलोकान्रह उत्सृजंतं दिष्ट्या ददृश्वान्विश
दानुवृत्त्या ॥१२॥ पुरा मया प्रोक्तमजाय नाभ्ये पद्मे निषण्णाय ममादिसर्गे। ज्ञानं परं मन्महिमावभासं यत्सूरयो भागव
तं वदंति ॥१३॥ इत्यादृतोक्तः परमस्य पुंसः प्रतिक्षणानुग्रहभाजनोहं। स्नेहोत्थरोमा स्खलिताक्षरस्तं मुंचन्शुचः प्रांज
लिराबभाषे ॥१४॥ को न्वीश ते पादसरोजभाजां सुदुर्लभोर्थेषु चतुर्ष्वपीह। तथापि नाहं प्रवृणोमि भूमन्भवत्पदांभोजनिषेवणो
त्सुकः ॥१५॥

पितानहंनप्रवृणोमि ॥१५॥

× थ ४

शब्देन जीवास्तेषां लोकान् उत्सृजंतं वैकुंठं गच्छंतमित्यर्थः ॥१२॥ ददामीति यदुक्तं तदेव निर्दिशति। पुरा पूर्वस्मिन्पाद्मे कल्पे आदिसर्गे सर्गोपक्रमे मम
महिमा लीला अवभासते येन तत् ॥१३॥ इत्येवमादृत आदरेणोक्त अहं। प्रतिक्षणं कृपावलोक एवानुग्रहस्तस्य भाजनः पात्रभूतः। पाठांतरे प्रति
क्षणमनुग्रहस्य पात्रमिति। शुचः अश्रूणि मुंचन् आबभाषे उक्तवानस्मि ॥१४॥ न हि स्वाज्ञाननिवृत्तिमात्रकामोहं किंतु त्वत्पदनिषेवणोत्सुकः। त्व
यि चापरे मानाचरणं दृष्ट्वा मे मोहो भवति। अतस्त्वं तत्त्वज्ञानं देहीति प्रार्थयितुं आह कोन्वीशेति। चतुर्षु धर्मादिषु। तथा

१२

अघटमानाचरणं दर्शयति । कर्म्माण्यनीहस्य निस्पृहस्य निःक्रियस्य वा । अभवस्य अजन्मनो भवो जन्म कालात्मनस्तु वारिभयात् दुर्ग्गाश्रयः पला
पनं च । स्वात्मनि रतिर्यस्मात् तस्य स्त्रीभिः युतः गृहस्थाश्रम इति यत् । इह अस्मिन् विषये विदुषामपि धीः संशयेन खिद्यति । किं च । मंत्रेषु प्रस्तुतेषु
सत्सु मां माम् आहूय एवं अहो पृच्छेः । अपृच्छः । अकुंठितः कालादिना । अखंडः संततः सदात्मा संशयादिरहितो बोधो विद्याशक्तिर्यस्य । मुग्धवत् अज्ञवत् । अ

कर्म्माण्यनीहस्य भवोऽभवस्य ते दुर्ग्गाश्रयोथारिभयात्पलायनम् । कालात्मनो यत्प्रमदायुताश्रयः स्वात्मन्रतेः खिद्यति धी
र्व्विदामिह ॥ मंत्रेषु मां वा उपहूय यत्त्वमकुंठिताखंडसदात्मबोधः । पृच्छेः प्रभो मुग्ध इवाप्रमत्तः तन्नो मनो मोहयतीव देव ।
ज्ञानं परं स्वात्मरहःप्रकाशं प्रोवाच कस्मै भगवान्समग्रं । अपि क्षमं नो ग्रहणाय भर्त्तर्व्वदाञ्जसा यद्वृजिनं तरेम । इत्यावेदितहा
र्द्दाय मह्यं स भगवान्परः । आदिदेशारविंदाक्ष आत्मनः परमां स्थितिं ॥ स एवमाराधितपादतीर्थादधीततत्वात्मविबोधमार्गः । प्रणम्य पा
दौ परिवृत्य देवमिहागतोहं विरहातुरात्मा । सोहं तद्दर्शनाह्लादवियोगार्त्तियुतः प्रभो । गमिष्ये दयितं तस्य बदर्याश्रममंडलं ॥ ॥

प्रमत्तः अवहितः सन् । स्वात्मनः स्वरहः रहस्यं तत्त्वं तस्य प्रकाशकं कस्मै ब्रह्मणे सर्व्वनामत्वमार्षो । नोस्माकं ग्रहणाय । अपि क्षमं यदि योग्यं तर्हि व
द भर्त्तः स्वामिन् । यत् यतः वृजिनं संसारदुःखं अंजसा अनायासेन तरिष्यामः । आवेदितो हार्द्दो हृदिस्थितोऽभिप्रायो येन तस्मै । आराधितपादो भग
वान् स एव तीर्थं गुरुस्तस्मात् अधीतः अधिगतः तत्वात्मविबोधस्य परमार्थात्मज्ञानस्य मार्गो येन । सोहं देवं परिवृत्य प्रदक्षिणीकृत्य तद्दर्शनेनाह्ला
दो वियोगेनार्त्तिस्ताभ्यां युतो बदर्याश्रमस्थानं गमिष्यामि ॥२१॥

भा॰प्र॰
२४

विश्वासात्२ विदुर उवाच ३

मृदु परोपद्रवशून्यं । तीव्रं दुश्चरं । दीर्घं आकल्पांतं । तेपाते तपश्चरत इत्यर्थः । लोकभावनौ लोकानुग्रहकारकौ ॥ २२ ॥ ज्ञानेन विवेकेन । विश्रंभा
त् । यद्यस्माद्भृत्यप्रयोजनसाधकाः सन्तश्चरन्ति । नहि ज्ञातार्थानामन्यत्कृत्यमस्तीत्यर्थः ॥ २५ ॥ तत्वाय संराध्य इति । अयं भावः । भगवतेव स्म
रणमात्रेण तवापि तत्वमुपदिष्टं अयं केवलमसंभावनादिनिवृत्तये ज्ञानी कश्चिदाराध्यः स च तवाराध्यः मैत्रेयः न त्वहं ममान्त्रिक एव त्वदुपदे

यत्र नारायणो देवो नरश्च भगवानृषिः मृदु तीव्रं तपो दीर्घं तेपाते लोकभावनौ ॥ २२ ॥ ॥ श्रीशुक उवाच ॥ इत्युद्धवादुपाकर्ण्य
तु सुहृदां दुःसहं वधं । ज्ञानेनाशमयत्क्षत्ता शोकमुत्पतितं बुधः ॥ २३ ॥ स तं महाभागवतं व्रजंतं कौरवर्षभः । विश्रंभादभ्यध
शं२ त्तेदं मुख्यं कृष्णपरिग्रहे ॥ २४ ॥ ज्ञानं परं स्वात्मरहःप्रकाशं यदाह योगेश्वर ईश्वरस्ते । वक्तुं भवान्नोर्हति यद्धि विष्णोर्भृत्यार्थ स्वभृत्या ३
कृतश्चरन्ति ॥ २५ ॥ ॥ उद्धव उवाच ॥ ॥ ननु ते तत्वसंराध्य ऋषिः कौषारवोऽन्तिके । साक्षाद्भगवतादिष्टो मर्त्यलोकं जिहा
सता ॥ २६ ॥ श्रीशुक उवाच ॥ ॥ इति सह विदुरेण विश्वमूर्तेर्गुणकथया सुधया प्लावितोरुतापः । क्षणमिव पुलिने यमस्व
सु स्तां समुषित औपगविर्निशां ततोऽगात् ॥ २७ ॥ राजोवाच ॥ ॥ निधनमुपगतेषु वृष्णिभोजेष्वधिरथयूथपयूथपेषु मुख्यः । स तु
कथमवशिष्ट उद्धवो यद्धरिरपि तत्यज आकृतिं त्र्यधीशः ॥ २८ ॥ श्रीशुक उवाच ॥ ब्रह्मशापापदेशेन कालेनामोघवांछितः । संहृ
त्य स्वकुलं नूनं त्यक्ष्यन्देहमचिंतयत् ॥ २९ ॥

मत्रत्वंविहृतापघ्नुहीः
शे तस्यादिष्टत्वादिति ॥ २६ ॥ प्लावितः अपनीतः उरुतापो यस्य सः । यमस्वसुर्यमुनायाः पुलिने तीरे २४
तां निशां क्षणमिव समुषितः औपगविरुद्धवः ॥ २७ ॥ ब्रह्मशापेन निधनं प्राप्तेषु यदुषु यस्मात् त्र्याणां ब्रह्मादीनामीशो हरिरपि आकृतिं मनुष्या
कारं त्यक्तवान् ॥ २७ ॥ ब्रह्मशापः अपदेशो मिषं यस्य तेन कालेन स्वशक्तिरूपेण अमोघं वांछितं यस्य । नह्ययं शापः प्रभुः किंतु भगवदिच्छैवेत्यर्थः ॥ श्री

श्रा १

न २

अवोधमेव प्रपंचयति। आहेति षड्भिः। प्राकृतेन अविवेकंगतेन आत्मनाचित्तेन ॥ ४७ ॥ हे विप्राः। पारक्यस्य श्वसृगालाद्याहारस्य देहस्यार्थे मया अक्षौहिणीः। अक्षौहिणीप्रमाणं व्यासेनोक्तं। अक्षौहिणी प्रसंख्याता रथानां द्विजसत्तम। संख्यागणकैतत्त्वज्ञैः सहस्राण्येकविंशतिः। शतान्युपरि चैवाष्टौ तथा भूयश्च सप्ततिः। गजानां च प्रसंख्यानमेतदेव प्रकीर्त्तितं। ज्ञेयं शतसहस्रं तु सहस्राणि नवैव तु। नराणामपि पंचाशच्छतानि त्रीणि चैव हि। पंचषष्टिः सहस्राणि तथाश्वानां शतानि च। दशोत्तराणि षट्प्राहुः संख्यातत्त्वविदो जनाः। एताम

आह राजा धर्मसुतश्चिंतयन् सुहृदां वधं। प्राकृतेनात्मना विप्राः स्नेहमोहवशं गतः ॥ ४७ ॥ अहो मे पश्यताज्ञानं हृदि रूढं दुरात्मनः। पारक्यस्यैव देहस्य वह्व्यो मेऽक्षौहिणीर्हताः ॥ ४८ ॥ वालद्विजसुहृन्मित्रपितृभ्रातृगुरुद्रुहः। न मे स्यान्निरयान्मोक्षो ह्यपि वर्षायुतायुतैः ॥ ४९ ॥ नैनो राज्ञः प्रजाभर्त्तुर्धर्मयुद्धे वधो द्विषां। इति मे न तु बोधाय कल्पते शासनं वचः ॥ ५० ॥

क्षौहिणीं प्राहुर्यथावदिह संख्ययेति ॥ ४८ ॥ सुहृदः संबंधिनः। मित्राणि सखायः। पितरः पितृव्याः॥ द्विषां वध एनः पापं न भवतीति यत्तु शाशनं शिक्षारूपं वचः। अतो न कल्पते यतस्त्वहवः प्राजाभर्त्तुरेव। अयं भावः। स्वप्रजानामन्यतो वधे प्रसक्ते तद्वधोऽनुज्ञातः। दुर्योधनेन तु प्रजानां पाल्यमानानां मया केवलं राज्यलोभेन हतत्वात्तु पापमेवेदमिति। ॥ ५० ॥

।ल

किंच। युद्धेऽसावधो लवत्तनापमधर्मः स्त्रीणां मम याहता बंधवो यासां तासां योऽसौ द्रोहोऽनुद्दिष्टोऽप्युत्थितस्तं व्यपोहितुमपाकर्तुं कल्पः समर्थो
नाहं। गृहमेधीयैर्गृहाश्रमविहितैः ॥५१॥ ननु च सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेदेति श्रुतेः। पापमश्वमेधेन नश्येदेवेत्या
शंक्याविवेकविजृंभितं हेतुवादमाश्रित्य निराकरोति। यथेत्यादि। यथाम्बु न पंकेन पंकांभो न मृज्यते यथा वा सुरालेशकृतमशौचं यथा सुर
या न मृज्यते तथैव भूतहत्यामेकां प्रमादतो जातां बुद्धिपूर्वहिंसाप्रायैर्यज्ञैर्मार्ष्टुं शोधयितुं नार्हतीति ॥५२॥ ॥ इति प्रथमेऽष्टमः ॥ ॥ युधिष्ठि

स्त्रीणां मद्धतबंधूनां द्रोहो योऽसाविहोत्थितः। कर्मभिर्गृहमेधीयैर्नाहं कल्पो व्यपोहितुं ॥५१॥ यथा पंकेन पंकांभः सुरया वा सुराकृतं। भू
तहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हति ॥५२॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिरानुतापोऽष्टमोऽध्यायः ॥ ॥ श्रीसूत
उवाच ॥ ॥ इति भीतः प्रजाद्रोहात्सर्वधर्मविवित्सया। ततो विनशनं प्रागाद्यत्र देवव्रतोऽपतत् ॥१॥ तदा ते भ्रातरः सर्वे सदश्वैः
स्वर्णभूषितैः। अन्वगच्छन्रथैर्विप्रा व्यासधौम्यादयस्तथा ॥२॥ भगवानपि विप्रर्षे रथेन सधनंजयः। स तैर्व्यरोचत नृपः कु
वेर इव गुह्यकैः ॥३॥ दृष्ट्वा निपतितं भूमौ दिवश्च्युतमिवामरं। प्रणेमुः पांडवा भीष्मं सानुगाः सह चक्रिणा ॥४॥ तत्र ब्रह्मर्षयः स
र्वे देवर्षयश्च सत्तम। राजर्षयश्च तत्रासन्द्रष्टुं भारतपुंगवं ॥५॥ ॥

राय भीष्मेण सर्वधर्मनिरूपणं। कृष्णस्तुतिश्च मुक्तिश्च नवमे तस्य वर्ण्यते॥ यदर्थं तस्यापि विवेकः श्रीकृष्णेन संवर्द्धितस्तद्दर्शयति। इतीति। सर्वेषां धर्माणां वि
वित्सया वेदितुमिच्छया विनशनं कुरुक्षेत्रं देवव्रतो भीष्मः ॥ संतः श्रेष्ठा अश्वा येषु तै रथैः ॥२॥ तत्र तदा तत्रासन्न तत्र कृष्णमेवागता इत्यर्थः। भारतपुंगवं भी
ष्मं ॥५॥ ॥ राम ॥ ॥

रेणुकासुतः परशुरामः ॥ ६ ॥ कौशिको विश्वामित्रः ॥ ब्रह्मरातः शुकः ॥ आंगिरसो बृहस्पतिः ॥ ७ ॥ वसूत्तमो भीष्मः ॥ ८ ॥ हृदिस्थं संतं पुरत आसीनं
पूजयामास ॥ ९ ॥ उपासीनान् समीपे उपविष्टान् प्रश्रयो विनयः प्रेम स्नेहः ताभ्यां संगतान् प्रसन्नान् । पाठांतरे ताभ्यामवनतान् । अभ्याचष्ट अभ्य
भाषत । अनुरागास्रैः स्नेहाश्रुभिः अंधीभूतेन चक्षुषा उपलक्षितः । ददर्शेति वा ॥ १० ॥ अभिभाषणमाह । अहो इति एकादशभिः । हे धर्म

पर्वतो नारदो धौम्यो भगवान्बादरायणः । बृहदश्वो भरद्वाजः सशिष्यो रेणुकासुतः ॥ ६ ॥ वशिष्ट इंद्रप्रमदस्त्रितो गृत्समदोऽसितः ।
कक्षीवान्गौतमोऽत्रिश्च कौशिकोथ सुदर्शनः ॥ ७ ॥ अन्ये च मुनयो ब्रह्मन्ब्रह्मरातादयोऽमलाः । शिष्यैरुपेता आजग्मुः
कश्यपांगिरसादयः ॥ ८ ॥ तान्समेतान्महाभागानुपलभ्य वसूत्तमः । पूजयामास धर्मज्ञो देशकालविभागवित् ॥ ९ ॥
कृष्णं च तत्प्रभावज्ञ आसीनं जगदीश्वरं । हृदिस्थं पूजयामास माययोपात्तविग्रहं ॥ १० ॥ पांडुपुत्रानुपासीनान्प्रश्रयप्रेमसंगतान् ।
अभ्याचष्टानुरागास्रैरंधीभूतेन चक्षुषा ॥ ११ ॥ भीष्म उवाच ॥ अहो कष्टमहोन्याय्यं यद्यूयं धर्मनंदनाः । जीवितुं नार्हथ क्लिष्टं विप्र
धर्माच्युताश्रयाः ॥ १२ ॥ संस्थितेऽतिरथे पांडौ पृथा बालप्रजा वधूः । युष्मत्कृते बहून्क्लेशान्प्राप्ता तोकवती मुहुः ॥ १३ ॥ सर्वं का
लकृतं मन्ये भवतां च यदप्रियं । सपालो यद्वशे लोको वायोरिव घनावलिः ॥ १४ ॥ ५२

नंदनाः क्लिष्टं यथा भवत्येवं जीवितुं नार्हथ एतदहो कष्टं जुगुप्सितं अहो अन्याय्यं चैतत् । यतो यूयं विप्रा धर्मोऽच्युतश्च आश्रयो येषां ते ॥ १२ ॥ किंच संस्थिते
मृते बाला बालकाः प्रजा यस्याः सा इति दैन्योक्तिः । तोकानि अपत्यानि तद्वती अपत्यैः सह क्लेशान् प्राप्तेइत्यर्थः ॥ १२ ॥ कालकृतत्वेन शोकं वारयति सर्वमि
तिद्वाभ्यां । भवतामपि यद्वशे यस्य वशवर्ती लोकः स कालः ॥ १२ ॥

शारीर१ कर्तुमिष्टं। यस्साविधित्सितं२

म्महो दुर्घटघटनापटुः काल इत्याह। यत्रेति। श्रीकृष्णस्सुहृत्। अर्जुनोऽस्त्री धन्वीति तत्रापि विपत्। उएपै श्री[illegible] यवलभद्रेनेप्रएपशश्रुदेव संपन्नावपीत्यर्थः॥१५॥ ननु कस्मात्कथं कालोऽतिक्रामेदित्यपेक्षायामाह। नह्यस्य श्रीकृष्णस्येत्यंगुल्या निर्दिशति। विधित्सितं स्य विजिज्ञासया।

यत्र धर्मसुतो राजा गदापाणिर्वृकोदरः। कृष्णोऽस्त्री गांडिवं चापं सुहृत्कृष्णस्ततो विपत्॥१५॥ नह्यस्य कर्हिचिद्राजन्पुमान्वेद विधित्सितं। यद्विजिज्ञासया युक्ता मुह्यंते कवयोऽपि हि॥१६॥ तस्मादिदं दैवतंत्रं व्यवस्य भरतर्षभ। तस्यानुविहितोऽनाथा नाथ पाहि प्रजाः प्रभो॥१७॥ एष वै भगवान्साक्षादाद्यो नारायणः पुमान्। मोहयन्मायया लोकं गूढश्चरति वृष्णिषु॥१८॥

॥१६॥ दैवतंत्रमीश्वराधीनं व्यवस्य निश्चित्य। तस्येश्वरस्यानुविहितः अनुवर्ती सन्कार्तरिक्तः। हे नाथ कालपरंपरागत स्वामिन् प्रभो समर्था अनाथाः प्रजाः पाहि॥१७॥ अनुविधेयः परमेश्वरश्च श्रीकृष्ण एवेत्याह। एष एव भगवान् सर्वेश्वरः। यत आद्यः पुमान्। तत्त्वतो नारायणः साक्षात्॥१८॥

एतदुपपादयति। अनुभावं महिमानं ॥ १९ ॥ त्वमज्ञानाद्यमेवं मन्यसे। मातुलेयं देवक्याः सुतं प्रियं प्रीतिविषयं मित्रं प्रीतिकर्त्तारं सुहृत्तममनुपकाराना
पेक्ष्य उपकारकं च। सौहृदात् विश्वासात् अकरोस्त्वं कृतवानसि। सचिवं मंत्रिणं ॥ २० ॥ नन्वीश्वरस्यैवं कथं नीचे सारथ्यादौ वृत्तिस्तत्राह। सर्वेति। तत्र
तं नीचोच्चकर्म्मकृतं मम योग्यमयोग्यमिति वैषम्यं क्वचिदपि नास्ति कुतो निरवद्यस्य रागादिशून्यस्य। तत्कुतः। अनहंकृतेः। अहंकाररहित
स्य। तच्च कुतः। अद्वयस्य। तदपि कुतः। समदृशः। समदृष्टेः। तत्रापि हेतुः सर्वस्यात्मनः। यथेष्टं वा हेतुः मद्भावः। ॥ २१ ॥ तथापि समत्वेपि हे भूप अ

अस्यानुभावं भगवान् वेद गुह्यतमं शिवः। देवर्षिर्नारदः साक्षाद्भगवान् कपिलो नृप ॥ १९ ॥ यं मन्यसे मातुलेयं प्रियं मि
त्रं सुहृत्तमं। अकरोः सचिवं दूतं सौहृदादथ सारथिं ॥ २० ॥ सर्वात्मनः समदृशो ह्यद्वयस्यानहंकृतेः। तत्कृतं मतिवैषम्यं निर
वद्यस्य न क्वचित् ॥ २१ ॥ तथाप्येकांतभक्तेषु पश्य भूपानुकंपितं। यन्मेऽसूंस्त्यजतः साक्षात्कृष्णो दर्शनमागतः ॥ २२ ॥ भक्त्यावे
श्य मनो यस्मिन्वाचा यन्नाम कीर्त्तयन्। त्यजन्कलेवरं योगी मुच्यते कामकर्मभिः ॥ २३ ॥ स देवदेवो भगवान्प्रतीक्षतां कलेवरं याव
दिदं हिनोम्यहं। प्रसन्नहासारुणलोचनोल्लसन्मुखांबुजो ध्यानपथश्चतुर्भुजः ॥ २४ ॥

नुकंपितमनुकंपां ॥ २२ ॥ इदानीं देहत्यागपर्यंतं श्रीकृष्णावस्थानं प्रार्थयते। भक्त्येति द्वाभ्यां। यावदिति विलंबं द्योतयति। अहं हिनोमि त्यजामीति यावत्। तं श्रांइद
मित्यनात्मत्वेन ज्ञातं। प्रसन्नहासेन तरुणलोचनाभ्यां च उल्लसद्रुचिरं मुखांबुजं यस्य। ध्यानस्य पंथा विषयो यो योऽन्यैश्चिंत्यते केवलं सोऽग्रतः स्थितः
सन्मां प्रतीक्षतामित्यर्थः ॥ [illegible] ॥ तत्रापि त्वं चतुर्भुज एव वैकुंठनिवासी लक्ष्मसंतापहारी हरिर्वाक्षिगोचरो भवतु यत्किमपि ब्रह्मतत्वनीरूपत्वे
न द्रष्टुमशक्यत्वात्। भक्तानां सेव्यसेवकभावातिरिक्तं न हि किंचिदप्यादरणीयमिति भावः ॥ २३ ॥ ॥ २४ ॥

प्रवृत्ति

ततस्तस्यानुकंपावाक्यमाकर्ण्य। पुरुषस्वभावेन विहितान्नरजातिसाधारणान् वर्णयामासेति तृतीयेनान्वयः। यथावर्णं वर्णधर्मान् यथाश्रमं आश्रमधर्मा
न्वैराग्यरागोपाधिभ्यां क्रमेणाम्नातमुभयं निवृत्तिरूपं लक्षणं येषां तान् ॥२५॥ तानेव विशेषप्रपंचमाह। दानेति। मोक्षधर्मान्
शमदमादीन् हरितोषणान् द्वादश्यादिनियमरूपान्। समासव्यासौ संक्षेपविस्तरौ तेनैव योगो उपायो ततः सहितान् ॥२६॥ धर्मादींश्च यथाधिकारं

श्रीसूत उवाच ॥ ॥ युधिष्ठिरस्तदाकर्ण्य शयानं शरपंजरे। अपृच्छद्विविधान्धर्मानृषीणां चानुशृण्वतां ॥२५॥ पुरुषस्वभावविहितान्य
थावर्णं यथाश्रमं। वैराग्यरागोपाधिभ्यामाम्नातोभयलक्षणान् ॥२६॥ दानधर्मान्राजधर्मान्मोक्षधर्मान्विभागशः। स्त्रीधर्मा
न्भगवद्धर्मान्समासव्यासयोगतः ॥२७॥ धर्मार्थकाममोक्षांश्च सहोपायान्यथा मुने। नानाख्यानेतिहासेषु वर्णयामास तत्त्व
वित् ॥२८॥ धर्मं प्रवदतस्तस्य स कालः प्रत्युपस्थितः। यो योगिनश्छंदमृत्योर्वांछितस्तूत्तरायणः ॥२९॥ तदोपसंहृत्य गिरः
सहस्रणीर्विमुक्तसंगं मन आदिपूरुषे। कृष्णे लसत्पीतपटे चतुर्भुजे पुरः स्थितेऽमीलितदृग्व्यधारयत् ॥३०॥ ॥

प्रतिनियतोपायसहितान्। यथा यथावत्। नानाख्यानेषु ये इतिहासास्तेषु शास्त्रेषु यथा संति तथा वर्णयामास ॥२८॥ एवं धर्मं वदतो भीष्मस्य स
कालः प्रत्युपस्थितः। यो योगिनो वांछितः। तुशब्देन व्यावृत्तिः। उत्तरायण इति। छंदेनेच्छया मृत्युर्यस्य ॥२९॥ सहस्रणीर्युद्धे समीपस्था
न्सहस्रं रथिनो नयति पालयतीति सहस्रणीर्भीष्मः। सहस्राणीति पाठे सहस्रार्थवतीर्गिरः। लसंतौ पीतौ पटौ यस्य तस्मिन्नमीलित
दृगेव मनो व्यधारयत् ॥२९॥ ॥

अनयैव शुद्धधारणया हतमशुभं यस्य सः । तस्य श्रीकृष्णस्येक्षया कृपाकटाक्षेणैव गता आयुधव्यथा ॥ श्रमा[illegible] यस्य सः । अत एव निवृत्तः सर्वेंद्रियवृत्तीनां विभ्रमो विविधं भ्रमणं यस्मात् सः । जन्यं देहं विसृजन् ॥ ३१ ॥ परमफलरूपां श्रीकृष्णे रतिं प्रार्थयिष्यन् प्रथमं स्वकृतं समर्पयति । इतीति । नानाधर्माद्युपायैर्मतिर्मनोधारणलक्षणा उपकल्पिता समर्पिता का सात्वतानां पुंगवे श्रेष्ठे भगवति । वितृष्णा निःकामा । अवितृष्णेति वा छेदः । अवितृप्तेत्यर्थः । विगतो भूमा महत्त्वं यस्मात् तस्मिन् यमपेक्ष्यान्यत्र महत्त्वं नास्तीत्यर्थः ॥ तदेव परमैश्वर्यमाह । स्वसुखं स्वरूपभूतं परमा

विशुद्धया धारणया हताशुभस्तदीक्षयैवाशु गतायुधव्यथः ॥ निवृत्तसर्वेंद्रियवृत्तिविभ्रमस्तुष्टाव जन्यं विसृजन् जनार्दनं ॥ ३१ ॥
श्रीभीष्म उवाच ॥ इति मतिरुपकल्पिता वितृष्णा भगवति सात्वतपुंगवे विभूम्नि । स्वसुखमुपगते क्वचिद्विहर्तुं प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ ३२ ॥ त्रिभुवनकमनं तमालवर्णं रविकरगौरवरांबरं दधाने । वपुरलककुलावृताननाब्जं वि
स जयसखे रतिरस्तु मेऽनवद्या ॥ ३३ ॥

नंदमुपगते प्राप्तवत्येव क्वचित् विहर्तुं क्रीडितुं प्रकृतिमुपेयुषि स्वीकृतवति न तु स्वरूपतिरोधाने न जीववत् पारतंत्र्यमित्यर्थः ॥ विहर्तुमित्युक्तं प्रपंचयति । यद्यतः प्रकृतेर्भवप्रवाहः सृष्टिपरंपरा भवति ॥ ३२ ॥ इदानीं श्रीमूर्त्तिं वर्णयन् रतिं प्रार्थयते त्रिभुवनकमनं त्रैलोक्ये एकमेव यत् कमनीयं तद्वपुर्दधाने रतिर्मेऽस्तु । तमालवन्नीलो वर्णो यस्य तत् । प्रातःकालीनारवेः करा इव शुभ्रे तत एव गौरे पीते वरे निर्मलेंऽबरे यस्मिन् तत् । अलककुलेन पर्यावृतमाननाब्जं यस्मिन् तत् । विजयसखे पार्थसारथौ अनवद्या अहैतुकी फलाभिसंधिरहिता

टिका ॥ ३३ ॥

भा॰प्र॰
४२

धि मपारूण ४

विजयमखिलमेवानुवर्ण्य पुनू रतिं प्रार्थयते। युधि युद्धे तुरगाणां खुररजःकणगारजन्येन विधूम्राः धूसराश्च ते विष्वंव इतस्ततश्चलंतः कचाः
कुंतला यस्य। तुलितं विकीर्णं श्रमवारि स्वेदबिंदुरूपं तेन भक्त्वा वात्सल्यद्योतकेनालंकृतमास्यं यस्य तास्मिन् श्रीकृष्णे ममात्मा मनोऽस्तु र
मतामित्यर्थः ४। पुनः किंभूते। मदीयैर्निशितैस्तीक्ष्णैः शरैर्विभिद्यमाना त्वग्यस्य। शरैरेव विलसत्कवचं यस्य तास्मिन्। श्रमवारीत्यने
नानुमीयते। घनश्यामो मनश्शरभिन्नदेहो हृततरलमणिवर्षी घनः किमित्युत्प्रेक्ष्यते। अयं विलसत्कवचः घनोपि तरलविद्युत्सच्चयरजोविधू
म्रः तडिच्छकः। अपेच पीतपटच्छन्नः। इति घनसाम्येषलेशः। किंच सपदीति। सेनयोरुभयोर्मध्ये रथं स्थापय मेऽच्युत। यावदेतान्निरीक्षेऽहं यो

युधि तुरगरजोविधूम्रविष्वक्कचलुलितश्रमवार्यलंकृतास्ये। मम निशितशरैर्विभिद्यमानत्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा। ३४॥
सपदि सखिवचो निशम्य मध्ये निजपरयोर्बलयो रथं निवेश्य। स्थितवति परसैनिकायुरक्ष्णा हृतवति पार्थसखे रतिर्ममास्तु।
३५॥ व्यवहितपृतनामुखं निरीक्ष्य स्वजनवधाद्विमुखस्य दोषबुद्ध्या। कुमतिमहरदात्मविद्यया यश्चरणरतिः परमस्य तस्य
मेऽस्तु ३६॥ ॥

द्धुकामानवस्थितानिति। सख्युरर्जुनस्य वचो निशम्य सपदि तत्क्षणमेव बलयोः सैन्ययोर्मध्ये स्थिते पार्थसखे रतिरस्तु। कीदृशे। तत्र स्थित्वा कृतांस
र्वान्दर्शयति। परस्य दुर्योधनस्य सैनिकानामायुरक्ष्णा कालदृष्ट्या हृतवति। अयं द्रोणोऽसौ कर्ण इत्यादि तत्र तत्र दर्शनेन दृष्ट्वैव सर्वेषा
मायुराकृष्यार्जुनस्य जयं कृतवति। न केवलमर्जुनस्य सपत्नायुर्हरणेनैव जयमावहत। किंतु विद्याहरणेनापीत्याह। व्यवहिता
दूरे स्थिता या पृतना तस्या मुखमिव दुःखं निरीक्ष्य अग्रे स्थितान्भीष्मादीन्निरीक्ष्येत्यर्थः। स्वजनवधाद्विमुखस्य निवृत्तस्यार्जुनस्य
दोषबुद्ध्या। एतान्न हन्मीति दोषबुद्ध्या। तदुक्तं गीतासु। एवमुक्त्वार्जुनः संख्ये रथोपस्थ उपाविशत्। विसृज्य सशरं चापं शोकसंविग्नमानस इति।

कुमतिमहहते त्यादि। बुद्धिविद्यया हरत्तस्य चरणे रतिरस्तु ३६ ॥ ॥

४२
पाजेन

ममतु महांतमनुग्रहं कृतवानित्याह। स्वनिगममित्यादि द्वाभ्यां। स्वनिगमं मम शस्त्र एवाहं साहाय्यमात्रं करिष्यामीत्येवंभूतां स्वप्रतिज्ञां हित्वा भीष्मो हि शस्त्रं ग्राहयिष्यामीत्येवंरूपां मत्प्रतिज्ञामृतं सत्यं प्रथालनवतीति थाऽधि अधिकां कर्तुं यो रथस्थः सन्नवप्लुतः सहसैवावतीर्णः। अवप्लुतः सन्नप्ययोऽभ्ययान्मामभिमुखमधावत्। इभं हंतुं हरिः सिंह इव। किंभूतः। धृतं रथचरणं चक्रं येन सः। तदा संरंभेण मातृष्यनाद्य विस्मृतेः सदहस्यसर्वभूतभुवनभारेण प्रतिपदं चलंत्युच्चलन्ती गौर्भूमिर्यस्मात्। तेनैव संरंभेण पथि गतं पतितमुत्तरीयं वस्त्रं यस्य स मुकुंदो मे गतिर्भवत्विति पूर्वेणान्वयः। ३७ ॥ एवं यदाऽभ्ययान्तदास्य मानन्यात आततायिनो भक्तिनो मे शितैस्तीक्ष्णैर्विशिखैर्बाणैर्हतः। अतो विशीर्णदंशो विध्वस्तकवचः। क्षतजेन रुधिरेण परिप्लुतस्यापि [illegible] ःप्रसभं बलाद्वारयंतमर्जुनमप्यतिक्रम्य मद्वधार्थमभिससार अभिजगाम। एवं यो

स्वनिगममपहाय मत्प्रतिज्ञामृतमधिकर्तुमवप्लुतो रथस्थः। धृतरथचरणोऽभ्ययाच्चलद्गुर्हरिरिव हंतुमिभं गतोत्तरीयः ॥ ३७ ॥

शितविशिखहतो विशीर्णदंशः क्षतजपरिप्लुत आततायिनो मे। प्रसभमभिससार मद्वधार्थं स भवतु मे भगवान्गतिर्मुकुंदः ॥ ३८ ॥

विजयरथकुटुंब आत्ततोत्रे धृतहयरश्मिनि तच्छ्रियेक्षणीये। भगवति रतिरस्तु मे मुमूर्षोर्यमिह निरीक्ष्य हता गताः स्वरूपं ॥ ३९ ॥

लोकप्रतीत्या अर्जुनपक्षपातीव लक्षितोऽपि वस्तुतस्तु ममैवानुग्रहं कृतवान् स भगवान् मे गतिर्भवत्वित्यर्थः ॥ ३८ ॥ तदेवं सत्यपि वैरिपक्षत्वे परक्षाव्यग्रेऽकस्मेरति मास्थाने। विजयोऽर्जुनस्तस्य रथ एव कुटुंबोऽस्य रक्षणीयो यस्य तस्मिन्। आत्तं गृहीतं तोत्रं प्रतोदो येन तस्मिन्। धृता हयानां रश्मयः प्रग्रहा येन तस्मिन्। व्रीह्यादिभ्यश्चेत्यत्र नकारांतादपि रश्मिशब्दादिनिः। तच्छ्रिया तया सारथ्यश्रिया ईक्षणीये शोभमाने। मुमूर्षोर्मर्तुमिच्छोः। नन्वन्यापवर्त्तिनि किमिति रतिः। प्राप्येति तत्राह। भगवति अचिंत्यैश्वर्ये तदाह इह युद्धे हताः सर्वे यं निरीक्ष्य स्वरूपं तत्समानं रूपं गताः प्राप्ता इति दिव्यदृष्ट्या पश्यन्नाह ॥ ३९ ॥ ये

स्वदीये २

भा॰प्र॰ न्तात्रधर्म्मेणयुध्यमानानांस्वरूपंप्रापुरित्येतन्नचित्रंयतोमदांधाअपि~~प्रापुरित्येतन्नचित्रंयतोमदांधाअपि~~प्रापुरित्याह।ललितेत्यादि।ललितगतिश्चविलासश्च
४२ रासादिः मंजुगत्यादिभिःआनीप्यैर्वाकल्पितउरुर्ह्मानःपूजायासांताः।अतउत्कटेनमदेनांधाः।अतएवतदेकाविष्टत्वेनतस्यकृतंकर्म्मगोवर्द्ध
नोद्धरणादिकंअनुकृतवत्योगोपवध्वोयस्यप्रकृतिंस्वरूपंअगमन्नगमन्नमकारलोपस्त्वार्षः।किलप्रसिद्धं।तस्मिन्मेमतिरस्त्वितिपूर्वेणैवान्वयः।जग २३
त्पूज्यतामनुस्मरन्नाह।मुनिगणैर्नृपवर्यैश्चसंकुलेव्याप्तेअंतःसदसिसभामध्येयुधिष्ठिरस्यराजसूये।एषांमुनिगणादीनांमीक्षणीयः।अहोर

ललितगतिविलासवल्गुहासप्रणयनिरीक्षणकल्पितोरुमानाः।कृतमनुकृतवत्यउन्मदांधाःप्रकृतिमगन्किलय
स्यगोपवध्वः॥४०॥मुनिगणनृपवर्यसंकुलेऽन्तःसदसियुधिष्ठिरराजसूयएषां।अर्हणमुपपेदईक्षणीयोममदृशि
गोचरएषआविरात्मा॥४२॥ तमिममहमजंशरीरभाजांहृदिहृदिधिष्ठितमात्मकल्पितानां।प्रतिदृशमिवनैकधा
र्कमेकंसमधिगतोऽस्मिविधूतभेदमोहः॥४२॥ ॥

पमहोमहिम्नेत्येवमाश्चर्येणत्रिलोकनीयःसन्नर्हणमग्रपूजामुपपेदेआप।एषजगतामात्मामममदृष्टिगोचरोदृष्टिविषयःसन्नाविःप्रकटोवर्ततीति।अहोमेभा
ग्यमितिभावः।सोहंकृतार्थोऽस्मीत्याह।तमित्यादि।तमिममजंसम्यगधिगतःप्राप्तोस्मि।सम्यक्त्वमाह।विधूतभेदमोहः।तदर्थंभेदस्योपाधिकत्वमाह।आ ४२
त्मकलितानांस्वयंनिर्मितानांशरीरभाजांप्राणिनांहृदिहृदिप्रतिहृदयंधिष्ठितंअकारलोपस्त्वार्षः।नैकधाअधिष्ठानभेदादनेकधाभातमित्यर्थः।अत्रदृष्ट
तः।सर्वप्राणिनांदृशंदृशंप्रतिएकमेवार्कमनेकधाप्रतीतमिवेति॥ ॥ ॥

मनोवाक्दृष्टीनांवृत्तिभिः। परमात्मनिश्रीकृष्णेअंतरेवलीनःश्वासोयस्यसः॥ ४३॥ निःकलेनिरूपाधौसंपद्यमानंमिलितं। आज्ञायज्ञात्वालक्ष्यवयांसीवपक्षिणइ
वतूष्णीमासन्॥ ४४॥ देवैर्मानवैश्चवादिताः। राज्ञांमध्येयेसाधवः अनसूयवः॥ ४५॥ निर्हरणादीनिसंस्कारादीनि। सम्यकूपरेतस्यमुक्तस्यापीत्यर्थः। ४६
पितरंधृतराष्ट्रंतपस्विनींसंतापवतीं॥ ४९॥ पित्राधृतराष्ट्रेणानुज्ञातःसाम्राज्यंचकार। राजायुधिष्ठिरः॥ ५०॥ इतिप्रथमेनवमः॥ दशमेकृतकार्यस्यहास्तिनपुरतोहरेः।

सूतउवाच॥ कृष्णएवंभगवतिमनोवाग्दृष्टिवृत्तिभिः। आत्मन्यात्मानमावेश्यसोऽंतःश्वासउपारमत्॥ ४३॥ संपद्यमानमाज्ञायभी
ष्मंब्रह्मणिनिष्कले। सर्वेबभूवुस्तेतूष्णींवयांसीवदिनात्यये॥ ४४॥ तत्रदुंदुभयोनेदुर्देवमानववादिताः। शशंसुःसाधवोराज्ञां
खात्पेतुःपुष्पवृष्टयः॥ ४५॥ तस्यनिर्हरणादीनिसंपरेतस्यभार्गव। युधिष्ठिरःकारयित्वामुहूर्तंदुःखितोभवत्॥ ४६॥ तुष्टु
वुर्मुनयोहृष्टाः कृष्णंतद्गुह्यनामभिः। ततस्तेकृष्णहृदयाः स्वाश्रमान्प्रययुःपुनः॥ ४७॥ ततोयुधिष्ठिरोगत्वासहकृ
ष्णोगजाह्वयं। पितरंसांत्वयामासगांधारींचतपस्विनीं॥ ४८॥ पित्राचानुमतोराजावासुदेवानुमोदितः। चकारराज्यंधर्मेण
पितृपैतामहंविभुः॥ ४९॥ इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेनवमः॥ हत्वास्वरिक्थस्पृधआततायिनोयुधिष्ठिरो शौनक उ०
धर्मभृतांवरिष्ठः। सहानुजैःप्रत्यवरुद्धभोजनः। कथंप्रवृत्तः। किमकार्षीत्ततः॥ १॥

स्त्रीभिःसंस्तूयमानस्यवर्ण्यतेद्वारकागमः॥ १॥ राज्यंचकारेत्युक्तंतत्रपृच्छतिहत्वेति। स्वस्यरिक्थेधनेस्पर्धंतेस्मयेतेतथा। यद्वास्वरिक्थायस्पृधः। संग्रामायेषांतेअतएव
धनादिहरणादाततायिनः। तान्हत्वाप्रत्यवरुद्धभोजनोवंधुवधदुःखेनसंकुचितभोगः। राज्यलाभेनप्राप्तभोगोवाकथंराज्येप्रवृत्तः। प्रवृत्तोवाततः। किमका
र्षीत्॥ १॥

ला०प्र

४४

कृ४

राज्ये प्रवृत्ते श्रीकृष्णस्य प्रीतिं पर्यालोच्य प्रवृत्त इत्याशयेनोत्तरमाह। वंशमित्यादि। वंशः कुरोः संरोहयित्वा परीक्षिद्द्वारेण संरोहयित्वा अंकुरितं कृत्वा। कथंभूतं वंशदवाग्नि निर्हृतं वंशा एव दवाग्निर्वनं तस्मादुद्भूतः यो धनुर्यो ऽग्निस्तेन निर्हृतं दग्धं। निजराज्ये युधिष्ठिरं निवेश्य हरिः प्रीतमना बभूव ॥ २ ॥ प्रवृत्तौ हेतुं कृष्णोक्तिमकार्षीदित्यस्योत्तरमाह। निशम्येति। प्रवृत्तं यद्विज्ञानं परमेश्वराधीनं जगत्सर्वमित्येवं भूतं तेन विधूतो विभ्रमो ऽहं कर्तेत्येवंभूतो मोहो यस्य सः। अनुजैरनुवर्त्तितः सेवितः सन्। अजितः श्रीकृष्ण एव प्रियो यस्य सः। अजिताश्रय इति वा पाठः। परिधिः समुद्रस्तत्पर्यंतां गां पृथ्वीं पालयामास ॥ ३ ॥ तस्य राज्यमनुवर्णयति। काममिति त्रिभिः। मही सर्व

सूत उवाच ॥ वंशं कुरोर्वंशदवाग्निनिर्हृतं संरोहयित्वा भवभावनो हरिः। निवेशयित्वा निजराज्य ईश्वरो युधिष्ठिरं प्रीतमना बभूव ह ॥ २ ॥
निशम्य भीष्मोक्तमथाच्युतोक्तं प्रवृत्तविज्ञानविधूतविभ्रमः। शशास गामिंद्र इवाजितप्रियः परिध्युपांतामनुजानुवर्त्तितः ॥ ३ ॥ का
मं ववर्ष पर्जन्यः सर्वकामदुघा मही॥ सिषिचुः स्म व्रजान् गावः पयसोधस्वतीर्मुदा ॥ ४ ॥ नद्यः समुद्रा गिरयः सवनस्पतिवीरुधः।
फलंत्योषधयः सर्वाः काममन्वृतु तस्य वै ॥ ५ ॥ नाधयो व्याधयः क्लेशा दैवभूतात्महेतवः। अजातशत्रावभवन् जंतूनां राज्ञि कर्हिचित्
॥ ६ ॥ उषित्वा हास्तिनपुरे मासान् कतिपयान् हरिः। सुहृदां च विशोकाय स्वसुश्च प्रियकाम्यया ॥ ७ ॥ ॥

कामा दोग्ध्री वसुधा। व्रजान् गोष्ठानि। ऊधस्वतीः ऊधस्वत्यः। ऊधः क्षीराश्रयः। स्थूलोधस इत्यर्थः। सिषिचुः अभ्यषिंचन् ॥ ४ ॥ अन्वृतु प्रतिऋतु ॥ ५ ॥ आधयो मनोव्यथाः। व्याधयो रोगाः। क्लेशाः शीतोष्णादिकृताः। दैवं च भूतानि च आत्मा च हेतवो येषां आध्यादीनां ते। जंतूनां नाभवन् ॥ ६ ॥ इदानीं द्वारकागमनं निरूपयितुमाह। उषित्वेति। सुहृदां सुभद्रायाः। भगिन्याः ॥ ७ ॥ ॥ रामायनमः ॥

४४

श्री

तं युधिष्ठिरं ॥ ८ ॥ युयुत्सुर्धृतराष्ट्राद्वैश्यायां जातः । गौतमः कृपः । यमौ नकुलसहदेवौ ॥ ९ ॥ अन्याश्च स्त्रियः । मत्स्यसुता उत्तरा तस्याः पुनर्ग्रहणं गर्भरक्षककृष्णविरहे मोहाधिक्यात् । यद्वा मत्स्यसुता सत्यवती ॥ १० ॥ तेषां कृष्णविरहासहनं कैमुत्यन्यायेनाह । सत्संगादिति द्वाभ्यां । सत्संगान्मुक्तः पुत्रादिविषयो दुःसंगो येन सः । सद्भिः कीर्त्यमानं रोचनं रुचिकरं यस्य यशः । सकृदप्याकर्ण्य सत्संगं त्यक्तुं न शक्नोति । किंच दर्शनादिभिस्तस्मिन् श्रीकृष्णे न्यस्त

आमंत्र्य चाप्यनुज्ञातः परिष्वज्याभिवाद्य तं । आरुरोह रथं कैश्चित्परिष्वक्तोऽभिवादितः ॥ ८ ॥ सुभद्रा द्रौपदी कुंती विराटतनया तथा । गांधारी धृतराष्ट्रश्च युयुत्सुर्गौतमो यमौ ॥ ९ ॥ वृकोदरश्च धौम्यश्च स्त्रियो मत्स्यसुतादयः । न सेहिरे विमुह्यंतो विरहं शार्ङ्गधन्वनः ॥ १० ॥ सत्संगान्मुक्तदुःसंगो हातुं नोत्सहते बुधः । कीर्त्यमानं यशो यस्य सकृदाकर्ण्य रोचनं ॥ ११ ॥ तस्मिन्न्यस्तधियः पार्थाः सहेरन् विरहं कथं । दर्शनस्पर्शसंलापशयनासनभोजनैः ॥ १२ ॥ सर्वे तेऽनिमिषैरक्षैस्तमनुद्रुतचेतसः । वीक्षंतः स्नेहसंबद्धा विचेलुस्तत्र तत्र ह ॥ १३ ॥ न्यरुंधन्नुद्गलद्बाष्पमौत्कंठ्याद्देवकीसुते । निर्यात्यगारान्नोऽभद्रमिति स्याद्बांधवस्त्रियः ॥ १४ ॥ मृदंगशंखभेर्यश्च वीणापणवगोमुखाः । धुंधुर्यानकघंटाद्या नेदुर्दुंदुभयस्तथा ॥ १५ ॥ ॥

न्यस्तारोपिता धीर्यैस्ते पार्थाः कथं विरहं सहेरन् ॥ १२ ॥ अत एवानिमिषैर्नेत्रैस्तमेव वीक्षमाणास्तत्र तत्रार्हणमानयानाद्यर्थं चलंति स्म । यतः स्नेहेन सम्यक्बद्धाः । अत एव तमनुद्रुतानि अनुगतानि चेतांसि येषां ॥ १३ ॥ आगारान्निर्याति निर्गच्छति स्त्रियो औत्कंठ्याद्देवतो उद्गलत् प्रवृद्धबाष्पमश्रु न्यरुंधन् । नेत्रेष्वेव स्तंभितवत्यः । तत्र हेतुः । अभद्रं नो स्यात् अमंगलं माभूदित्येतदर्थं ॥ १४ ॥ मृदंगादयो दशवाद्यभेदाः क्षणमेकमेवावाद्यंत ॥ १५ ॥

काह्लेदिदृक्षया प्रासादशिखरारूढाः एकविद्योपजीविनः कारवस्तेषां नार्यः कुसुमैर्ववृषुः। प्रेमव्रीडास्मितं प्रन्तपूर्वकमीक्षणं यासां ताः॥ १६॥ गुडा
का निद्रा तस्या ईशो जितनिद्रोऽर्जुनः॥ १७॥ व्यजने चामरे जगृहतुः। मधुपतिः श्रीकृष्णः॥ १८॥ सत्याः कृष्णोचितास्तासाम व्यभिचारात्। किंतु नानुरूपाश्च
नानुरूपाश्च इति निर्गुणस्य परमानंदस्य सुखी भवेत्यादयो नानुरूपाः। गुणात्मनो मानुष्यनाट्यावतारे तु रूपाश्च इत्यर्थः॥ १९॥ सर्वासां श्रुतीनां
मनोहरः। उपनिषदोऽपि मूर्तिमत्यः संजल्पमभिनंदंतीत्यर्थः॥ २०॥ तत्र तेजः सौंदर्याद्यतिरेकेन विस्मिताभ्यः सखीभ्योऽन्याः स्त्रियः कथयंति

प्रासादशिखरारूढाः कुरुनार्यो दिदृक्षया। ववृषुः कुसुमैः कृष्णं प्रेमव्रीडास्मितेक्षणाः॥ १६॥ सितातपत्रं जग्राह मुक्ता
दामविभूषितं। रत्नदंडं गुडाकेशः प्रियः प्रियतमस्य ह॥ १७॥ उद्धवः सात्यकिश्चैव व्यजने परमाद्भुते। विकीर्यमाणः कुसुमै
रेजे मधुपतिः पथि॥ १८॥ अश्रूयंताशिषः सत्यास्तत्र तत्र द्विजोदिताः। नानुरूपानुरूपाश्च निर्गुणस्य गुणात्मनः॥ १९॥ अ
न्योन्यमासीत्संजल्प उत्तमश्लोकचेतसां। कौरवेंद्रपुरस्त्रीणां सर्वश्रुतिमनोहरः॥ २०॥ स्त्रिय ऊचुः॥ स वै किलायं पुरुषः
पुरातनो य एक आसीदविशेष आत्मनि। अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु॥ २१॥

नात्र विस्मयः कार्यः साक्षादीश्वरत्वादस्येति। स वै इति चतुर्भिः। वै स्मरणे। किलेति प्रसिद्धौ प्रमाणद्योतनाय। एक एवाद्वितीयः पुरुषः आसीत् स पुरातन ए
वाद्यः श्रीकृष्णः। कुत्रासीत् अविशेषे आत्मनि। निःप्रपंचे निजरूपे। कदा अग्रे गुणेभ्यः। गुणक्षोभात्पूर्वं। तथा निशि प्रलये च। तस्य लक्षणं जग
तामात्मनि जीवे निमीलितात्मन्निति लुप्तसमस्तप्रपंचं जातावेकवचनं ईश्वरे लीनरूपेषु जीवेषु सत्स्वित्यर्थः। ननु जीवानां ब्रह्मत्वात्कथं लयस्त
त्राह। सुप्तासु शक्तिषु सतीषु जीवोपाधिभूतसत्त्वादिशक्तिलय एव जीवलय इत्यर्थः॥ २१॥

तदेवंसृष्टेरादौप्रलयानंतरंचेतिःप्रपंचावस्थानमुक्त्वासृष्टिप्रलययोर्मध्येसप्र पंचावस्थानमाहः।सएवेत्यादि।सएवभ्रप्रस्तुतस्वरूप
स्थितिरेवप्रकृतिमनुससारअधिष्ठितवान्।भूयःपुनरितिसृष्टिप्रवाहस्यानादित्वात्।कीदृशीं।निजवीर्यचोदितांस्वकालशक्तिप्रेरितांस्वांशभू
तानांजीवानांमायांमोहनीं।अतएवभगवत्प्रेरितांसतींसिसृक्षतींस्रष्टुमिच्छंतीं।मुक्तिमर्थमनुससार।अनामरूपेआत्मनि~~रूपेआत्मविजि~~
वेरूपनामनीविधित्समानोविधातुमिच्छन्उपाधिसृष्ट्याजीवानांभोगायेत्यर्थः।कर्माणिजविधापतुंवेदान्कृतवानित्याहुः।शास्त्रकृदि पि ४

सएवभूयोनिजवीर्यचोदितांस्ववीजमायांप्रकृतिंसिसृक्षतीं।अनामरूपात्मनिरूपनामनीविधित्समानोऽनुससा
रशास्त्रकृत्॥२२॥सवाअयंयत्पदमत्रसूरयोजितेंद्रियानिर्जितमातरिश्वनः।पश्यंतिभक्त्युत्कलितामलात्मनान
न्वेषसत्वंपरिमार्ष्टुमर्हति॥२३॥ ॥

ति॥२२॥अस्यदर्शनमतिदुर्लभमस्माभिर्लब्धमित्याहुः।सवैअयंयस्यपदंस्वरूपंअंघ्रिंवानिर्जितमातरिश्वाप्राणायैः।इत्थंमार्गंतिसू
रयएवपश्यंति।केन।भक्त्याउत्कलितउत्कंठितोऽमलोयआत्माबुद्धिस्तेनादृश्यतेत्वग्र्ययाबुद्ध्यातिश्रुतेः।बुद्धिवैमल्यस्याप्ययमे
वहेतुरित्याहुः।ननुहेसखिएषएवसत्वंबुद्धिंपरिमार्ष्टुंसम्यक्शोधयितुमर्हतिनतुयोगादयइत्यर्थः।यद्वानन्वहोएषसत्वंज्ञानं
परिमार्ष्टुंनाशयितुंदूरगमनेनप्रत्यक्षीभवितुंनार्हति।किंत्वनेनसहैवगंतव्यमित्यर्थः॥२३॥ ७॥

भा॰प्र॰ श्रुणएवश्लोकत्तामाहः हेसखियोवेदेषुगुह्येषुरहस्यागमेषु च गुह्यस्यवादिभिर्निरूपकैः अनुगीतसत्कथः अन्वतुगीतासत्याःकथाय
४६ स्यसएवायं।ध्यानप्रकारमाहः यएकईशइत्यादि २४ ॥ एवंभूतस्यनानावतारेकारणमाहः यदाहीति।तमोव्याप्ताधीर्येषांते
नृपाअधर्मेणजीवंतिकेवलंप्राणानुपुष्णंति।तत्रतदाएषएवभवायस्थितयेसत्वताविशुद्धसत्वेनरूपाणिदधत्भगादीनिधत्तेप्रकट

सवाअयंसख्यनुगीतसत्कथोवेदेषुगुह्येषुचगुह्यवादिभिः।यएकईशोजगदात्मलीलयासृजत्यवत्यत्तिनतत्रसज्ज
ते २४ ॥ यदाह्यधर्मेणतमोधियोनृपाजीवंतितत्रैषहिसत्वताकिल।धत्तेभगंसत्यमृतंदयांयशोभवायरूपाणि
दधद्युगेयुगे २५ ॥ अहोअलंश्लाघ्यतमंयदोःकुलंअहोअलंपुण्यतमंमधोर्वनं।यदेषपुंसामृषभःश्रियःप
तिःस्वजन्मनाचंक्रमणेनचांचति २६ ॥ ॥

यति।युगेयुगेतत्तदवसरे।भगंऐश्वर्यं।सत्यंसत्यप्रतिज्ञत्वं।ऋतंयथार्थोपदेशकत्वं।दयांभक्तकृपां।यशःअद्भुतकर्मत्वं। २५ ॥ विशेषतः
श्रीकृष्णावतारंसौभाग्यंवर्णयंति।अहोइतिपंचभिः।यद्यस्मात्एषपुरुषोत्तमः श्रियःपतिः प्रियःश्रियः इतिवापाठः स्वजन्मना ४६
यदोःकुलंअंचतिपूजयतिसत्करोतिअतःश्लाघ्यतमंतत्।चंक्रमणेनचमधोर्वनंमथुरांसत्करोतिअतस्तत्पुण्यतममिति।तम
वर्धस्याप्यत्यंतातिशयेअलमिति।तत्राप्याश्चर्यमहोइत्युक्तं २६ ॥ ॥

स्य

अहोवतइत्याश्चर्यंकिंतत्कुशस्थलीद्वारकास्वर्गतत्कष्टइतितद्यशसस्तिरस्करीपरिभवकर्त्रीभुवश्चपुण्ययशस्कर्त्रीभवतीतियद्यतोयत्रत्याः
सर्वाःप्रजाःस्वानुग्रहेणइषितंप्रेषितं [illegible] यत्तत्स्मितंतेनयुक्तोवलोकोयस्यतंयद्वाअनुग्रहार्थमिषितंइष्टंस्वस्यात्मनःपतिंश्रीकृष्णंनतुपित्रा
दिवदेहमात्रपतिंनित्यंपश्यंतिस्म।उषितमितिपाठेस्वानुग्रहार्थमुषितंकृतनिवासंनैतत्स्वर्गेस्तीत्यर्थः॥२७ हेसखिअस्यगृहीतपाणिभिःपत्नी
भिर्व्रतादिनाईश्वरोयमेवनूनंजन्मांतरेषुसमर्चितः।यावज्जस्त्रियोऽस्याधरामृतंमुहुःपिबंतियदिति।यस्मिन्नधरामृतेआशयाश्चित्तंयासां

अहोवतस्वर्यशसस्तिरस्करीकुशस्थलीपुण्ययशस्करीभुवः।पश्यंतिनित्यंयदनुग्रहेषितंस्मितावलोकंस्वपतिंस्मयत्प्रजाः॥२७॥
नूनंव्रतस्नानहुतादिनेश्वरःसमर्चितोह्यस्यगृहीतपाणिभिः।पिबंतियाःसख्यधरामृतंमुहुर्व्रजस्त्रियःसंमुमुहुर्यदाशयाः
॥२८॥ यावीर्यशुल्केनहृताःस्वयंवरेप्रमथ्यचैद्यप्रमुखान्हिशुष्मिणः।प्रद्युम्नशांबांबसुतादयोऽपरायाश्चाहृताभौमवधेस
हस्रशः॥२९॥ एताःपरंस्त्रीत्वमपास्तपेशलंनिरस्तशौचंबतसाधुकुर्वते।यासांगृहात्पुष्करलोचनःपतिर्नजात्वपैत्याहृतिभिर्हृ
दिस्पृशन्॥३०॥

ताःसंमोहंप्रापुःइतिमनोहरत्वमुक्तं॥२८॥ एतत्प्रपंचोयाइतिद्वाभ्यांवीर्यंप्रभावएवशुल्कंमूल्यंतेनशुष्मिणोबलिष्ठान्प्रद्युम्नश्चशांबा
म्बश्चसुतायासांरुक्मिणीजांबवतीनाग्नजितीनांताआदौयासांसत्यभामादीनांताः।याश्चापराश्चस्पष्टोकस्योत्तरश्लोकेनान्वयः
॥२९॥ एताःस्त्रीत्वमेवपरंकेवलंसाधुशोभनंकुर्वंतिअपास्तंपेशलंभद्रंस्वातंत्र्यंयस्मात्तत्।निरस्तंशौचंशुचित्वंयस्मात्तत्।तथाभू
तमपियासांगृहात्पुष्करलोचनःपतिर्जातुकदाचिदपिनापैतिननिर्गच्छति।आहृतिभिर्व्याहारैः।यद्वापारिजातादिप्रियवस्त्वाहृ

श्रीभस्य ३

हृदिस्पृशन्नानंदयत ॥३०॥

एवंविधाः चित्रा गिरः। सस्मितेन ईषद्धासेन नंदन् स हरिर्द्वारकां ययौ ॥ ३१ ॥ मधुद्विषोपि गोपीथाय रक्षणाय स्नेहात्परेभ्यः शंकितः सन् प्रायुंक्त हस्त्य
श्वरथपादातसेनांगं स्याच्चतुर्विधामित्येवं चतुरंगिणीं पृतनां सेनां ॥ ३२ ॥ पांडोः कुरुवंशत्वात्पांडवा अपि कौरवा एव तान्। प्रियैः उद्धवादिभिः स
ह। ॥ ३३ ॥ कुरुक्षेत्रं कुरुदेशांतर्गतमेव। क्रमोऽत्र न विवक्षितः ॥ ३४ ॥ मरुः निरुदको देशः धन्वोऽल्पोदकः। आनर्तः स्वो द्वारकादेशः। सवि

एवंविधा गदंतीनां स गिरः पुरयोषितां। निरीक्षणेनाभिनंदन् सस्मितेन ययौ हरिः ॥ ३१ ॥ अजातशत्रुः पृतनां गोपीथाय मधुद्विषः। प
रेभ्यः शंकितः स्नेहात्प्रायुंक्त चतुरंगिणीं ॥ ३२ ॥ अथ दूरागतान् शौरिः कौरवान् विरहातुरान्। संन्निवर्त्य दृढं स्निग्धान् प्राया
त्स्वनगरं प्रियैः ॥ ३३ ॥ कुरुजांगलपांचालान् शूरसेनान्सयामुनान्। ब्रह्मावर्तं कुरुक्षेत्रं मत्स्यान्सारस्वतानथ ॥ ३४ ॥ मरुधन्वम
तिक्रम्य सौवीराभीरयोः परान्। आनर्तान् भार्गवोपागाच्छ्रांतवाहो मनाग्विभुः ॥ ३५ ॥ तत्र तत्र ह तत्रत्यैर्हरिः प्रत्युद्यतार्हणः।
सायं भेजे दिशं पश्चाद्गविष्ठो गां गतस्तदा ॥ ॥ इति श्री भागवते महापुराणे प्रथमस्कंधे दशमोध्यायः ॥ ॥

उपागात् प्राप्तः। हे भार्गव। मनाक् ईषत् श्रांता वाहा यस्य सः ॥ ३५ ॥ स तत्र तत्र देशे तत्रत्यैर्जनैः प्रत्युद्यतानि निवेदितानि अर्हणानि उपायनानि यस्मै
सः। सायं अपराह्णे पश्चाद्दिशं भेजे प्राप्तो तदा च गविष्ठः स्वर्गस्थः सूर्यो गामुदकं गतः प्रविष्टोऽस्तंगत इत्यर्थः। अद्भ्य एव प्रातरुदेत्यपः
सायं प्रविशतीति श्रुतेः। यद्वा तदा सायंकाले जाते रथादवतीर्य गविष्ठो भूमौ स्थितः स्नातो गां जलाशयं गतः। सन् पश्चाद्दिशं संध्यां
भेजे उपासितवानित्यर्थः ॥ ॥ इति श्री प्रथमे दशमः ॥ ३६ ॥ ॥

४७

रू २

आनर्त्तैःस्तूयमानस्यपुरीमाविश्यबंधुभिः॥एकादशेरतिःसम्यग्यादवेंद्रस्यवर्ण्यते॥ १ तत्सर्वैरुच्चलत्पौरमुदंपध्वजतोरणं॥तल्लस
द्रत्नदीपालिभिःपुरंप्रभुराविशत् ॥२॥ स्वृद्धान्सुसमृद्धान्दरवरंपांचजन्यंशंखंदध्मौवादितवान्॥दरः॥शंखोदाध्मायमानः॥देध्मीय
मानइतिवापाठः॥अतिशयेनभगवतापूर्यमाणः॥उच्चकाशेशुशुभे॥धवलमुदरंयस्यसः॥उरुक्रमाधररागेणशोणिमायस्याकर
कंजयोःसंपुटेस्थितः॥कइवरक्ताकमलखंडेउच्चशब्दः॥कलहंसोराजहंसइवजगतोयद्भयंतस्यभयावहं॥प्रत्युद्ययुः॥प्रत्युज्ज

सूतउवाच ॥ आनर्त्तान्सउपव्रज्यस्वृद्धान्जनपदान्स्वकान्॥दध्मौदरवरंतेषांविषादंशमयन्निव ॥१॥ सउच्चकाशेधवलोद
रोदरोप्युरुक्रमस्याधरशोणशोणिमा॥दाध्मायमानःकरकंजसंपुटेयथाब्जखंडेकलहंसउत्स्वनः॥ २ ॥ तमुपश्रुत्यनिन
दंजगद्भयभयावहं॥प्रत्युद्ययुःप्रजाःसर्वाभर्तृदर्शनलालसाः॥ ३ ॥ तत्रोपनीतबलयोरवेर्दीपमिवादृताः॥आत्मारामंपूर्णका
मंनिजलाभेननित्यदा ॥४॥ प्रीत्युत्फुल्लमुखाःप्रोचुर्हर्षगद्गदयागिरा॥पितरंसर्वसुहृदमवितारमिवार्भकाः॥५ ॥ नताःस्मते
नाथसदांघ्रिपंकजंविरिंचिवैरिंच्यसुरेंद्रवंदितं॥परायणंक्षेममिहेच्छतांपरंनयत्रकालःप्रभवेत्परःप्रभुः॥ ६ ॥ भवाय
नस्त्वंभवविश्वभावनत्वमेवमाताथसुहृत्पतिःपिता॥त्वंसद्गुरुर्नःपरमंचदैवतंयस्यानुवृत्त्याकृतिनोबभूविम ॥७॥ ॥

ग्मुः॥भर्तृदर्शनेलालसाऔत्सुक्यंयासांताः॥३॥तत्रतस्मिन्नभ्रीकासेउपनीताःसमर्पिताबलयउपायनानियाभिः॥निरपेक्षेऽपितस्मिन्ना[illegible]रेणसमर्पणेदृ
ष्टांतः॥रवेर्दीपमिवेति॥प्रोचुरित्युत्तरेणान्वयः॥सुहृत्वेनैवावितारंनतुकामेन॥अत्रहेतुः॥आत्मारामं॥तत्रहेतुः॥पूर्णकामंपरमानंदनिजस्वरूपम ६
लाभेनैव ५ विरिंचिर्ब्रह्मावैरिंच्याःसनकादयःसुरेंद्रस्तैःवंदितं॥इहसंसारेपरंक्षेममिच्छतांपरायणं॥कुतःपरेषां ब्रह्मादीनांप्रभुरपिकालोय
त्रक्षेमेप्रभुर्नभवेत् ॥६॥ अतोभवायनोऽस्माकंत्वंभवहेविश्वभावन॥कृतिनः॥कृतार्थाबभूविमजातावयं॥यस्यतवानुवृत्त्या ॥७॥

पितरमर्भकाइवसर्वसुहृदवितारं

भा॰प्र॰
४८

क्तार्थत्वमेवाहुः। अहो भवता वयं सनाथाः स्मः। यद्यस्मात्त्वद्रूपं पश्येम पश्यामः। त्रैविष्टपानामपि दूरदर्शनं यस्य देवेन्द्रादीनामपि
दुर्लभमित्यर्थः। प्रेमस्मितं तद्युक्तं स्निग्धनिरीक्षणं यस्मिन् तदाननं यस्मिंस्तद्रूपं। सर्वं सर्वेषु वांगेषु सौभगं यस्मिन्॥ ८ ॥ अत्र लेकाङ्ग
वसकरणमाहुः। यर्हीति। यर्हि यदा भो अंबुजाक्ष। नो भवानिति पाठे नः इत्यनादरे षष्ठी अस्माननादृत्य अपससार अपहाय जगाम कुरू

अहो सनाथा भवता स्म यद्वयं त्रैविष्टपानामपि दूरदर्शनं प्रेमस्मितस्निग्धनिरीक्षणाननं पश्येम रूपं तव सर्वसौभगं ॥ ८ ॥
यर्ह्यंबुजाक्षापससार भो भवान्कुरून्मधून्वाथ सुहृद्दिदृक्षया। तत्राब्दकोटिप्रतिमः क्षणो भवेद्रविं विनाक्ष्णोरिव नस्त्व
वाच्युत ॥ ९ ॥ इति चोदीरिता वाचः प्रजानां भक्तवत्सलः। शृण्वानोऽनुग्रहं दृष्ट्या वितन्वन्प्राविशत्पुरीं ॥ १० ॥ मधुभोजदशा
र्हार्हकुकुरांधकवृष्णिभिः। आत्मतुल्यबलैर्गुप्तां नागैर्भगवतीमिव ॥ ११ ॥ सर्वर्तुसर्वविभवपुण्यवृक्षलताश्रमैः। उ
द्यानोपवनारामैर्वृतपद्माकरश्रियं ॥ १२ ॥

न् हस्तिनापुरं मधून्मथुरां वा। तत्र तदा रविं विना अक्ष्णोर्यथा एवं त्वां विना नः त्वदीयानामस्माकमपीत्यर्थः॥ ९ ॥ इति चेति एवंविधा अनु
क्रोशोद्गारिता वाचः शृण्वन्दृष्ट्या सामाभिलाषमवलोकदर्शनेनानुग्रहं कुर्वन्पुरीं प्रविवेश॥ ११ ॥ द्वारकां वर्णयति मधुभोजेत्यादिपंचभिः। आत्मतुल्य
बलैर्मधुभोजादिभिर्गुप्तां रक्षितां॥ [illegible] ॥ नागैर्भगवतीमिवा॥ सर्वेष्वृतुषु सर्वविभवं पुष्पादिसंपद्येषां ते पुण्यवृक्षा वटादयः। लता
श्रमा लतामंडपाश्रयेषु तैरुद्यानादिभिर्वृता ये पद्माकराः सरांसि तैः श्रीः शोभा यस्यास्तां। उद्यानं फलप्रधानं उपवनं पुष्पप्रधानं। आ

रामाः क्रीडावनं ॥ १२ ॥

४८

॥१२॥

३ फलादिभिरुप्तां अवकीर्णां ॥१४॥

गोपुरं पुरद्वारं द्वारं गृहद्वारं तत्तन्मार्गेषु कृतानि कौतुकेन उत्सवेन तोरणानि यस्यां गरुडादिचिह्नांकिता ध्वजाः। जयप्रदयंत्रांकिताः पताकाः। चि
त्राणि ध्वजपताकानामग्रैरंतः। प्रतिहित आतपो यस्यां सा तां ॥१३॥ संमार्जितानि निःसारितरजकानि महामार्गादीनि यस्यां। महामार्गा राजमा
र्गाः। रथ्या इतरमार्गाः। आपणकाः। पण्यवीथ्यः। चत्वराणि अंगनानि। गंधजलैः सिक्तां· धूपदीपकैर्बलिभिः। पूर्णकुंभैश्चालंकृतां· दध्यक्षत

गोपुरद्वारमार्गेषु कृतकौतुकतोरणां। चित्रध्वजपताकाग्रैरंतः। प्रतिहतातपां ॥१३॥ संमार्जितमहामार्गरथ्यापणकचत्वरां। सिक्तां गंधजलैरु
प्तां फलपुष्पाक्षतांकुरैः ॥१४॥ द्वारि द्वारि गृहाणां च दध्यक्षतफलेक्षुभिः। अलंकृतां पूर्णकुंभैर्बलिभिर्धूपदीपकैः ॥१५॥ निशम्य प्रेष्ठमायां
तं वसुदेवो महामनाः। अक्रूरश्चोग्रसेनश्च रामश्चाद्भुतविक्रमः। ॥१६॥ प्रद्युम्नश्चारुदेष्णश्च शांबो जांबवतीसुतः। प्रहर्षवेगोच्छ्वसित
शयनासनभोजनाः। ॥१७॥ वारणेंद्रं पुरस्कृत्य ब्राह्मणैः ससुमंगलैः शंखतूर्यनिनादेन ब्रह्मघोषेण चादृताः ॥१८॥ प्रत्युज्जग्मू रथैर्हृष्टाः
प्रणयागतसाध्वसाः। वारमुख्याश्च शतशो यानैस्तद्दर्शनोत्सुकाः। ॥१९॥ लसत्कुंडलनिर्भातकपोलवदनश्रियः। ॥ ॥

फलेक्षुभिः। द्वारि द्वारि गृहाणां चाग्रमवकीर्णे ॥१४॥ प्रेष्ठमायांतं निशम्य श्रुत्वा वसुदेवादयः। प्रत्युज्जग्मुरिति चतुर्थेनान्वयः। ॥१५॥ प्रहर्षवेगेन उच्छ्व
सितानि शयनादीनि यैः। श्वसनं तु तगतौ ॥१७॥ वारणेंद्रं मंगलार्थं पुरतः। कृत्वा। ससुमंगलैः सुमंगलसहितैः पुष्पादियुक्तपाणिभिः। ब्रह्म
घोषो मंत्रपाठः। ॥१८॥ प्रणयेन स्नेहेन आगतं साध्वसं संभ्रमो येषां। वारमुख्याश्च प्रत्युज्जग्मुः। लसत्कुंडलैर्निर्भातानि यानि कपो
लानि तैर्वदनेषु श्रीर्यासां ताः। वारमुख्या नर्तक्यो वेश्याः ॥ संमुखं गताः ॥२०॥

उल्लंघितानि २

नटा नवरसाभिनयचतुराः । तालाद्यनुसारेण नृत्यंतो नर्तकाः । गंधर्वा गायकाः । सूताः पौराणिकाः प्रोक्ता मागधा वंशशंसकाः । वंदिनस्त्वमलप्रज्ञाः प्र
स्तावसदृशोक्तयः । ते सर्वे गायंति चेति चकारस्यान्वयः । अद्भुतानि चेति चकाराद्दृष्टिं चेत्यन्वयः ॥२०॥ यथाविधि यैः सह यथोचितं तैस्तथा समाग
म्य कृत्वा सर्वेषां मानं कृतवानित्यर्थः ॥२१॥ तदाह प्रह्वेति । प्रह्वत्वं शिरसा नतिः । अभिवादनं वाचा नतिः । आश्वास्य अल्पं दत्त्वा श्वपाकानभिव्याप
वरैश्चाभीष्टदानैश्च मानं कृतवान् ॥२२॥ अन्यैश्च वंदिभिश्च ॥ २३ तस्मिन्क्षणे महानुत्सवो यासां ताः ॥२४॥ यद्यस्मात् नित्यं सदा अच्युतं निरीक्षमा

कौ२

नटनर्तकगंधर्वाः सूतमागधवंदिनः । गायंति चोत्तमश्लोकचरितान्यद्भुतानि च २०॥ भगवांस्तत्र बंधूनां पौराणामनुवर्तिनां । यथावि
धुपसंगम्य सर्वेषां मानमादधे ॥२१॥ प्रह्वाभिवादनाश्लेषकरस्पर्शस्मितेक्षणैः । आश्वास्य चाश्वपाकेभ्यो वरैश्चाभिमतैर्विभुः ॥
२२॥ स्वयं च गुरुभिर्विप्रैः सदारैः स्थविरैरपि । आशीर्भिर्युज्यमानोन्यैर्वंदिभिश्चाविशत्पुरीं ॥२३॥ राजमार्गं गते कृष्णे द्वारकायाः कुल
स्त्रियः । हर्म्याण्यारुरुहुर्विप्र तदीक्षणमहोत्सवाः ॥२४॥ नित्यं निरीक्षमाणानां यदपि द्वारकौकसां । न वितृप्यंति हि दृशः श्रियो धा
मांगमच्युतं ॥२५॥ श्रियो निवासो यस्योरः पानपात्रं मुखं दृशां । बाहवो लोकपालानां सारंगाणां पदांबुजं ॥२६॥ ॥

णानामपि दृशो नैव तृप्यंति अत आरुरुहुः कथंभूतं श्रीकृष्णं श्रियः शोभाया धाम स्थानमंगं यस्य तं ॥२५॥ एतदेवाभिनयेनाह । श्रिय इति । श्रियो लक्ष्म्या य
स्योर एव वक्षो निवासः । यस्य मुखं सर्वप्राणिनां दृशां सौंदर्यामृतपानाय पात्रं । यस्य बाहवो लोकपालानां निवासः । सारं गायंतीति सारंगा भक्तास्ते
षां यस्य पदांबुजं निवासस्तं निरीक्षमाणानां दृशः इति पूर्वेणान्वयः ॥२६॥ श्रीरामचंद्राय नमः ॥ ॥

स्कं १

६२

सितैरातपत्रव्यजनैरुपस्कृतो मंडितः। अर्कोडुपोन छत्रसहितश्चंद्रश्चापमिंद्रधनुश्च वैद्युतं विद्युत्तेजः तैः। अर्कोऽत्र छत्रस्योपमानं नक्ष
त्राणि पुष्पवृष्टेश्चंद्रः परिभ्रमकृतमंडलाकारयोश्चामरव्यजनयोः। चापं वनमालायाः। विद्युत्तेजः पिशंगवाससः। अभूतोपमेयं।
यदि घनस्योपरि सूर्यबिंबं मूलपतश्चंद्रो सर्वतो नक्षत्राणि मध्ये तन्मिलितं चापं दृढं स्थिरं विद्युत्तेजो यदि भवेत्तर्हि स घनो यथा
भाति तथा हरिर्विभातीत्यर्थः॥२७ देवकीप्रमुखाः सप्त ववंद इति मातृसौहृदौदार्यविशेषज्ञापनार्थमुक्तं। अष्टादशापि वसुदेवस्य

सितातपत्रव्यजनैरुपस्कृतः प्रसूनवर्षैरभिवर्षितः पथि। पिशंगवासा वनमालया बभौ घनो यथाऽर्कोडुपचापवैद्युतैः
॥२७॥ प्रविष्टस्तु गृहं पित्रोः परिष्वक्तः स्वमातृभिः। ववंदे शिरसा सप्त देवकीप्रमुखा मुदा॥२८॥ ताः पुत्रमंकमारोप्य
स्नेहस्नुतपयोधराः। हर्षविह्वलितात्मानः सिषिचुर्नेत्रजैर्जलैः॥२९॥ अथाविशत्स्वभवनं सर्वकाममनुत्तमं।
प्रासादा यत्र पत्नीनां सहस्राणि च षोडश॥३०॥ पत्न्यः पतिं प्रोष्य गृहानुपागतं विलोक्य संजातमनोमहोत्सवाः। उत्तस्थु
रारात्सहसासनाशयात्साकं व्रतैर्व्रीडितलोचनाननाः॥३१॥ ॥

भार्या मातृतुल्यत्वान्नमस्कृता एव॥२८॥२९॥ सहस्राणि च षोडशेति चकारादष्टोत्तरशताधिकानीति ज्ञेयं॥३०॥ प्रोष्य देशांतरे उषित्वा आराद्दू
रादेव विलोक्य संजातो मनसि महोत्सवो यासां ताः। आसनादाशयाच्च आसनाद्देहत उत्तस्थुः। आशयोऽन्तःकरणं तस्मादप्यात्मनोत्तस्थुः। श्री
कृष्णेनात्मनः संश्लेषे अंतःकरणमवधानमपि नासहंतेत्यर्थः। व्रीडितानि च लोचनानि आननानि च यासां। अपांगैरेव वीक्षणात् व्रीडित
लोचनाः। अवनतमुखत्वात् व्रीडिताननाः। साकं व्रतैरिति। हास्यक्रीडावर्जनादिनियमादपि ताभ्य उत्तस्थुरित्यर्थः। धृतव्रता एवोत्तस्थु
रिति बाह्यव्रतानि च यमादीनि याज्ञवल्क्येनोक्तानि। क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनं। हास्यं परगृहे यानं त्यजेत्प्रोषितभर्तृका इति॥३१॥

कैवस्प कैठ स्वयंभ्रा १

आयांतंपतिंदर्शनात्पूर्वमात्मनाबुद्ध्यापरिरेभिरेततोदृष्टिभिस्ततःसमीपमागतमात्मजैःपुत्रैर्गृहीतमालिंगितं[illegible]त्यइव[illegible]सालिरालिंगितइ
त्यर्थः।अत्रहेतुः।दुरंतभावागंभीराभिप्रायाः।तदातासांनेत्रयोर्निरुद्धमप्यंबुबाष्पंवैक्लव्यात्[illegible]आस्रवत्ईषत्सुस्राव।अतएवधैर्यहान्या
विलज्जतीनां।हेभृगुवर्यविप्रश्रेष्ठइति।।३२।।पार्श्वगतःसमीपस्थः।तत्रापिरहोगतएकांतेप्रवर्तितेस्म।पदेपदेप्रतिक्षणंनवंनवमेवा।अत्र
वै

तमात्मजैर्दृष्टिभिरंतरात्मनादुरंतभावाःपरिरेभिरेपतिं।निरुद्धमप्यास्रवदंबुनेत्रयोर्विलज्जतीनांभृगुवर्यवैक्लवात्।।३२।।यद्यप्य
सौपार्श्वगतोरहोगतस्तथापितस्यांघ्रियुगंनवंनवं।पदेपदेकाविरमेततत्पदाच्चलापियच्छ्रीर्नजहातिकर्हिचित्।।३३।।एवंनृपाणां
क्षितिभारजन्मनामक्षौहिणीभिःपरिवृत्ततेजसां।विधायवैरंश्वसनोयथाऽनलंमिथोवधेनोपरतोनिरायुधः।।३४।।सएषन
रलोकेस्मिन्नवतीर्णःस्वमायया।रेमेस्त्रीरत्नकूटस्थोभगवान्प्राकृतोयथा।।३५।। ।।

कैमुत्यन्यायः।काविरमेतेति।चलाचंचलस्वभावापि।।३३।।उक्तंश्रीकृष्णचरितंसंक्षिप्याह।एवमितिद्वाभ्यां।क्षितेर्भारायजन्मयेषां
।अक्षौहिणीभिःकृत्वापरिवृत्तंसर्वतःप्रसृतंतेजःप्रभावोयेषां।श्वसनोवायुर्वेणूनांअन्योन्यसंघर्षेणानलंविधाययथामिथोदा
हेनयथोपशाम्यतितद्वत्।।३४।।स्त्रीरत्नकूटस्थःउत्तमस्त्रीकदंबस्थः।।३५।। ।।रामपनम८।। ।।

१न पी॰

नन्वेवंस्त्रीसंगात्संसारित्वप्रतीतेः॰कथंभगवान्नेतीदृशइत्युच्यतेतत्राह॥उद्दामेति॥उद्दामोगंभीरोयोभावोभिप्रायस्तस्यपिशुनःसूचकोमलोवल्गु
सुंदरोहासोव्रीडावलोकश्चताभ्यांनिहतःअमदनःश्रीमहादेवोपिसंमुह्यलज्जयाचापंपिनाकंअजहात्॥एवंभूतावा॰याःस्त्रियइत्येतावहिर्विक्षि
तंह्विनभगवतोमोहनीरूपेणमहेशोपिमोहितएवएताश्चतादृग्विलासमाश्रिताइति॥तथोक्तं॥ताःकुहकैःकपटैर्विभ्रमैर्यस्येंद्रियंमनोविमथि
तुंनशेकुः॥३६॥ तंस्त्रीकृतसंभ्रमंप्राकृतोलोकआत्मौपम्येनस्वसादृश्येनतुसंगिनंमनुजंमन्यते॥अत्रहेतुः॰व्यापृण्वानंव्याप्रियमाणं॥यतोयमबुधोः
तत्वज्ञः॥३७॥ कुतइत्यपेक्षायामैश्वर्यलक्षणमाह॥एतदिति॥ईशस्येशनमैश्वर्यनामैतदेव॥किंतत्॥प्रकृतिस्थोऽपितस्यागुणैःसुखदुःखादिभिः

उद्दामभावपिशुनामलवल्गुहासव्रीडावलोकनिहतोऽमदनोपियासां॥संमुह्यचापमजहात्प्रमदोत्तमास्तायस्येंद्रियंविमथितुंकुह
कैर्नशेकुः॥३६॥ तमयंमन्यतेलोकोह्यसंगमपिसंगिनं॥आत्मौपम्येनमनुजंव्यापृण्वानमतोऽबुधः॥३७॥ एतदीशनमीशस्यप्रकृ
तिस्थोपितद्गुणैः॥नयुज्यतेसदात्मस्थैर्यथाबुद्धिस्तदाश्रया॥३८॥ तंमेनिरेबलामूढाः॥स्त्रैणंचानुव्रतंरहः॥अप्रमाणविदोभर्तुरीश्वरं
मतयोयथा॥३९॥ इतिश्रीभागवतेप्रथमेएकादशोध्यायः॥ ॥

सदानयुज्यतइतियत्॥यथाआत्मस्थैःआनंदादिभिः॰आत्माश्रयापिबुद्धिर्नयुज्यतेतद्वत्॥वैधर्म्येदृष्टांतोवा॰आत्मस्थैःसत्वाप्रकाशादिभिर्यथाबुद्धिर्यु
ज्यतइति॰एवंअसदात्मादेहःतत्रस्थैर्गुणैस्तदाश्रयाबुद्धिस्तदुपाधिर्जीवोयुज्यते॥एवंप्रकृतिस्थोऽपितद्गुणैर्नयुज्यतइतियत्॰एतदीशनमीशस्येति
३८ ततस्त्र्योपितस्यतत्वंनजानंतीत्याह॥तंस्त्रैणंआत्मवश्यंरहः॰एकांतेअनुव्रतंचमेनिरे॥भर्तुरप्रमाणविदः॰प्रमाणमियत्तांमहिमानमजा
नंत्यइत्याह॥ईश्वरंस्त्रैणंमतयः॰अहंवृत्तयोयथास्वाधीनंस्वधर्मयोगिनंमन्यंतेतद्वत्॥यद्वायथातासांमतयःकल्पनातद्वश्यंमेनिरेइत्य
र्थः॥ ॥प्रथमेएकादशः॥३९॥ ॥

प्र २ मो २

भा॰प्र॰ पुरोक्तं पत्रसंगात्पद्रौणिदंडादि विस्मृतात् द्वादशे बत तदेवाथ परीक्षिज्जन्म वर्ण्यते ॥१॥ परीक्षितोऽथ राजर्षेर्जन्मकर्मविलापनं संस्थां च पांडुपुत्राणां व
क्ष्ये कृष्णकथोदयमिति प्रतिज्ञाय पांडवानां राज्यस्थितिरुपोद्घातभूता सप्रसंगा सप्तमाध्यायमारभ्य निरूपिता इदानीमुपोद्घातिकमुक्त्वानु
५१ वादपूर्वकं पृच्छति । अश्वत्थाम्नेत्यादि । उपसृष्टेनाविसृष्टेन । तस्य जन्मेत्यादि ब्रूहि इत्युत्तरेणान्वयः ॥२॥ स परीक्षित्प्रेत्य देहं त्यक्त्वा ॥ प्रार्थये न त्वाज्ञापयामी
त्याह । तदिदमित्यादि । गदितं यदि मन्यसे अनुग्रहेण तर्हि ब्रूहीति । यस्य ज्ञानमदाच्छुक इति श्रवणेच्छायाः कारणं ॥३॥ निस्पृहस्यापि राज्ञः श्रीलालनातु

शौनक उवाच ॥ अश्वत्थाम्नोपसृष्टेन ब्रह्मशीर्ष्णोरुतेजसा । उत्तराया हतो गर्भ ईशेनाजीवितः पुनः ॥१॥ तस्य ज
न्म महाबुद्धेः कर्माणि च महात्मनः । निधनं च यथैवासीत्स प्रेत्य गतवान्यथा ॥२॥ तदिदं श्रोतुमिच्छामि गदितुं य
दि मन्यसे ब्रूहि नः श्रद्दधानानां यस्य ज्ञानमदाच्छुकः ॥३॥ सूत उवाच ॥ अपीपलद्धर्मराजः पितृवद्रंजयन्प्र
जाः । निस्पृहः सर्वकामेभ्यः कृष्णपादानुसेवया ॥४॥ संपदः क्रतवो विप्रा महिषी भ्रातरो मही । जंबूद्वीपाधिपत्यं च
यशश्च त्रिदिवं गतं ॥५॥ किं ते कामाः सुरस्पार्हा मुकुंदमनसो द्विजाः । अधिजह्रुर्मुदं राज्ञः क्षुधितस्य यथेतरे ॥६॥ ५१

महात्तत्याह कृष्णपौत्रः समस्तानीति वक्ष्यंतस्य श्रीकल्पेमच्छुदे का मा हा । अपीपलदिति त्रिभिः । पितृवदपीपलत्पालयामास ॥४॥ क्रतवस्तदुपार्जिता लोकाश्च ॥ प
सुरस्पार्हाः सुराणां स्पृहणीयास्ते संपदादयः ॥ कामा विषयाः । राज्ञः मुदं प्रीतिमधिजह्रुर्न हृतवंत इत्यर्थः । अत्र हेतुः । मुकुंदे एव मनो यस्येति । क्षुधितस्य
अन्नैकमनसः प्राणिनो यथा इतरे स्रक्चंदनादयो मुदं न कुर्वंति तद्वत् ॥६॥ ॥ श्रीरामचंद्राय नमः ॥ ॥ राम ॥ ॥ राम ॥ ॥

६

प्रस्तुतमाहमातुरिति ॥ ७ ॥ पुरटं सुवर्णं स्फुरत्पुरटमौलिर्यस्यास्ति तं व्रीह्यादिभ्यश्चेतीनिप्रत्ययः। अपीच्यमतिसुंदरं दृश्यत इति दर्शनं रूपं यस्य। तडिद्व
द्पीते वाससी यस्येति श्याममिति तु पदद्वयं विघ्नदूषितमतोपमा सूचिता। अच्युतं अविकारं ॥ ८ ॥ तप्तं द्राहोत्तीर्णं यत्कांचनं तन्मये कुंडले
यस्य। क्षतजाक्षं संरंभादतारक्तनेत्रं ॥ ९ ॥ अस्त्रतेजो विधमंतं विनाशयंतं। नीहारं गोपतिः सूर्य इव। संनिकर्षे समीपे ददर्श। दृष्ट्वा च असौ क इति

मातुर्गर्भगतो वीरः स तदा भृगुनंदन। ददर्श पुरुषं कंचिद्दह्यमानोस्त्रतेजसा ॥ ७ ॥ अंगुष्ठमात्रममलं स्फुरत्पुरटमौलिनं। अपी
च्यदर्शनं श्यामं तडिद्वाससमच्युतं ॥ ८ ॥ श्रीमद्दीर्घचतुर्बाहुं तप्तकांचनकुंडलं। क्षतजाक्षं गदापाणिमात्मनः सर्वतो दिशं
॥ ९ ॥ परिभ्रमंतमुल्काभां भ्रामयंतं गदां मुहुः। अस्त्रतेजः स्वगदया नीहारमिव गोपतिः। विधमंतं संनि कर्षे पर्यैक्षत क इ
त्यसौ ॥ १० ॥ विधूय तदमेयात्मा भगवान्धर्मगुब्विभुः। मिषतो दशमास्यस्य तत्रैवांतर्दधे हरिः ॥ ११ ॥ ततः सर्वगुणो
दर्के सानुकूलग्रहोदये। जज्ञे वंशधरः पांडोर्भूयः पांडुरिवौजसा ॥ १२ ॥

पर्यैक्षत वितर्कितवान्। अमेयात्मा कथं तद्विधूतवानित्यतर्क्यरूपः। धर्मं गोपायतीति धर्मगुप् ॥ ११ ॥ दशमासैः परिच्छेद्यस्य तस्य
मिषतः पश्यतो यत्र दृष्टस्तत्रैवांतर्हितो न त्वन्यत्र गतः। यतो विभुः सर्वगतः ॥ ११ ॥ उदर्क उत्तरफलं। सर्वगुणानामुत्तरोत्तराधिक्यरूप उदर्को ल
ग्नो तत्र हेतुः। अनुकूलैरन्यैर्ग्रहैः सहितानां शुभग्रहाणामुदयो यस्मिन्। यस्मिन् लग्ने पांडोर्वंशधरो भूय ओजसा पांडुरिव जज्ञे अजनिष्ट
॥ १२ ॥ राम ॥ ॥

नम

जातकं जातकर्म मंगलं गृणाह ॥ १३ ॥ वरान् श्रेष्ठान् । ब्रन्नंशो मेन्नंतं यावन्न च्छिद्यते नालं तावन्नाप्नोति सूतकं । छिन्ने नाले ततः पश्चात् सूतकं तु विधी
यत इति वचनात् ततः पूर्वं प्रदानात् । आमान्नं वा । प्रजातीर्थे पुत्रोत्पत्तिक्षणकाले । पुत्रे जाते व्यतीपाते दत्तं भवति चाक्षयमिति स्मृतेः ॥ देवाश्च पितरश्चैव
पुत्रे जाते द्विजन्मनां । आयांति हि हितप्रेप्सु क्षणाहमिति चाब्रुवन् ॥ १४ ॥ हे पौरवर्षभ पुरूणां पुरुवंश्यानां ॥ १५ ॥ शुक्ले शुद्धे अस्मिन् प्रजातंतौ दैवे

तस्य प्रीतमना राजा विप्रैर्धौम्यकृपादिभिः । जातकं कारयामास वाचयित्वा च मंगलं ॥ १३ ॥ हिरण्यं गां महीं ग्रामान् हस्त्यश्वान्नृपति
र्वरान् । प्रादात्स्वन्नं च विप्रेभ्यः प्रजातीर्थे स तीर्थवित् ॥ १४ ॥ तमूचुर्ब्राह्मणास्तुष्टा राजानं प्रश्रयान्वितं । एष ह्यस्मिन् प्रजातंतौ पुरू
णां पौरवर्षभ ॥ १५ ॥ दैवेनाप्रतिघातेन शुक्ले संस्थामुपेयुषि । रातो वोऽनुग्रहार्थाय विष्णुना प्रभविष्णुना ॥ १६ ॥ तस्मान्नाम्ना विष्णु
रात इति लोके बृहच्छ्रवाः । भविष्यति न संदेहो महाभागवतो महान् ॥ १७ ॥ युधिष्ठिर उवाच ॥ अप्येष वंश्यान् राजर्षीन् पुण्यश्लो
कान् महात्मनः । अनुवर्तिता स्विद्यशसा साधुवादेन सत्तमाः ॥ १८ ॥ ॥

न कथंभूतेनाप्रतिघातेन ईश्वरेण संस्थां नाशमुपेयुषि गते सति वोऽनुग्रहार्थाय यस्मात्प्रभवनशीलेन श्रीविष्णुना रातो दत्तः ॥ १६ ॥ तस्मा
त् लोके विष्णुरात इति नाम्ना भविष्यति । महाभागवत सद्गुणैश्च महान् भविष्यति । नात्र संदेह इति तं राजानं ब्राह्मणा ऊचुरिति त्रयाणामन्व
यः ॥ १७ ॥ महाभागवतो भविष्यतीत्युक्ते हृष्टः पृच्छति । अपिपिच्छितः । साधुवादेन यशसा सत्कीर्त्या अनुवर्तिता भविष्यतीति पूर्वस्यापि
परस्यानुषंगः ॥ १८ ॥ ॥

म.

प्रजानामविता रक्षकः । मानवो मनुपुत्रः । ब्राह्मणेषु हितः सत्यप्रतिज्ञश्च श्रीरामो यथा ॥१९॥ उशीनरेशोऽधिपतिः शिबिः । येन स्वमांसं दत्वा
शरणागतः कपोतो रक्षितः । स्वानां ज्ञातीनां यज्वनां च यशोविस्तारको दौश्यन्तिर्भरत इव ॥२०॥ अर्जुनयोः । पार्थकार्तवीर्ययोः ॥२१॥ हि
मवानिव सत्त्वानि बिभ्युः । अनन्यगतिकत्वेन वसुधेव तितिक्षुः क्षान्ता । प्रीत्या मातापितराविव सहिष्णुः ॥२२॥ पितामहो ब्रह्मा तेन समः

॥ब्राह्मणोऽस्तु ॥ ॥ पार्थ प्रजाविता साक्षादिक्ष्वाकुरिव मानवः । ब्रह्मण्यः सत्यसंधश्च रामो दाशरथिर्यथा ॥१९॥ एष दाता
शरण्यश्च यथा ह्यौशीनरः शिबिः । यशोवितनिता स्वानां दौष्यन्तिरिव यज्वनां ॥२०॥ धन्विनामग्रणीरेष तुल्यश्चार्जुनयो
र्द्वयोः । हुताश इव दुर्धर्षः समुद्र इव दुस्तरः ॥२१॥ मृगेंद्र इव विक्रांतो निषेव्यो हिमवानिव । तितिक्षुर्वसुधेवासौ सहिष्णुः
पितराविव ॥२२॥ पितामहसमः साम्ये प्रसादे गिरिशोपमः । आश्रयः सर्वभूतानां यथा देवो रमाश्रयः । २३ सर्वसद्गुणमाहात्म्य
एष कृष्णमनुव्रतः । रंतिदेव इवोदारो ययातिरिव धार्मिकः ॥२४॥ धृत्या बलिसमः कृष्णे प्रह्राद इव सद्ग्रहः । आहर्तैषोऽश्वमेधानां वृ
द्धानां पर्युपासकः ॥२५॥ राजर्षीणां जनयिता शास्ता चोत्पथगामिनां । निग्रहीता कलेरेष भुवो धर्मस्य कारणात् ॥२६॥ तक्ष
कादात्मनो मृत्युं द्विजपुत्रोपसर्जितात् । प्रपत्स्यते उपश्रुत्य मुक्तसंगः पदं हरेः ॥२७॥ जिज्ञासितात्मयाथात्म्यो मुनेर्व्याससुता
दसौ । हित्वेदं नृप गंगायां यास्यत्यद्धाकुतोभयं ॥२८॥ ॥

साम्ये समत्वे । रमाश्रयो हरिः ॥२२॥ सर्वैः सद्गुणैर्यन्माहात्म्यं तस्मिन् श्रीकृष्णतुल्यः २४ सन्न सद्ग्रहोऽतिनिवेशो यस्य । आहर्त्ता कर्त्ता ॥२५॥ द्विजपुत्रेण प्रे
रितात्तक्षकात् आत्मनो मृत्युमुपश्रुत्य हरेः पदं प्रपत्स्यते लप्स्यते । ततश्च जिज्ञासितमात्मनो याथात्म्यं येन सः । इदं शरीरं गंगायां हित्वा अकुतो

ति

ला०प्र० लब्धापचितिः पूजा यैः ॥२९॥ परीक्षिदिति नाम निर्वक्ति स एव इति । यद्यस्मात्प्रभुः समर्थः सन् । गर्भे दृष्टं पुरुषं अनुध्यायन् इह दृश्यमानेषु नरेषु म
५३ ध्ये सर्वमपि नरं परीक्षेत अयं स एव सोऽलं वेत्यो वा इति विचारयेदतः परीक्षिदिति ख्यातः । पूर्वदृष्टमिति वा पाठः ॥३०॥ शुक्ले शुक्लपक्षे यथा प्रसिद्ध उडुपोऽन्वहं य
थाकाष्ठाभिः पंचदशकलाभिर्वर्द्धते एवं तथा पितृभिर्युधिष्ठिरादिभिः कामैश्च वः षष्टिकलाभिश्च पूर्यमाणो ववृधे ॥३१॥ पूर्वमपाक्षप्योक्तान् अस्य

इति राज्ञ उपादिश्य विप्रा जातककोविदाः । लब्धोपचितयः सर्वे प्रतिजग्मुः स्वकान् गृहान् ॥२९॥ स एष लोके विख्यातः परीक्षिदिति यत्प्रभुः ।
गर्भेदृष्टमनुध्यायन् परीक्षेत नरेष्विह ॥३०॥ स राजपुत्रो ववृधे आशु शुक्ल इवोडुपः ॥ आपूर्यमाणः पितृभिः काष्ठाभिरिव सोऽन्वहं ॥३१॥
यक्ष्यमाणोऽश्वमेधेन ज्ञातिद्रोहजिहासया । राजा लब्धधनो दध्यौ नान्यत्र करदंडयोः ॥३२॥ तदभिप्रेतमालक्ष्य भ्रातरोऽच्युतचोदिताः ।
धनं प्रहीणमाजह्रुरुदीच्यां दिशि भूरिशः ॥३३॥ तेन संभृतसंभारो लब्धकामो युधिष्ठिरः । वाजिमेधैस्त्रिभिर्लीयज्ञैः समयजद्धरिं ॥३४॥
॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे द्वादशोऽध्यायः ॥ ॥

तो

मेधानन्तरं दशमेऽस्मप्रकारं कथयति । राजा युधिष्ठिरः ज्ञातिद्रोहस्य हानेच्छयाऽयक्ष्यमाणः करदंडयोरन्यत्र तान्यां विना लब्धधनो दध्यौ चिंतयामास । सक
रदंडस्य परिजनभरणमात्रेऽपक्षीणत्वात् ॥३२॥ प्रहीणं मरुत्तस्य यज्ञे त्यक्तं सुवर्णपात्रादिकमानीतवंतः ॥३३॥ संभृतसंभारः संपादितयज्ञो ५३
पकरणो भीतो ज्ञातिद्रोहात् ॥ ॥ इति प्रथमे द्वादशः ॥ ॥ ॥ ॥ रामायनमः ॥ ॥ ॥ श्रीकृष्णायनमः ॥ ॥ रामचंद्रायनमः ॥ ॥

धन

ततः श्रीकृष्णो तद्धीमे २

निर्गमो धृतराष्ट्रस्य विदुरोक्त्यात्रयोदशे। उक्तः पौत्राभिषिक्ते एवक्तं राज्ञो महोदयं १ इदानीं परीक्षितः कलिनिग्रहादिकर्माणि कथयिष्यन् विदुरागमनेन धृतराष्ट्रप्रस्थानं ततोऽर्जुनागमनं॥ ततः पांडवप्रस्थानं च निरूपयति त्रिभिरध्यायैः। आत्मनो गतिमात्मज्ञानं तयाऽत्मगत्या अ। वाप्तं विवित्सितं ज्ञातुमिष्टं सर्वं येन २ तदेवाह। यावतः कर्मयोगभक्त्यादिविषयान् प्रश्नान् प्रथमं कृतवान्। कौषारवस्य मैत्रेयस्यग्रतः पश्चात्तत्रिचतुरप्रश्ना

श्रीसूत उवाच॥ विदुरस्तीर्थयात्रायां मैत्रेयादात्मनो गतिं ज्ञात्वागाद्धास्तिनपुरं तयावाप्तविवित्सितः॥१॥ यावतः कृतवान् प्रश्नान् क्षत्ता कौषारवाग्रतः। जातैकभक्तिर्गोविंदे तेभ्यश्चोपरराम ह॥२॥ तं बंधुमागतं दृष्ट्वा धर्मपुत्रः सहानुजः। धृतराष्ट्रो युयुत्सुश्च सूतः शारद्वतः पृथा॥३॥ गांधारी द्रौपदी ब्रह्मन् सुभद्रा चोत्तरा कृपी। अन्याश्च जामयः पांडोर्ज्ञातयः ससुताः स्त्रियः॥४॥ प्रत्युज्जग्मुः प्रहर्षेण प्राणं तन्व इवागतं। अभिसंगम्य विधिवत्परिष्वंगाभिवादनैः॥५ मुमुचुः प्रेमबाष्पौघं विरहौत्कंठ्यकातराः। राजा तमर्हयांचक्रे कृतासनपरिग्रहं॥६॥ तं भुक्तवंतमासीनं विश्रांतं सुखमासने। प्रश्रयावनतो राजा प्राह तेषां च शृण्वतां॥७॥

र्थज्ञानमात्रेण गोविंदे जातैकभक्तिः कृतार्थः मन्यते स्मः प्रश्नेभ्य उपरराम ततः परं न विजिज्ञासितवान्॥२॥ सूतः संजयः। शारद्वतः कृपः॥३॥ कृपी द्रोणभार्या। जामयो ज्ञातिभार्याः। अन्याश्च स्त्रियः॥४॥ प्राणं तन्व इति कुतश्चिन्मूर्छादिदोषतः प्राणे मन्दे सति तनवः करांघ्र्यादयो निश्चेष्टा भवंति। पुनस्तस्मिन्नाविर्भूते यथोत्तिष्ठंति तद्वत्॥५॥ विरहेण यदौत्कंठ्यं तेन कातरा विवशाः॥६॥७॥ ॥

भा॰प्र॰
५४

पक्षिणो ह्यपत्यानि यथा ऽतिस्नेहेन पक्षच्छायया वर्द्धयंति तद्वद्युष्मत्पक्षच्छायया समेधितान् नो ऽस्मान् किं स्मरथ। समेधितत्वमेवाह। विप
द्गणात् यस्मात् मोचिताः स्थ ॥ ८ ॥ वो युष्माभिः कया वृत्त्या वर्त्तितं देहवृत्तिः कृता कानि च तीर्थादीनि सेवितानीति ॥ ९ ॥ भवतां च तीर्थाटनं न स्वा
र्थं किंतु तीर्थानुग्रहार्थमित्याह। भवद्विधा इति। मलिनजनसंपर्केण तीर्थानि मलिनानि भवंति पुनः स्वयं तीर्थी कुर्वंति स्वांतं मनस्तत्रस्थेन ॥

युधिष्ठिर उवाच ॥ ॥ अपि स्मरथ नो युष्मत्पक्षच्छायासमेधितान्। विपद्गणाद्विषाग्न्यादेर्मोचिता यत्समातृकाः ॥ ८ ॥ कया वृत्त्या व
र्त्तितं वश्चरद्भिः क्षितिमंडलं। तीर्थानि क्षेत्रमुख्यानि सेवितानीह भूतले ॥ ९ ॥ भवद्विधा भागवतास्तीर्थभूताः स्वयं विभो। तीर्थी कु
र्वंति तीर्थानि स्वांतस्थेन गदाभृता ॥ १० ॥ अपि नः सुहृदस्तात बांधवाः कृष्णदेवताः। दृष्टाः श्रुता वा यदवः स्वपुर्यां सुखमास
ते ॥ ११ ॥ इत्युक्तो धर्मराजेन सर्वं तत्समवर्णयत्। यथानुभूतं क्रमशो विना यदुकुलक्षयं ॥ १२ ॥ नन्वप्रियं दुर्विषहं नृणां स्वय
मुपस्थितं। नावेदयत्सकरुणो दुःखितान्द्रष्टुमक्षमः ॥ १३ ॥ कंचित्कालमथावात्सीत्सत्कृतो देववत्सुखं। भ्रातुर्ज्येष्ठस्य श्रे
यस्कृत्सर्वेषां प्रीतिमावहन् ॥ १४ ॥ ॥

५४

स्वस्यांतःस्थितेनेति वा ॥ १० ॥ अपि किं सुखमासते। भवद्भिः क्वापि दृष्टाः श्रुता वा ॥ ११ ॥ १२ ॥ यदुकुलक्षयावर्णने कारणमाह। नन्विति। श्रेय
स्कृत् तत्त्वमुपदिशन् ज्येष्ठस्य भ्रातुर्धृतराष्ट्रस्य ॥ १३ ॥ १४ ॥ ॥

ननु शूद्रोऽसौ कथमुपदिशेत्॥ न ह्यसौ शूद्रोऽयम् अस्य रूपेणासीत्॥ किं तत्र कारणं। अयमेवात्रागतेऽत्र अत्र कोदंडधर इत्यपेक्षायामाह॥ अविभ्रत् धृतवानित्यर्थः॥ मांडव्यस्य शापात्॥ कश्चिच्चौरान् अनुधावंतो राजभटा मांडव्यस्य ऋषेस्तपश्चरतः समीपतस्तान् संप्राप्य तेन सह तान्निबध्यानीय राज्ञे निवेद्यत दाज्ञया सर्वान् शूलमारोपयामासुः॥ ततो राजा तमृषिं ज्ञात्वा शूलादवतार्य प्रसादयामास॥ ततो मुनिर्यमं गत्वा कुपितश्चोवाच कस्मादहं शूलमारोपित इति॥ तेनैवोक्तं वाल्ये शलभं कुशाग्रेण विध्य क्रीडितवानिति॥ तच्छ्रुत्वा मांडव्यस्तं शशाप वाल्ये अज्ञानतो मे महांतं दंडं

अविभ्रदर्यमा दंडं यथावदघकारिषु॥ यावद्दधार शूद्रत्वं शापाद्वर्षशतं यमः॥ २४ ॥ युधिष्ठिरो लब्धराज्यो दृष्ट्वा पौत्रं कुलंधरं॥ भ्रातृभिर्लोकपालाभैर्मुमुदे परया श्रिया॥ २५ ॥ एवं गृहेषु सक्तानां प्रमत्तानां तदीहया॥ अत्यक्रामदविज्ञातः कालः परमदुस्तरः॥ २६ ॥ विदुरस्तदभिप्रेत्य धृतराष्ट्रमभाषत॥ राजन्निर्गम्यतां शीघ्रं पश्येदं भयमागतं॥ २७ ॥ प्रतिक्रिया न यस्येह कुतश्चित्कर्हिचित्प्रभो॥ स एष भगवान्कालः सर्वेषां नः समागतः॥ २८ ॥ ॥

यतस्त्वं कारितवान्॥ अतः शूद्रो भवेति॥ २४ ॥ इदानीं राज्यापकर्षनिरूपणच्छलेनोत्कर्षं निगमयति युधिष्ठिर इति॥ कुलंधरं कुलधारकम्॥ २५ ॥ तदीहया गृहव्यापारेण प्रमत्तानाम् अत्यक्रामत् तस्यायुः कालोऽतिक्रांतः॥ पद्धातानत्यक्रामदित्यर्थः॥ २६ ॥ अभिप्रेत्य ज्ञात्वा॥ २७ ॥ ननु तत्प्रतीकारः क्रियतां किं निर्गमनेन तत्राह॥ प्रतिक्रियामिति॥ सर्वेषामिति॥ यैः प्रतिकर्तव्यं तेषामपीत्यर्थः॥ २८ ॥ ॥ रामचंद्राय नमः॥ ॥

कथंधनादिवियोगःसोढुंशक्योऽतआह।येनेत्यादि।येनकालेनाभिपन्नोऽभियुक्तः।१९। अत्रावस्थानमतिदैन्यमितिदर्शयन्वैराग्यमुत्पादयति।पितृभ्रातृभिःसहहतैः।१८। आत्माचदेहः।२०। येनपुत्राहतास्तेनभीमेनदत्तंपिंडंगृहपालनेनवैराग्यमुत्पादयति।पितृभ्रातृविवगृहपालःश्वा।२१। निसृष्टःप्रक्षिप्तः।गरोविषंदूषिताअवमताः।तद्दत्तैरन्नादिभिर्लब्धैःस्वसुत्तिः।किंप्रयोजनंनकिंचिदित्यर्थः।२२। तस्यापिएवंदे

येनचैवाभिपन्नोयंप्राणैःप्रियतमैरपि।जनःसद्योवियुज्येतकिमुतान्यैर्धनादिभिः॥१९॥पितृभ्रातृसुहृत्पुत्राहतास्तेविगतंवयः॥आ
त्माचजरयाग्रस्तःपरगेहमुपाससे।२०। अहोमहीयसीजंतोर्जीविताशाययाभवान्।भीमेनावर्जितंपिंडमादत्तेगृहपालवत्।२१।
अग्निर्निसृष्टोदत्तश्चगरोदाराश्चदूषिताः।हृतंक्षेत्रंधनंयेषांतद्दत्तैरसुभिःकियत्।२२। तस्यापितवदेहोयंकृपणस्यजिजीविषोः॥परै
त्यनिच्छतोजीर्णोजरयावाससीइव।२३। गतस्वार्थमिमंदेहंविरक्तोमुक्तबंधनः॥अविज्ञातगतिर्जह्यात्सवैधीरउदाहृतः।२४। यः
स्वकात्परतोवेहजातनिर्वेदआत्मवान्।हृदिकृत्वाहरिंगेहात्प्रव्रजेत्सनरोत्तमः॥।२५। अथोदीचींदिशंयातुस्वैरज्ञातगतिर्भवा
न्।इतोर्वाक्प्रायशःकालःपुंसांगुणविकर्षणः।२६॥

न्यमनुलवतोऽपिपरैतिक्षीयते।२३। गतस्वार्थंयशोधर्मादिभ्योमुक्तबंधनस्त्यक्ताभिमानः।क्वगतइत्यविज्ञातागतिर्यस्यसधीरः।प्राप्तदुःख
स्यस्वयंमननेनमुक्तिप्राप्तेः।२४। नरोत्तमस्ततःप्रागेवकृतप्रतीकारः।स्वकात्स्वतएवपरतःपरोपदेशतोवा॥त्वंतुनरोत्तमोनाभूः।२४।अ
तइदानींधीरोभवेत्याह।अथेति।अर्वाक्अर्वाचीनःएष्यन्नित्यर्थः।गुणान्गुणान्धैर्यदयादीन्विकर्षतिआच्छिनत्तीतितथा।२६॥

श्री

आजमीढोऽजमीढवंशजः। प्रज्ञाचक्षुरंधः एवं बोधितः सन्द्रढिम्नो [illegible]दार्ढ्यात् भ्रात्रा संदर्शितोऽध्वा वनमोक्षयोर्मार्गो यस्य सः निश्चक्राम। २७ सु
बलस्य पुत्री गांधारी सा धीसुशीला हिमालयं प्रयांतं पतिमनुजगाम। ननु कथं सुकुमारांगी हिमाद्रिदुःखबहुलं हिमवंतं गतेत्यत आह न्य
स्तदंडानां प्रहर्षो यस्मिंस्तद्दुःखदमपि केषांचित्कर्मप्रहर्षहेतुर्भवतीत्यत्र दृष्टांतः। मनस्विनां शूराणां युद्धे सन्तीव्रः प्रहारो यथा। पा

एवं राजा विदुरेणानुजेन प्रज्ञाचक्षुर्बोधितो ह्याजमीढः। छित्वा स्वेषु स्नेहपाशान्द्रढिम्नो निश्चक्राम भ्रातृसंदर्शिताध्वा ॥
२७ पतिं प्रयांतं सुबलस्य पुत्री पतिव्रता चानुजगाम साध्वी। हिमालयं न्यस्तदंडप्रहर्षं मनस्विनामिव सत्संप्रहारः ॥
२८ अजातशत्रुः कृतमैत्रो हुताग्निर्विप्रान्नत्वा तिलगोभूमिरुक्मैः। गृहं प्रविष्टो गुरुवंदनाय न चापश्यत्पितरौ सौबलीं च।
२९ तत्र संजयमासीनं पप्रच्छोद्विग्नमानसः। गावल्गणे क्व नस्तातो वृद्धो हीनश्च नेत्रयोः। ३० अंबा च हतपुत्रार्ता पितृव्यः क्व
गतश्च सुहृत्। अपि मय्यकृतप्रज्ञे हतबंधुः सभार्यया। ३१ आशंसमानः शमलं गंगायां दुःखितोऽपतत्। पितर्युपरते पांडौ स
र्वान्नः सुहृदः शिशून्। अरक्षतां व्यसनतः पितृव्यौ क्व गतावितः ३२ सूत उवाच। कृपया स्नेहवैक्लव्यात्सूतो विरहकर्शितः। आ
त्मेश्वरमचक्षाणो न प्रत्याहातिपीडितः ३३ विमृज्याश्रूणि पाणिभ्यां विष्टभ्यात्मानमात्मना। अजातशत्रुं प्रत्यूचे प्रभोः पादावनुस्मरन्। ३४

ठांतरे सत्संप्रहारे युद्धं यथेति। २८ कृतं मैत्रं मित्रदैवतं संध्यावंदनं येन। नत्वा संपूज्य पितरौ विदुरधृतराष्ट्रौ सौबली गांधारी २९ हे गावल्गणे गवल्गणस्य
पुत्र संजय ३०·३१ अकृतप्रज्ञे मंदमतौ शमलमपराधमाशंसमान आशंक्यमानः। भार्यया सह गांधार्या वा अपतत्। यो नोऽरक्षतां तावितः स्थानात् ३२ कृ
पया स्नेहवैक्लव्याच्चातिपीडितः। आत्मेश्वरं धृतराष्ट्रमपश्यन्विरहकर्शितश्च सूतः संजयो न प्रत्युत्तरमाह। ३३ आत्मना बुद्ध्या आत्मानं मनो विष्टभ्य धैर्ययुक्तं

तः

हलाग्रमोधूरीहस्ता ॥ ३४ ॥

सा॰प्र॰
५६

गांधार्याश्च । व्यवसितं निश्चितं । यतो मुषितो वंचितोऽस्मि ॥ ३५ ॥ एवं कंचित्कालं शोचति तस्मिन् अथ नारद आजगाम । अत्रास्ति क्वाचिन्मूलके पाठांतरं । तदुक्तं
ग्रंथपथासंप्रदायं व्याख्यायते । शोकवेगादभ्यर्चयान्निवाह राजानत्वभ्यर्ची ॥ ३६ ॥ शोकाक्रांतः कुभार्युक्तः अहृदयारहितः पुमान् । गुरुदेवद्विजातीनां पूज
नं न समाचरेदिति स्मृतेः ॥ ३७ ॥ नाहं वेद वेद्मि ॥ अपारे शोकार्णवे भगवान्नूत्वमेव पारदर्शकः । अतो ब्रूहीति शेषः ॥ ३९ ॥ आदावेव यथाहत्तकथनेशो

संजय उवाच ॥ ॥ नाहं वेद व्यवसितं पित्रोर्वः कुलवर्द्धन । गांधार्या च महाबाहो मुषितोस्मि महात्मभिः ॥ ३५ ॥ अथाजगाम भगवा
न्नारदः सह तुंबुरुः । प्रत्युत्थायाभिवाद्याह सानुजोभ्यर्चयन्मुनिं ॥ ३६ ॥ युधिष्ठिर उवाच ॥ ॥ नाहं वेद गतिं पित्रोर्भगवन् क्व गता व
वितः । अंब वा हतपुत्रार्त्ता क्व गता च तपस्विनी ॥ ३७ ॥ कर्णधार इवापारे भगवान्पारदर्शकः । अथाबभाषे भगवान्नारदो मुनिसत्त
मः ॥ ३८ ॥ नारद उवाच ॥ ॥ मा कंचन शुचो राजन् यदीश्वरवशं जगत् । लोकाः सपाला यस्येमे वहंति बलिमीशितुः ॥ ३९ ॥
स संयुनक्ति भूतानि स एव वियुनक्ति च । यथा गावो नसि प्रोतास्तंत्यां बद्धाः स्वदामभिः ॥ ४० ॥ वाक्तंत्यां नामभिर्बद्धा वहंति बलि
मीशितुः ॥ ॥

केन मूर्छितः पतेदिति प्रथमं तावच्छोकमुपशमयति । कंचन मा शुचो मा शोच न केवलं तानेव । यद्यस्मादीश्वराधीनं जगत् । तदेवाह । लोका इति ॥ ४० ॥
तदेवाविशिनष्टि स इति । स एव संयुनक्ति संयोजयति । वियुनक्ति वियोजयति । पारतंत्र्यं दर्शयति यथेति । गावो बलीवर्दाः । तंत्या दीर्घरज्वा । नसि
नासिकायां प्रोताः स्वदामभिर्नो बलिं वहंति । एवं वाक्तंत्यां । कर्तव्याऽकर्तव्यरूपवेदलक्षणायां स्वनामभिर्वर्णाश्रमलक्षणैर्बद्धा ईश्वरस्य बलिं वहंति ॥
ब्राह्मणो ब्रह्मचारीत्यादि ॥ ४० ॥ ॥

यत्र२
५६

प्रकृतौ पारतंत्र्यमुक्त्वा संयोगवियोगयोरपि पराधीनतामाह-यथेति। क्रीडोपस्कराणां क्रीडासाधनानां क्रीडतः इच्छया संयोगविगमौ भवतः तथैवईशेछ्छया जीवानाम
ईशेन संयोगविगमावपीति। ४१ ईश्वराधीनत्वान्न शोकः कार्य इत्युक्तं लोकतत्त्वे च विचार्यमाणे निर्विषयोऽयं शोक इत्याह। यदित्यादि। यद्यदि लोकं ज-
नं ध्रुवं जीवरूपेण अध्रुवं देहरूपेण न वेति न ध्रुवं नाप्यध्रुवं शुद्धब्रह्मरूपेण अनिर्वचनीयत्वेन वा उभयरूपं वा विज्ञजनं शतः सर्वथा ब्रह्मविद्विदेहे तुते वि-
ज्ञास्ते न शोच्याः स्नेहादन्यत्र स्नेह एव केवलं शोकहेतुः। ४२ स चाज्ञानमूलमित्याह। तस्मान्मां विना कथं ते वर्तेरन्निति मनसो वैक्लव्यं च व्याकुलतां अंग हे युधि-
ष्ठिर जहि त्यज ४२ तत्र त्वद्देहतस्तेषां रक्षितिरित्येतत्राव त्रासीत्याह। कालेत्यादि। कालो गुणक्षोभकः कर्म जन्मनिमित्तं गुणाः उपादानानि तदधीनः पांच-

यथा क्रीडोपस्कराणां संयोगविगमाविह। इच्छया क्रीडितुः स्यातां तथैवेशेच्छया नृणां॥ ४१ यन्मन्यसे ध्रुवं लोकमध्रुवं [illegible]वा
न चोभयं। सर्वथा हि न शोच्यास्ते स्नेहादन्यत्र मोहजात्॥ ४२ तस्माज्जह्यंग वैक्लव्यमज्ञानकृतमात्मनः। कथं त्वनाथाः कृपणा वर्तेरंस्तूवन
माश्रितः॥ ४३ कालकर्मगुणाधीनो देहोऽयं पांचभौतिकः। कथमन्यांस्तु गोपायेत्सर्पग्रस्तो यथापरं॥ ४४ अहस्तानि सहस्तानामपदानि चतु-
ष्पदां। फल्गूनि तत्र महतां जीवो जीवस्य जीवनं॥ ४५ तदिदं भगवान्राजन्नेक आत्मात्मनां स्वदृक्। अंतरोऽनंतरो भाति पश्य तं माययो-
रुधा॥ ४६॥

भौतिको देहो जडः। तद्धि भागेनांशवांश्च। सर्पग्रस्तोऽजगरगिलितो यथान्यं न रक्षितुमितिहतु॥ ४४ ईश्वरेण विहिता वृत्तिश्च सर्वतः सुलभैवेत्याह। अहस्तानि
पश्वादीनि अपदानि तृणादीनि। तत्र तेषु अहस्तादिष्वपि फल्गूनि अल्पानि एवं जीवः सर्वोऽपि सर्वस्य जीवनं जीविका॥ ४५ एतेनैव सर्वतो मृत्युग्रासत्वं चोक्तं
मोहनिवृत्त्यर्थं द्वैतस्यावस्तुत्वमाह। तदिदमित्यादि। तदिदमहस्तसहस्तादिरूपं जगत् स्वदृग्भगवानेव न ततः पृथक् स चैक एव न तु नाना। ननु सजातीयभेदे
अस्त्वेकोऽनंत एकस्तत्राह- आत्मनां भोक्तृणामात्मा स्वरूपभूः अतो न सजातीयभेदः। अंतरोऽनंतरश्च- अंतर्बहिश्च भोग्यरूपश्चाभाति। अतो न विजातीयभेदः।
नन्वेकः कथं तथा प्रतीयेत- तत्राह- मायया उरुधा बहुधा भाति। तं पश्य- नेत्रगततेजोरूपेण रविरिव॥ ४६॥ ॥ रामाय नमः॥ ॥

सा॰प्र॰

५७

क्षामावद्धिकीदृशोमहामायावीद्वारकायामित्याह।सोयमिति।अस्यांभूमौअभावायनाशाय।४७ तर्हिश्रीकृष्णोत्राप्तीत्यत्रैवास्थांमा [illegible] कृथाइत्याह।
निष्पादितमित्यादि।तच्चदेवानांकार्यंतेनेननिष्पादितंकेवलमवशेषंप्रतीक्षते।यदुकुलक्षयमितिहृदिस्थंततोनिजंधामयास्यतिततोयूयमपिग
च्छतेत्यर्थः।केवलमवशेषंप्रतीक्षतेतच्चभूतमपिविदुरवदेव सावार्थेनावर्णयत्।४८ तदेवंशोकमाश्वावनिवार्यजिज्ञासतेतस्मैयथाहतत्रकथयति
धृतराष्ट्रइतिप्रद्धिः।हिमवतोदक्षिणभागे।४९ यावैप्रसिद्धास्वर्धुनीगंगासाआत्मानंयत्रसप्तधाव्यधात्।किमर्थंनानापृथक्सप्तस्रोतोभिःस्रो

सोयमद्यमहाराजभगवान्भूतभावनः।कालरूपोवतीर्णोस्यामभावायसुरद्विषां।४७ निष्पादितंदेवकृत्यमवशेषंप्रतीक्षते।तावद्यू
यमवेक्षध्वंभवेद्यावदिहेश्वरः।४८ धृतराष्ट्रःसहभ्रात्रागांधार्याचस्वभार्यया।दक्षिणेनहिमवतऋषीणामाश्रमंगतः।४९
स्रोतोभिःसप्तभिर्यावैस्वर्धुनीसप्तधा॥सप्तानांप्रीतयेनानासप्तस्रोतःप्रचक्षते।५०।स्नात्वानुसवनंतस्मिन् हुत्वाचाग्नीन्यथा
विधि।अब्भक्षउपशांतात्मासआस्तेविगतैषणः।५१ जितासनोजितश्वासःप्रत्याहृतषडिंद्रियः।हरिभावनयाध्वस्तरजस्सत्व
तमोमलः।५२

व्यधा२

अनु
धा।हैसप्तानामृषीणांप्रीतयेअतएवतत्तीर्थंसप्तस्रोतोवदंति।५० तत्रतेनकृतंअष्टांगयोगमाह।स्नात्वेतिचतुर्भिः।तत्रस्नानंहोमोलक्षणंचनियमाउ
क्ताः।अब्भक्षइत्यासनेअपांचीकाराद्[illegible]ह्याअपः।उपशातआत्मायस्याविगताःपुत्राद्येषणायस्मादितियमाउक्ताः।५१।जितासनइत्यादिना
आसनप्राणायामप्रत्याहाराउक्ताः।हरिभावनयेतिधारणोक्ता।ध्वस्ता रजस्सत्वतमोरूपामलायस्येतिफलतोध्यानमुक्तं।५२

अब्भक्षः

५७

४१

न४

समाधिमाहाविज्ञानेतिद्वाभ्यां।आत्मानंमनोहंकारास्पदंस्थूलदेहादिधियोऽस्यविज्ञानात्मनिबुद्धौसंयोज्यएकीकृत्यतंविज्ञानात्मानंदृश्यांशाद्वियोज्यक्षे
त्रज्ञेद्रष्टरिप्रविलाप्यतंचक्षेत्रज्ञंदृश्यांशाद्वियोज्यआधारेब्रह्मण्यसंज्ञेब्रह्मणिप्रविलाप्यघटांबरंघटोपाध्येर्वियोज्ययथामहाकाशेप्रविलाप्य
तेतद्वत॥५३॥सदुत्थानाभावमाह।ध्वस्तेति।सत्त्वगुणकृतोलाह्लादोबहिरिंद्रियविक्षेपोह्यासदुत्थानंलयेवेततद्वलयंतस्यनास्तियतोध्वस्तोमायायागु
णानामुदर्कःउत्तरफलंवासनायस्य।निरुद्धानिकरणानिचक्षुरादीनिआशयोमनश्चयस्य।अतएवनिवर्तितोखिलआहारोभोगोयेनइंद्रियै

विज्ञानात्मनिसंयोज्यक्षेत्रज्ञेप्रविलाप्यतां।ब्रह्मण्यात्मानमाधारेघटांबरमिवांबरे॥५३॥ध्वस्तमायागुणोदर्कोनिरुद्धकरणाशयः।
निवर्तिताखिलाहारआस्तेस्थाणुरिवाचलः॥५४॥तस्यांतरायोमैवाभूःसंन्यस्ताखिलकर्मणः।सवाअद्यतनाद्राजन्परतःपं
चमेहनि॥५५॥कलेवरंहास्यतिस्वंतच्चभस्मीभविष्यति।दह्यमानेऽग्निभिर्देहेपत्युःपत्नीसहोटजे॥५६॥बहिःस्थितापतिंसा
ध्वीतमग्निमनुवेक्ष्यति।विदुरस्तुतदाश्चर्यंनिशाम्यकुरुनंदन।हर्षशोकयुतस्तस्माद्गंतातीर्थनिषेवकः॥५७॥इत्युक्त्वाथा
रुहत्स्वर्गंनारदःसहतुंबुरुः।युधिष्ठिरोवचस्तस्यहृदिकृत्वाजहाच्छुचः॥५८॥इतिश्रीभागवतेमहापुराणेप्रथमस्कंधेत्रयोदशो
ऽध्यायः॥ ॥

विषयाहरणंवायेनसः।स्थाणुरिवनिश्चलआस्ते॥५४॥तथाभूतमप्यानेतुंगच्छंतंराजानंप्रत्याह।तस्येति।अंतरायोविघ्नः।माभैवाभूरित्यडागमश्छांद
सः॥५५॥दर्शनमप्यतिवक्तुंपर्यामिदृश्यतेप्रत्याह।सवाअद्यतनादरभ्यःस्वंस्वाधीनं।नतर्हितद्दाहार्थंगमिष्यामिनेत्याह।तच्चेति॥५६॥तर्हितांगांधा
रीनयमागमिष्यामिनेत्याह।पत्युर्देहेसहोटजेपर्णशालासमेतेयोगाग्निनासहगार्हपत्याग्निभिर्दह्यमानेतस्यपत्नीबहिःस्थितासतीतं
पतिमनुअग्निंवेक्ष्यति॥५७॥तर्हिविदुरानयनार्थंगंतव्यमेवनेत्याह।विदुरस्तुतन्निशाम्यदृष्ट्वाप्राप्तःआगत्याहर्षसंयुक्तस्तनाशोकतक्षताभातुकस्य

५

स्तस्मात्स्थानात्तीर्थानिसेवितुंगंतागमिष्यति।शुचःशोकान्॥५८॥
इतिश्रीभागवतेप्रथमस्कंधेत्रयोदशोऽध्यायः॥ ॥

वउद्दिश्योत्परिष्टानि दृष्ट्वा राजा विशंकितः। अशृणोदर्जुनात्कृष्णतिरोधानमितीयते॥ श्रीकृष्णस्य चेति नकारेणाभिप्रायं वज्ञा ३॥ कतिचित्सप्ताद
कालातिक्रमेऽपि ततो द्वारकातो नञ्चायात नागतः १। हस्तिनापुरे निमित्तानि उत्पातानि कुरूद्वहो युधिष्ठिरः २॥ रौद्रां घोरां तं देवाह। विपर्य
स्तर्तुधर्मी यस्मिन्तस्य च्छांदसत्वाडुलयपदपूर्वकत्वेप्यनिव। वार्त्तां जीविकां क्रोधलोभानृतैर्युक्त आत्मा एषां ते तेषां॥ जीह्मप्रायं क

श्रीसूत उवाच॥ संप्रस्थिते द्वारकायां जिष्णौ बंधुदिदृक्षया। ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं १ व्यतीताः कतिचिन्मासा
स्तदा नायात्ततोऽर्जुनः। ददर्श घोररूपाणि निमित्तानि कुरूद्वहः २ कालस्य च गतिं रौद्रां विपर्यस्तर्तुधर्मिणः। पापीयसीं नृणां वा
र्त्तां क्रोधलोभानृतात्मनां ३ जिह्मप्रायं व्यवहृतं शाठ्यमिश्रं च सौहृदं। पितृमातृसुहृद्भ्रातृदंपतीनां च कल्कनं ४ निमित्तान्यत्य
रिष्टानि काले त्वनुगते नृणां। लोभाद्यधर्मप्रकृतिं दृष्ट्वोवाचानुजं नृपः ५। युधिष्ठिर उवाच। संप्रेषितो द्वारकायां जिष्णुर्बंधुदिदृक्षया।
ज्ञातुं च पुण्यश्लोकस्य कृष्णस्य च विचेष्टितं ६ गताः सप्ताधुना मासा भीमसेन तवानुजः। नायाति कस्य वा हेतोर्नाहं वेदेदमंजसा। ७
अपि देवर्षिणादिष्टः स कालोऽयमुपस्थितः। यदात्मनोऽंगमाक्रीडं भगवानुत्सिसृक्षति। ८ ॥ ॥

यं व्यवहृतं व्यवहारं शाठ्यं दंभस्तेन मिश्रं सौहृदं सख्यं पित्रादीनां च प्रतियोगिनिश्च कल्कनं कलहादि। अत्यरिष्टानि अत्यंतमशुभानि
दृष्ट्वा नृणां लोभाद्यधर्मप्रकृतिं च दृष्ट्वा अनुजं भीमं। वेति वितर्के कस्माद्धेतोर्नायातीत्यहं न वेद्मि। अपि किं यदा भगवान्। आत्मनः आक्री
डं क्रीडासाधनमंगं मत्पक्षं नाद्य उत्स्रष्टुमिच्छति सोऽयं किं कालः प्राप्तः॥

अस्माकं सर्वपुरुषार्थलेहेतुः श्रीहरिः। अतस्तद्वियोगं विनाऽनिष्टं नस्यादित्याशयेनाह यस्मादितिपादि यस्मात् श्रीकृष्णाद्धेतोः। एतच्चोपरिष्टाद्दर्शनः स्पष्टी
करिष्यति। लोकाश्च युष्मेकारणनृपायस्यानुग्रहात्॥ ९ अदूरात्संनिहितं नोऽस्माकमाशंसतः उत्पातान्॥ १० दैहिकानाह। सार्द्धैश्च [illegible] लिः। ऊ
र्वादयो वामाः स्फुरंति। वेपथुः कंपश्च हृदये वर्तते। एते मह्यमारात्संनिहितं विप्रियं दास्यंति॥ ११ भौमानाह। सार्द्धद्वाभ्यां। शिवा क्रोष्ट्री आदित्य
मभिरौति उच्चात्सूर्याभिमुखं क्रोशति। अनलानना अग्निरिव खेन वमंती। अंग हे ली मम मामभिलक्ष्य सारमेयः श्वा रोदिति। अभीरुवत् निःशंकं

यस्मान्नः संपदो राज्यं दाराः प्राणाः कुलं प्रजाः। आसन्सपत्नविजयो लोकाश्च यदनुग्रहात्॥ ९ ॥ पश्योत्पातान्नरव्याघ्र दिव्यान्
भौमान्सदैहिकान्। दारुणान्शंसतोऽदूराद्भयं नो बुद्धिमोहनं॥ १० ॥ ऊर्वक्षिबाहवो मह्यं स्फुरंत्यंग पुनः पुनः। वेपथुश्चापि
हृदये आराद्दास्यंति विप्रियं॥ ११ ॥ शिवैषोद्यंतमादित्यमभिरौत्यनलानना। मामंग सारमेयोयमभिरोदित्यभीरुवत्॥ १२ ॥ श
स्ताः कुर्वंति मां सव्यं दक्षिणं पशवोऽपरे। वाहांश्च पुरुषव्याघ्र लक्षये रुदतो मम॥ १३ ॥ मृत्युदूतः कपोतोयमुलूकः कंपयन्मनः।
प्रत्युलूकश्च कुह्वानैरनिद्रोशून्यमिच्छतः॥ १४ ॥ धूम्रा दिशः परिधयः कंपते भूः सहाद्रिभिः। निर्घातश्च महानासीत्साकं च स्तन
यित्नुभिः। वायुर्वाति खरस्पर्शो रजसा विसृजंस्तमः॥ १५ ॥ ॥

१२ ॥ शस्ता गवादयो मां सव्यं वामं कुर्वंति। अपरे गर्दभाद्याः प्रदक्षिणं कुर्वंति। वाहानश्वान् रुदतो लक्षये पश्यामि॥ १३ ॥ अयं कपोतो मृत्योर्दूतो मृ
त्युसूचकः। उलूको घूकः। प्रत्युलूकस्तत्प्रतिपक्षो काको वा कुह्वानैः कुत्सितशब्दैर्विश्वं शून्यमिच्छतः॥ १४ ॥ धूम्रा धूसरा दिशः। परिधि
यइवाभिलोकमाह एवंनीतिं दिव्यानाह। सार्द्धाभ्यां। निर्घातो निरभ्रवज्रपातः। स्तनयित्नवो गर्जितानि तैः सह॥ तमो विशेषेण विसृजन्वायुर्वाति॥ १५ ॥

घ

७२

ला.प्र. असृक् रक्तं । १६ ग्रहाणां मर्दं युद्धं ॥ भूता उद्भूताश्चरास्तेषां गणैः संकुलैर्व्याप्तैर्मिश्रैः प्राणिभिः सहितौ रोदसी द्यावापृथिव्यौ ज्वलिते दीप्ते इव पश्येति १७ स्तन
मौमानोहानद्य इति साईक्षिलिः । प्राणिनां मिव १८ दुह्यन्तीति कर्मकर्तर्यार्षं न प्रस्नवन्तीत्यर्थः । १९ दैवतानि प्रतिमाः ॥ अघं दुःखं २० एतैर्हेतुभिर्भगवान

असृग्वर्षन्ति जलदा बीभत्समिव सर्वतः । सूर्यं हतप्रभं पश्य ग्रहमर्दं मिथो दिवि १६ ससंकुलैर्भूतगणैर्ज्वलिते इव रोदसी । नद्यो नदाश्च
क्षुभिताः सरांसि च मनांसि च १७ न ज्वलत्यग्निराज्येन कालोऽयं किं विधास्यति । न पिबन्ति स्तनं वत्सा न दुह्यन्ति च मातरः । १८ रुदन्त्यश्रुमु
खा गावो न हृष्यन्त्यृषभा व्रजे । दैवतानि रुदन्तीव स्विद्यन्ति ह्युच्चलन्ति च । १९ इमे जनपदा ग्रामाः पुरोद्यानाकराश्रमाः । भ्रष्टश्रियो
निरानन्दाः किमघं दर्शयन्ति नः । २० मन्य एतैर्महोत्पातैर्नूनं भगवतः पदैः । अनन्यपुरुषश्रीभिर्हीना भूर्हतसौभगा २१ इति चिन्तय
तस्तस्य दृष्टारिष्टेन चेतसा । राज्ञः प्रत्यागमद्ब्रह्मन्यदुपुर्याः कपिध्वजः । २२ तं पादयोर्निपतितमयथापूर्वमातुरं । अधोवदनमब्बिं
दून्सृजन्तं नयनाब्जयोः । २३ विलोक्योद्विग्नहृदयो विच्छायमनुजं नृपः । पृच्छति स्म सुहृन्मध्ये संस्मरन्नारदेरितं २४ युधिष्ठिर
उवाच ॥ कच्चिदानर्तपुर्यां नः स्वजनाः सुखमासते । मधुभोजदशार्हार्हसात्वतान्धकवृष्णयः । २५ ॥ ॥

विद्यतेऽन्येषु पुरुषेषु श्रीर्वज्राङ्कुशादिशोभा येषां तैर्भगवत्पदैरियं भूः पृथ्वी हतसौभगाभूदित्यहं मन्ये २१ तस्य राज्ञ इत्येवं दृष्टान्यरिष्टानि ये
न तेन चेतसा चिन्तयतः सतः । २२ यदुपुर्याः कपिध्वजोऽर्जुनः प्रत्यागमत् । अयथापूर्वं निपतितं । तदेवाह । आतुरमित्यादि । अपां बिन्दून् अश्रूणि
नेत्राभ्यां विसृजन्तमित्यर्थः । २३ उद्विग्नहृदयः कम्पितहृदयः विच्छायं गतशोभं २४ ॥ ॥ स्वजना बान्धवाः । २५ ॥ ॥

५९

ष२

किंवर्त्स्यतीतिशंकयाव्यवहितक्रमेण पृच्छति। शूर इत्यादिना। मारिषो मान्यो मातामहः। आनकदुंदुभिर्वसुदेवः॥ २६॥ स्वसारः परस्परं वसुदेवदेवकेभेण ता
साम पिन्द्देमं पृष्टमेव। द्वेगपि पृच्छति। स्वयमिति॥ २७॥ आहुक उग्रसेनः। असत्पुत्रोऽपस्य। अत एव जीवनमात्रं पृष्टं। अनुजश्च देवकः। हृदीकसु

शूरो मातामहः कच्चित्स्वस्त्यास्ते वाथ मारिषः। मातुलः सानुजः कच्चित्कुशल्यानकदुंदुभिः॥ २६॥ सप्त स्वसारस्तत्पत्न्यो मातुलान्यः सहात्मजाः।
आसते सस्नुषाः क्षेमं देवकीप्रमुखाः स्वयं॥ २७॥ कच्चिद्राजाहुको जीवत्यसत्पुत्रोऽस्य चानुजः। हृदीकः ससुतोऽक्रूरो जयंत गदशारणाः॥ २८
आसते कुशलं कच्चिद्ये च शत्रुजिदादयः। कच्चिदास्ते सुखं रामो भगवान्सात्वतां प्रभुः॥ २९॥ प्रद्युम्नः सर्ववृष्णीनां सुखमास्ते महारथः। गंभीरर
योऽनिरुद्धो वर्द्धते भगवानुत॥ ३०॥ सुषेणश्चारुदेष्णश्च शांबो जांबवतीसुतः। अन्ये च कार्ष्णिप्रवराः सपुत्रा ऋषभादयः॥ ३१॥ तथैवानुचराः शौ
रेः श्रुतदेवोद्धवादयः। सुनंद नंदशीर्षण्या ये चान्ये सात्वतर्षभाः॥ ३२॥ अपि स्वस्त्यासते सर्वे राम कृष्ण भुजाश्रयाः। अपि स्मरंति कुशलमस्माकं
बद्धसौहृदाः॥ ३३॥ भगवानपि गोविंदो ब्रह्मण्यो भक्तवत्सलः। कच्चित्पुरे सुधर्मायां सुखमास्ते सुहृद्वृतः॥ ३४॥ ॥

रव~

तः कृतवर्मा॥ २८॥ जयंतादयः कृष्णस्य भ्रातरः॥ २९॥ सर्ववृष्णीनां मध्ये महारथः प्रद्युम्नः। गंभीररयो युद्धे महावेगोऽनिरुद्धो वर्द्धते मोदत इत्यर्थः॥ ३०॥
श्रीकृष्णस्यापत्यानि कार्ष्ण्यास्तेषु प्रवराः॥ ३१॥ सुनंदनंदौ शीर्षण्यौ मुख्यौ येषां ते॥ ३२॥ भगवान् सुखमास्ते इति प्रश्नस्यानौचित्यमाशंक्याह। पु
र इत्यादि। पुरः संबंधिन्यां देवसभायां सुहृद्वृतः सुखमास्ते॥ ३३॥ ३४॥ ॥

ला॰ प्र॰ भगवतोऽत्रावस्थाने हि लोकानां मंगलं नान्यथेत्याशयेनाह॥ मंगलायेत्यादि चतुर्भिः॥ मंगलाय शुभाय क्षेमाय फलस्य पालनाय अनंतसखो बलभद्रस-
६० हायः॥ २५॥ अर्चिताः सर्वैः पूजिताः। परमानंदं यथा भवति। महापौरुषिका वैकुंठनाथानुचराः॥ २६॥ यस्य पादशुश्रूषणमेव मुख्यं कर्म तपआदि श्रेष्ठं प-
लक्ष्मीत्वेन सत्यभामादयः संख्ये युद्धे श्रीकृष्णबलेन निर्जित्य तदाशिषो देवभोग्यान् पारिजातादीन् हरंति लभंते। वज्रायुधस्येंद्रस्य वल्लभा शची तस्याउचि-

मंगलाय च लोकानां क्षेमाय च भवाय च। आस्ते यदुकुलांभोधावाद्योऽनंतसखः पुमान्॥ २५॥ यद्बाहुदंडैर्गुप्तायां स्वपुर्यां यदवोऽर्चि-
ताः। क्रीडंति परमानंदं महापौरुषिका इव॥ २६॥ यत्पादशुश्रूषणमुख्यकर्मणा सत्यादयो द्व्यष्टसहस्रयोषितः। निर्जित्य संख्ये त्रिदशांस्त-
व दाशिषो हरंति वज्रायुधवल्लभोचिताः॥ २७॥ यद्बाहुदंडाभ्युदयानुजीविनो यदुप्रवीरा ह्यकुतोभया मुहुः। अधिक्रमंत्यंघ्रिभिराहृतां र॰ १
बलात्सभां सुधर्मां सुरसत्तमोचितां॥ २८॥ कच्चित्तेऽनामयं तात भ्रष्टतेजा विभासि मे। अलब्धमानोऽवज्ञातः किं वा तात चिरोषितः॥ २९॥

ताः॥ २७॥ यद्बाहुदंडअभ्युदयोपजीविनः सुधर्मां सभां अंघ्रिभिरधिक्रामंति सगोविंदः सुखमास्ते इति गतं पंचभिः श्लोकैः नान्यैः॥ २८॥ इदानीमर्जुनस्यैव कुश-
लं पृच्छति कच्चिदिति षड्भिः॥ अनामयमारोग्यं। न लब्धो मानो येन बंधुभिः सकाशात्। किं वान्यैः प्रमत्तैः अवज्ञातस्तिरस्कृतो। यद्वा चिरोषितो बहु- ६०
कालं तत्र स्थितः॥ २९॥ ॥ रामाय नमः॥ ॥

ऽभावैरितिच्छेदः॥ प्रेमशून्यैः रमंगलैः परुषैः शब्दादिभि[illegible]र्नाभिहितो न ताडितोसि किं। यद्वार्थिभ्यः किमपि दास्यामीति नोक्तं किं। यद्वार्थ्यश्चाशया सहद
धान्यामाभवति तथा दास्यामीति प्रतिश्रुतं यत्तन्न दत्तं किं॥४०॥ अन्यच्च शरणागतं सत्त्वं प्राणिमात्रं न त्यक्तवानसि किं। यत्त्वं पूर्वं शरणप्रदः॥४१॥ अग
म्यामिति च्छेदः। निंदितां स्त्रियं नागमः किं न गतवानसि। असत्कृतां मलिनवस्त्रादिकां नागमः किं। नोत्तमैः नासमैः समैरित्यर्थः। असमैरध

कच्चिन्नाभिहतोऽभावैः शब्दादिभिरमंगलैः। न दत्तमुक्तमर्थिभ्य आशया यत्प्रतिश्रुतं॥४०॥ कच्चित्त्वं ब्राह्मणं बालं गां वृद्धं रोगिणं स्त्रियं।
शरणोपसृतं सत्त्वं नात्याक्षीः शरणप्रदः॥४१॥ कच्चित्त्वं नागमोऽगम्यां गम्यां वासत्कृतां स्त्रियं। पराजितो वाथ भवान्नोत्तमैर्नासमैः प
थि॥४२॥ अपिस्वित्पर्यभुङ्क्थास्त्वं संभोज्यान्वृद्धबालकान्। जुगुप्सितं कर्म किंचित्कृतवान्न यदक्षमम्॥४३॥ कच्चित्प्रेष्ठतमेनाथ हृद
येनात्मबंधुना। शून्योस्मि रहितो नित्यं मन्यसे तेऽन्यथा न रुक्॥४४॥ ॥इति श्रीभागवते महापुराणे प्रथमस्कंधे युधिष्ठिर[illegible]
नाम चतुर्दशोऽध्यायः॥ ॥

मैर्वा किं न पराजितोऽसीत्यर्थः॥४२॥ संभोजनार्हान्वृद्धान्बालकांश्च किंचित्पर्यभुक्थाः त्यक्त्वा भुक्तवानसि। अक्षमं कर्तुमयोग्यं यत्तन्न कृतवा
नसि किं॥४३॥ नित्यं सदा प्रेष्ठतमेन हृदयेनांतरंगेनात्मबंधुना श्रीकृष्णेन रहितः शून्योऽस्मीति मन्यसे इत्यर्थः। अन्यथा ते रुग्मनःपीडा न घटते॥४४॥
॥ ॥प्रथमस्कंधे चतुर्दशोऽध्यायः॥ ॥श्रीरामायनमः॥ ॥श्रीकृष्णायनमः॥ ॥

भा॰प्र॰
६१

कलिप्रवेशमालक्ष्य धुरं न्यस्य परीक्षिति। आरोहत्स्वर्गमिति पंचदशोऽब्रवीत्॥ १॥ कृष्णोऽर्जुनः॥ आविकल्पित इति छेदः॥ नानाशंकास्पदं रूपमालक्ष्य विकल्पित इत्यर्थः॥ प्रतिभाषितुं नाशक्नोदिति दूरेणान्वयः॥ तत्र हेतवः॥ कृष्णविश्लेषेण कर्शितः कृशः कृतः॥ २ शोकेन हेतुना। वदनं वदनस्य ते एव सरोजे शुष्यती वदनहृत्सरोजे यस्य। हृता प्रभा तेजो यस्य॥ ३ शुचः शोकाश्रूणि यान्युत्कंठितानि नेत्रयोरेव संस्तभ्य गलितानि च पाणिना आमृज्य परोक्षेण दर्शनाभा

सूत उवाच॥ ॥ एवं कृष्णसखः कृष्णो भ्रात्रा राज्ञा विकल्पितः॥ नानाशंकास्पदं रूपं कृष्णविश्लेषकर्शितः॥ १॥ शोकेन शुष्यद्वदनहृत्सरोजो हतप्रभः॥ विभुं तमेवानुध्यायन्नाशक्नोत्प्रतिभाषितुं॥ २॥ कृच्छ्रेण संस्तभ्य शुचश्च पाणिनामृज्य नेत्रयोः॥ परोक्षेण समुन्नद्धप्रणयौत्कंठ्यकातरः॥ ३॥ सख्यं मैत्रीं सौहृदं च सारथ्यादिषु संस्मरन्॥ नृपमग्रजमित्याह बाष्पगद्गदया गिरा॥ ४॥ अर्जुन उवाच॥ ॥ वंचितौ महाराज हरिणा बंधुरूपिणा॥ येन मेऽपहृतं तेजो देवविस्मापनं महत्॥ ५॥ यस्य क्षणवियोगेन लोको ह्यप्रियदर्शनः॥ उक्थेन रहितो ह्येष मृतकः प्रोच्यते यथा॥ ६॥ ॥

६२

वेरेण श्रीकृष्णेन हेतुना समुन्नद्धं यत्प्रेमौत्कंठ्यं तेन कातरो व्याकुलो नृपमित्याहेति दूरेणान्वयः॥ ३॥ सख्यं हितैषितां मैत्रीमुपकारितां सौहृदं सुहृत्त्वसंबंधितां बाष्पेण कंठावरोधनात् गद्गदया॥ ४॥ येन मां वंचयता देवान्विस्मापयतीति यत्तत्॥ ५॥ यस्य क्षणवियोगेनेत्यादि यच्छब्दानां तेनाहं मुषित इति सप्तमश्लोकस्थेन तच्छब्देन संबंधः॥ प्रियस्याप्यप्रियत्वे दृष्टांतः॥ उक्थेन प्राणेन एष मित्रादिः॥ ६॥ ॥

ढाव सेर

स२ ॥७॥उ२

श्रीकृष्णोपकारानुस्मृतिपूर्वं संश्रयादिति दर्शयति ॥ यस्य संश्रयात् बालान्नाम्नैरेण कामेन दर्पमदानां मतिमतां नां तेजः ॥ प्रतापो हृतं धनुर्ग्रहणेनैवापस्मार इत्युः ॥ मत्स्योलक्षी [illegible] तं यत्नेन मत्स्यो यंत्रोपरिस्थमविद्धः ॥ ततस्तान्निर्जित्य द्रौपदी प्राप्ता ॥ चं इति विस्मये ॥ [illegible] खांडवं इंद्रस्य वनं अदाह देवानां दग्धवानस्मि ॥ खांडवदाहे रक्षितेन मयेन कृता च बलात् अद्भुतशिल्परूपा माया यस्यां सा तेन अध्वरे यागे राजसूये ॥ ९ ॥ अनंतरश्लोकोक्तविनीतस्तथापि द्विष्टा ख्यायतेन नृपशिरश्छेदिप्रियस्य तं जरासंधं तं बाहुजो भीमो मखार्थं हतवान् ॥ तन्निर्जयं विना राजसूयमखानुपपत्तेः ॥ गजायुतस्येव सत्त्वमुत्साहः शक्तिवीर्यं बलं च यस्य सः ॥ तं हत्वा प्रमथनाथो महाभैरवस्तस्य मखाय ये राजानः संनाद्धास्ते यस्मान्मोचिताः ॥ तत्तस्मात्त्वं धृते बलिम [illegible] बलिमानी

यत्संश्रयाद्द्रुपदगेहमुपागतानां राज्ञां द्वयं परमुखे स्मरदर्पमदानां तेजो हृतं खलु मया लिहितश्च मत्स्यः सज्जीकृतेन धनुषाधिगता च कृष्णा ॥ ७ ॥ यत्संनिधावहमु खांडवमग्नयेऽदामिंद्रं च सामरगणं तरसा विजित्य ॥ लब्धा सभा मयकृताद्भुतशिल्पमाया दिग्भ्यो हरं च पतयो बलिमध्वरे ते ॥ ८ ॥ यस्तेजसा नृपशिरोंघ्रिमहन्मखार्थं मार्यो भुजस्य वगजायुतसर्ववीर्यः ॥ तेनाहृताः प्रमथनाथमखाय भूपाः यन्मोचिताः सदनपं बलिमध्वरे ते ॥ ९ ॥ पत्न्यास्तवाधिमखलुप्त महाभिषेकश्लाघिष्ठचारुकबरी कितवैः सभायां ॥ स्पृष्टं विकीर्य पदयोः पतिताश्रु दृष्ट्वा यस्तैः स्त्रियोऽकृत हतेशविमुक्तकेशाः ॥ १० ॥

तवांतः ॥ ९ ॥ यैः कितवैर्द्यूतैः शासनादिभिस्तव पत्न्याः कबरं वेणीलूनकेशं विकीर्य तन्मुच्य स्पृष्टं आकृष्टं तेषां स्त्रियो हतेशाः ॥ अत एव वैधव्यान्मुक्तकेशाः ॥ अहातत्र का ॥ का यं लूनं कबरं ॥ अधिमखं राजसूयमधिकृत्य कृष्णोरचितो यो महाभिषेकस्तेन श्लाघ्यतमं चारु रम्यं तच्च तत् ॥ स्मरणात्तदानीमेव प्राप्तस्य श्रीकृष्णस्यानमनेन पदयोः पतितानां च्युतानि [illegible] रवे यस्याः पत्न्याः ॥ पदश इदं स्पर्शापेक्षोऽस्यापि तत्र शब्दस्या [illegible] पदेन समासो नित्यसापेक्षत्वात् ॥ तद्विनाथे मत्यपि चिन्त्येदुःखं तर्हि को पराधस्तव [illegible] ममैवादृष्टमिति भावः ॥ १० ॥

व६

सहिते ४

ला॰ प्र॰ शिष्याणामयुतस्याग्रे तत्पंक्तौ भुंक्ते यः तस्मात् दुर्वाससो हेतोः अरिणा रचितं यत् दुरंतं कृच्छ्रं शापलक्षणं तस्मात्सकाशात् यो नोऽस्मान् वनेऽत्य जुगोप र
क्षितवान्। किं कृत्वा। शाकमेवान्नं तस्मिन्नवशिष्टं उपयुज्य गृहीत्वा यत उपयोगात् सलिले विनिमग्नो मुनीनां संघः त्रिलोकीं तृप्तामममंस्त। एवं हेलारते
६२ कथा। कदाचित् दुर्वाससो दुर्योधनेनातिथ्यं कृतं तेन च परितुष्टेन वरं वृणीष्वेत्युक्ते दुर्वाससः शापात् पांडवान् शपेयुरिति मनसि विचार्य दुर्योधने
नोक्तं। युधिष्ठिरोऽस्मत्कुले तु मुख्योऽतः तस्यापि त्वं तवैवमेव शिष्यायुतः नातिथ्यं नात्र वितर्क्यं किंतु द्रौपदी यदा भुक्त्वा नसीदेत् तदा त्वया तस्यां भुक्तवत्यां तत्र ह
गंतव्यमिति। ततस्तथैव दुर्वाससि प्राप्ते परमादरेण युधिष्ठिरेणाभ्यर्थितः आह्निकं कृत्वागम्यतामिति विज्ञापितो मुनिसंघोऽघमर्षणाय जले नि

यो नो जुगोप वनमेत्य दुरंतकृच्छ्राद्दुर्वाससोऽरिविहितादयुताग्रभुग्यः। शाकान्नशिष्टमुपयुज्य यतस्त्रिलोकीं तृप्तामममंस्त सलिले
विनिमग्नसंघः॥ ॥रामायनमः॥ ॥ ते भगव॰

ममज्जुः। तत्र चिंतातुरया द्रौपद्या स्मृतमात्रः श्रीकृष्णः स्वस्थानमेव लक्ष्मीवात्सल्यतया चागतः। तया चावेदिते वृत्तांते उक्तं द्रौपदि हे हंत बुभुक्षितोऽस्मि प्रथमं मां
भोजयेति तया चातिलज्जयोक्तं। स्वामिन् मद्भोजनपर्यंतं मदीयमक्षय्यमन्नं सूर्यदत्तस्थाल्यां मया च सर्वाः संलोज्य भुक्तमतो नास्त्यन्नमिति। तयाप्यतितिर्बं
धेन स्थालीमानाय्य तत्संलग्नं किंचिच्छाकान्नं प्राश्योक्तमनेन विश्वात्मा भगवान् प्रीयतां। अथ भो उक्तं मुनिसंघमाह्वयेति स च भगवद्भोजने
नैव तृप्तो हस्यापाकारयेन दुर्वासाः पलायितः इति लोकत्रयस्य श्रीकृष्णोदरे स्थितत्वात् त्रिलोकी तृप्तेत्युक्तेति भावः। एवमरण्यपर्वणि कथितमि ६२
स्वब्राह्मणावशिष्टान्नभुजो युधिष्ठिरस्यापद्यपि हरिकृपेति स्मरतामस्माकं चित्तक्षोभो लो लवतीति तं विना कथं लवेम ११ ॥ ॥ राम ॥ ॥

गिरिजासहितो विस्मापितः सन्निजं पाशुपतमस्त्रं। अन्येऽपि लोकपाला निजान्यस्त्राण्यददुः। अन्यदप्याश्चर्यमाह। अमुनैवेति। महत इंद्रस्यासना
र्द्धं ॥२२॥ तत्रैव स्वर्गे क्रीडतो गांडीवं लक्षणं चिह्नं यस्य तत्। अरातयो निवातकवचा दैत्यास्तेषां वधार्थमाश्रितवंतः। येनानुभावितं प्रभावयु
क्तं कृतं हे अजमीढ युधिष्ठिर तेन मुषितो वंचितोस्मि। कथंभूतेन भूम्ना निजमहिमावस्थानेन ॥२३॥ यद्बांधव इत्यादि श्लोकत्रयस्यापि तेन मु

यत्तेजसाथ भगवान्युधि शूलपाणिर्विस्मापितः सगिरिजोऽस्त्रमदान्निजं मे। अन्येऽपि चाहममुनैव कलेवरेण प्राप्तो महेंद्रभ
वने महदासनार्द्धं ॥२२॥ तत्रैव मे विहरतो भुजदंडयुग्मं गांडीवलक्षणमरातिवधाय देवाः। सेंद्राः श्रिता यदनुभावित
माजमीढ तेनाहमद्य मुषितः पुरुषेण भूम्ना ॥२३॥ यद्बांधवः कुरुबलाब्धिमनंतपारमेको रथेन ततरेऽहमतीर्यसत्वं। प्र
त्याहृतं बहुधनं च मया परेषां तेजस्पदं मणिमयं च हृतं शिरोभ्यः ॥२४॥ ॥

षितोऽहमिति पूर्वेणैव संबंधः। श्रीकृष्णबांधवः एक एवाहं कौरवसैन्याब्धिं नास्यंतो गांभीर्येण पारं च देशतो यस्य तं ततरे तीर्णवान्। उत्तरगोग्र
हे। अतीर्याणि दुस्तराणि सत्वानि तिमिंगिलादीनि भीष्मादिरूपाणि यस्मिन्। परैर्नीतं गोधनं प्रत्याहृतं। परेषां च शिरोभ्यः सका
शात्तेजस्पदं प्रभावस्यास्पदमुष्णीषरूपं मणिमयं मुकुटरत्नरूपं च बहुधनं च तान्मोहनास्त्रेण मोहयित्वाहृतं यद्बांधवेन
मया ॥२४॥ ॥राम॥ ॥

ला•प्र• अदृप्राञनन्यायेराजन्यवर्यास्तेषांरथमंडलैर्मंडिताश्चभीष्मादीनांचसूतसारथिरूपेणममाग्रेवर्त्तःसन्नूहेविलोतेतेषांरथयूथपानांअ
६२ श्वरादीनियोद्धशाहद्धैर्वञ्चार्कैर्नहृतवान्।मनोमीत्वत्साहादिशक्तिंसमहोबलं।भुजःशस्त्रादिकौशलं२५॥यस्यदोष्णुभुजेषुमामांप्रणि
हितंस्थापितंतेनैवगुर्वादिभिर्निरूपितानिप्रयुक्तानिअस्त्राणिनस्पृशंतिस्म।गुरुर्द्रोणः।त्रिगर्त्तस्त्रिगर्त्तदेशाधिपतिःसुशर्मा।शल्यः
सैंधवःसिंधुदेशाधिपतिर्जयद्रथः।बाह्लीकःशंतनोर्भ्राता।अमोघोमहिमायेषांतथाभूतान्यपि।पाठांतरेऽपिसएवार्थः।प्रतीकाराःकृपाणे रीन्यः३

योभीष्मकर्णकृपशल्यवृषध्वदत्तराजन्यवर्णैरथमंडलमंडिताग्रा।अग्रेवरोममविलोरथयूथपानामाद्युर्मनांसिच
हशामहत्रोजआर्कैतू॥२५॥यदोष्णुमांप्रणिहितंगुरुभीष्मकर्णद्रौणित्रिगर्त्तशलसैंधवबाह्लिकाद्यैः।अस्त्राण्य
मोघमहिमानिनिरूपितानिनोपस्पृशंतिहरिदासमिवाप्सराणि॥२६॥सोऽत्यैवतःक्रमतिनाम्नदईश्वरोमेयत्पा ॥ ६३
दपद्ममलवापलजंतिलव्याः।मोश्रांतवाहमरयोऽथिनोऽविस्यंनप्रहरन्नूयदृत्तलावरसचित्राः॥२७॥ ॥

यस्यशौर्यंतथातंतः।न्यूहरिदासंप्रह्लादमिवेति॥२६॥स्वापराधमनुस्मरन्नुसंतप्यमानआह।सोऽत्येसारथ्येक्रमतिनामेमयासंस्तथाक्र
मतित्वमेवाह।आमहइत्यादिना।अभयायमोन्द्वायामभ्याःश्रेष्ठाःश्रांतावाहाअश्वाश्चपेस्पतंमी।जयद्रथवधेहिजलपानंविनाअश्वाः
श्रांताःसतोरथ्यादवतीर्यरणेऽर्जुनंविनित्वाजलंसंपादितंमया।तदायस्मात्प्रभावेननिरमवित्ताअरयोमीनप्रहृतवंतः।ससौत्येऽहमिति

२ [illegible]

हृदि

हेनरदेवउदारंगंभीरंरुचिरंयत्स्मितंतेनशोभनानिनर्माणिपरिहासवाक्यानितथाकार्यप्रस्तावेषुहेपार्थेत्यादीनिमधुराक्षराणिसंजल्पितानिचस्पृशा
निमनोज्ञानिमाधवस्ययान्येतानिइदानींस्मर्तुर्मेमहृदयंलुठंतिक्षोभयंति।णिजन्तावस्वार्थः॥१९॥विकत्थनंस्वगुणश्लाघनादि।शय्यादिषुऐक्याद्वर्ति
रेकाद्धेतोः।कदाचिद्व्यलिचारंदृष्ट्वाहेवयस्यऋतवानूसत्ययुक्तस्त्वंइतिवक्रोक्त्याविप्रलब्धस्तिरस्कृतोऽपि।ऋतभूमानूइतिऋतसबोदेवाः।मेवकाः।संतियस्यअ
सौमहानपिवयस्यइतिमत्वाविप्रलब्धःतिरस्कृतइत्यर्थः।मेअघंअपराधंअसहतमहितयामहत्वेन।एकपदेअतिमहत्वेनेत्यर्थः।सख्युर्वंसखेव

नर्माण्युदाररुचिरस्मितशोभनानिहेपार्थहे र्जुनसखेकुरुनंदनेति।संजल्पितानिनरदेवहृदिस्पृशानिस्मर्तुर्लुठंतिहृदयंममभाधवस्य॥१८॥
शय्यासनाटनविकत्थनभोजनादिष्वैक्याद्वयस्यऋतवानितिविप्रलब्धः।सख्युःसखेवपितृवत्तनयस्यसर्वंसेहेमहान्महितयाकुम
तेरघंमे॥१९॥सोहंनृपेंद्ररहितःपुरुषोत्तमेनसख्याप्रियेणसुहृदाहृदयेनशून्यः।अध्वन्युरुक्रमपरिग्रहमंगरक्षन्गोपैरसद्भि
रबलेवविनिर्जितोऽस्मि॥२०॥रामायनमः॥ ॥ ॥ ६ ॥ ॥श्रीकृष्णायनमः॥ ॥

वि

तेनस्थावंपितेव॥१९॥त्वयाशंकितंपराजयंप्राप्तोहमित्याह।सोहमिति।तेनसख्यारहितोऽतोहृदयेनशून्यः।अंगहेराजन्।उरुक्रमस्यपरि
ग्रहंषोडशसहस्रस्त्रीलक्षणां।असद्भिर्गोपैः।अबलायोषेवविनिर्जितोस्मि॥२०॥ ॥श्रीकार्त्तवीर्यायनमः॥ ॥केशवायनमः॥
महादेवायनमः॥ ६ ॥दुर्गादेवायनमः॥ ॥महादेवायनमः॥ ॥केशवायनमः॥ ॥रामायनमः॥ ॥

श्रीकृष्णवियोग एवात्र हेतुर्नान्य इत्याह। तद्वै इत्यादि। यतो येभ्यः ईशेन रिक्तं शून्यमसत्कार्याक्षमं सन्मंत्रविधानैरपि भस्मनि भस्मतः इत्यत्र सप्तमीलोपश्चार्षः। हुतमिव वृथेति प्रीतादपि कुहकान्मायाविनः सकाशात् राद्धं लब्धं यथा सम्यक्कर्षणादिनाऽप्यूषरभूमौ उप्तं बीजमिव। २१ सुहृत्पुरे त्वया पृष्टानां नः सुहृदां मध्ये चत्वारः पंच वाऽवशेषिताः। तत्र हेतुः विप्रशापेत्यादि। २२ वारुणीं अन्नमयीं अजानतामिवान्योन्यमेरकामुष्टिभिर्निघ्नतां। २३

तद्वै धनुस्त इषवः स रथो हयास्ते सोहं रथी नृपतयो यत आनमंति। सर्वं क्षणेन तदभूदसदीशरिक्तं भस्मन्हुतं कुहकराद्धमिवोप्तमूष्यां ॥२१॥ राजंस्त्वयानुपृष्टानां सुहृदां नः सुहृत्पुरे। विप्रशापविमूढानां निघ्नतां मुष्टिभिर्मिथः ॥२२॥ वारुणीं मदिरां पीत्वा मदोन्मथितचेतसां। अजानतामिवान्योन्यं चतुःपंचावशेषिताः ॥२३॥ प्रायेणैतद्भगवत ईश्वरस्य विचेष्टितं। मिथो निघ्नंति भूतानि भावयंति च यन्मिथः ॥२४॥ जलौकसां जले यद्वन्महांतोदंत्यणीयसः। दुर्बलान्बलिनो राजन्महांतो बलिनो मिथः ॥२५॥ एवं बलिष्ठैर्यदुभिर्महद्भिरितरान्विभुः। यदून्यदुभिरन्योन्यं भूभारान्संजहार ह ॥२६॥ देशकालार्थयुक्तानि हृत्तापोपशमानि च। हरंति स्मरतश्चित्तं गोविंदाभिहितानि मे ॥२७॥ ॥

अवशेषिता इत्यनेनोक्तं हेतुकर्तारमाह। प्रायेणेत्यादि। त्रिभिः। भावयंति पालयंति। २४ जलौकसां मत्स्यानां मध्ये महांतः स्थूलाः अणीयसः सूक्ष्मान्। यथा भक्षयंति। २५ भुवो भारभूतान् संहृतवान्। २६ अतः पूर्ववत्कर्तुं न शक्नोमीति सूचयन्नाह देशेत्यादि। देशकालोचितार्थयुक्तानि। मनःपीडोपशमकराणि च गोविंदस्य वचनानि स्मरतो मम चित्तं हरंति आकर्षंति ॥२७॥ ॥

पुमा॰प्राप॰

एवमिति स्तुतोक्तिः॥ अतिदृढेन स्नेहेन चिंतयतो जिष्णोरर्जुनस्य मतिः शांता विशोकातिमला विरक्ता चासीत्॥ २८॥ मतिवैमल्यफलमाह॥ वासुदेवांघ्र्यनुध्यानेन परिबृंहितं रंहो वेगो यस्याः तया भक्त्या निर्मथिता उन्मूलिता अशेषाः कषायाः कामादयो यस्याः सा धिषणा बुद्धिर्यस्य सः॥ ज्ञानं पुनरध्युगमदित्युत्तरेणान्वयः॥ २९॥ कालेन कर्मभिस्तमसा भोगाभिनिवेशेन च रुद्धमावृतं सत्॥ ३०॥ ज्ञानफलमाह॥ विशोक इति॥ एतदेव शोकहेत्वभावेनोपपादयति॥ शोकस्य हि हेतुर्द्वैतभ्रमस्तद्देहस्य स्थूलस्य लिंगस्य गुणास्तेषामविद्याय यतो जिष्णोः कृष्णपादांघ्र्यनुध्यानं ततो ब्रह्मसंपत्त्या ब्रह्म

सूत उवाच॥ ॥ एवं चिंतयतो जिष्णोः कृष्णपादसरोरुहं॥ सौहार्देनातिगाढेन शांतासीद्विमला मतिः॥ २८॥ वासुदेवांघ्र्यनुध्यानपरिबृंहितरंहसा॥ भक्त्या निर्मथिताशेषकषायधिषणोऽर्जुनः॥ २९॥ गीतं भगवता ज्ञानं यत्तत्संग्राममूर्द्धनि॥ कालकर्मतमोरुद्धं पुनरध्यगमद्विभुः॥ ३०॥ विशोको ब्रह्मसंपत्त्या संछिन्नद्वैतसंशयः॥ लीनप्रकृतिनैर्गुण्यादलिंगत्वादसंभवः॥ ३१॥ निशम्य भगवन्मार्गं संस्थां यदुकुलस्य च॥ स्वःपथाय मतिं चक्रे निभृतात्मा युधिष्ठिरः॥ ३२॥ ॥

ह्मेति ज्ञानेन लीना प्रकृतिरविद्या यस्मिन् तत्तन्नैर्गुण्यं भवति न तु सुषुप्तिप्रलययोरिवाविद्याशेषस्तस्मान्नैर्गुण्याद्गुणकार्यलिंगनाशोऽलिंगत्वादसंभवः॥ सम्यग्भोगाय भवति पुनः पुनरिति संभवः स्थूलशरीरं तद्रहितश्च तत्परिच्छेदाभावात् संछिन्नो द्वैतलक्षणः संशयो यस्य स च विशोको जात इति॥ ३१॥ भगवतो मार्गमालक्ष्य यदुकुलस्य संस्थां नाशं श्रुत्वा नारदोक्तं वा स्मृत्वा स्वःपथाय स्वर्गमार्गाय निभृतात्मा निश्चलचित्तः सन् मतिं कृतवान्॥ ३२॥ ॥राम॥ ॥

१२मः

तां द्विविधां यां वक्ष्यति हि हि सौदामिन्या यथाकाशे यांत्या हित्वाऽभ्रमंडलं गतिर्न लक्ष्यते मर्त्यैस्तथा कृष्णस्य दैवतैरिति संसृतेरुपरराम जीवन्मुक्तासीत् ॥ ततो देहं जहाविति चे ॥ ३३ ॥ तदेवमुक्तमपि यादवेभ्यो भगवतो वैलक्षण्यमज्ञात्वा तत्साम्यं वदतो मंदमतीन्प्रति वैलक्षण्यं स्पष्टयति ॥ ययेत्यादि द्वाभ्यां ॥ ययापादवद्रूपया तन्वा भुवो भारकंटकेन कंटकमिवाहरत् ॥ यादवतनुर्भूभारतनुश्चेति द्वयमपीश्वरस्य संहार्यत्वेन सममेव ॥ ३४ ॥ श्रीकृष्णमूर्तेर्विशेषमाह ॥ यथेति ॥ तान्यपि यथा धत्ते जहाति च ॥ तदाह ॥ यथा नटो निजरूपेण स्थित एव रूपांतरं धत्ते त्यजति च ॥ तथा तदपि

पृथाप्यनुश्रुत्य धनंजयोदितं नाशं यदूनां भगवद्गतिं च तां ॥ एकांतभक्त्या भगवत्यधोक्षजे निवेशितात्मोपरराम संसृतेः ॥ ३३ ॥ यया हरद्भुवो भारं तां तनुं विजहावजः । कंटकं कंटकेनेव द्वयं चापीशितुः समं ॥ ३४ ॥ यथा मत्स्यादिरूपाणि धत्ते जह्याद्यथा नटः । भूभारः क्षपितो येन जहौ तच्च कलेवरं ॥ ३५ ॥ यदा मुकुंदो भगवानिमां महीं जहौ स्वतन्वा श्रवणीयसत्कथः । तदाहरेवाप्रतिबुद्धचेतसामभद्रहेतुः कलिरन्ववर्तत ॥ ३६ ॥ युधिष्ठिरस्तत्परिसर्पणं बुधः पुरे च राष्ट्रे च गृहे तथात्मनि । विभाव्य लोभानृतजिह्महिंसनाद्यधर्मचक्रं गमनाय पर्यधात् ॥ ३७ ॥ ॥

कलेवरं जहौ स्वांतरभावादित्यर्थः ॥ ३५ ॥ युधिष्ठिरस्य स्वर्गारोहणं प्रसंगाय कलिप्रवेशमाह ॥ यदा मुकुंद इत्यादि ॥ स्वतन्वा जहौ स्वतनोरेव वैकुंठारोहात् श्रवणीया सती कथा यस्य ॥ तदा यदहस्मिन्नेव अहहरिति भुवसमस्त्यक्तपदं ॥ अप्रतिबुद्धचेतसामिति विवेकिनां तु न प्रभुरित्युक्तं ॥ अन्ववर्ततेति पूर्वमेवांशेन प्रविष्टस्य तेन रूपेणानुवृत्तिरुक्ता ॥ ३६ ॥ बुधो युधिष्ठिरस्तस्य कलेः परिसर्पणं प्रसरणं विलोक्य कथंभूतं लोभाद्यधर्मचक्रं यत्र ॥ जिह्मं कौटिल्यं पर्यधात् ॥ तदुचितं परिधानमकरोत् ॥ ३७ ॥ ॥ ९ ॥ ॥ श्रीरामयनमः ॥ ॥

ध्यात्मनः स्वस्य गुणैरनवमं स्वसममतिसदृशं ॥ तोयं सर्वतः स्थितं समुद्रोदकमेव नीवी परिधानविशेषो यस्यास्तस्या भूमेः ॥ पतित्वेनाभिषिक्तवान् ॥
॥ ३८ ॥ वज्रमनिरुद्धस्य पुत्रं निरूप्य कृत्वेत्यर्थः ॥ अपिबत् आत्मन्यारोपयामास ईश्वरः समर्थः ॥ ३९ ॥ संछिन्नान्यशेषाणि बंधनानि निरुपाध
योयेन ॥ ४० ॥ तदेव दर्शयति ॥ वाचमित्यादि द्वाभ्यां ॥ वाचमित्युपलक्षणं सर्वेंद्रियाणि मनसि प्रविलापितवानित्यर्थः ॥ तच्च मनः प्राणे प्राणाधी
नवृत्तित्वात् ॥ तं प्राणं इतरे अपाने तेनाकर्षणात् ॥ अपानव्यापारस्तु सर्गः तत्सहितं तमपानं मृत्यौ तदधिष्ठातृदेवतायां ॥ अनेनैव वागादिष्वपि तद्व

स्वराट्पौत्रं विनयिनमात्मनोऽनवमं गुणैः ॥ तोयनीव्याः पतिं भूमेरभ्यषिंचद्गजाह्वये ॥ ३८ ॥ मथुरायां तथा वज्रं शूरसेनपतिं ततः ॥ प्राजा
पत्यां निरूप्येष्टिमग्नीनपिबदीश्वरः ॥ ३९ ॥ विसृज्य तत्र तत्सर्वं दुकूलवलयादिकं ॥ निर्ममो निरहंकारः संछिन्नाशेषबंधनः ॥ ४० ॥ वा
चं जुहाव मनसि तत्प्राण इतरे च तं ॥ मृत्यावपानं सोत्सर्गं तं पंचत्वे ह्यजोहवीत् ॥ ४१ ॥ त्रित्वे हुत्वा च पंचत्वं तच्चैकत्वे जुहोन्मुनिः ॥
सर्वमात्मन्यजुहवीद्ब्रह्मण्यात्मानमव्यये ॥ ४२ ॥ ॥ ॥

र्गसाहित्यं ज्ञेयं ॥ तं चतुष्टं पंचत्वे पंचभूतानामैक्ये देहे ॥ देहस्यैव मृत्युर्नात्मन इति भावितवानित्यर्थः ॥ अजोहवीदिति यङ्लुगंतात् लुङि रूपं ॥
॥ ४१ ॥ त्रित्वे गुणत्रये तच्च त्रित्वं एकत्वे अविद्यायां सर्वं सर्वारोपहेतुमविद्यामात्मनि जीवे अजोहवीदिति वक्तव्ये अजुहवीत्यार्षं एवं शो
धितमात्मानं ब्रह्मणि अव्यये कूटस्थेन तस्यान्यत्र लय इत्यर्थः ॥ ४२ राम

तदेवमात्मप्रतिपत्तिमुक्त्वा बाह्यस्थितिमाह चीरवासा इति द्वाभ्यां बद्धवाक् मौनी ॥४३ अनपेक्षमाणोऽनुजादिप्रतीक्षामकुर्वन् ॥ आशां दिशं । गतपूर्वां पूर्वैः प्रविष्टां ॥४४ य
तो यां दिशं ॥४५ अधर्ममित्रं यस्य तेन । साधुकृताः सर्वेर्था धर्मादयो यैस्ते ॥४६ अत एव वैकुंठस्य चरणांबुजमेव आत्यंतिकं शरणं ज्ञात्वा ॥४७ कथंभूतैः पदे विधू
तकल्मषाणां स्थानं निवासस्थानं । यद्यस्मिन् विरजेनात्मनैव प्राप्तुं न तु षोडशकलेन लिंगेन आगतेर्वा विशेषणं विरजेनात्मनैवावस्थानरूपां गतिं ते विधू

चीरवासा निराहारो बद्धवाङ्मुक्तमूर्द्धजः । दर्शयन्नात्मनो रूपं जडोन्मत्तपिशाचवत् ॥४३॥ अनपेक्षमाणो निरगादशृण्वन्बधिरो यथा । उदी
चीं प्रविवेशाशां गतपूर्वां महात्मभिः ॥४४॥ हृदि ब्रह्म परं ध्यायन्नावर्तेत यतो गतः । सर्वे तमनुनिर्जग्मुर्भ्रातरः कृतनिश्चयाः ॥४५॥ कलिना
धर्ममित्रेण दृष्ट्वा स्पृष्टाः प्रजा भुवि ॥ ते साधुकृतसर्वार्था ज्ञात्वात्यंतिकमात्मनः ॥४६॥ मनसा धारयामासुर्वैकुंठचरणांबुजं । तद्ध्यानो
द्रिक्तया भक्त्या विशुद्धधिषणाः परे ॥४७॥ तस्मिन्नारायणपदे एकांतमतयो गतिं । अवापुर्दुरवापां ते असद्भिर्विषयात्मभिः ॥४८॥ विधू
तकल्मषा स्थानं विरजेनात्मनैव हि । विदुरोऽपि परित्यज्य प्रभासे देहमात्मवान् ॥४९॥ कृष्णावेशेन तच्चित्तः पितृभिः स्वक्षयं ययौ । द्रौपदी
च तदाज्ञाय पतीनामनपेक्षतां ॥५०॥ वासुदेवे भगवति ह्येकांतमतिराप तं । यः श्रद्धयैतद्भगवत्प्रियाणां पांडोः सुतानामिति संप्रयाणं ॥५१
शृणोत्यलं स्वस्त्ययनं पवित्रं लब्ध्वा हरौ भक्तिमुपैति सिद्धिं ॥५२॥ ॥इति श्रीभागवते महापुराणे प्रथमे पंचदशोऽध्यायः ॥ ॥

तकल्मषाः प्रापुरिति ॥४८॥ तीर्थाटनं कुर्वन् प्रभासे श्रीकृष्णावेशेन कृष्णैकचित्तमावेश्य देहं परित्यज्य तच्चित्तः एवं सन् तदानीं नेतुमागतैः पितृभिरर्यमादिभिः सह
स्वक्षयं स्वाधिकारस्थानं ययौ ॥४९॥ माण्डव्यशापात् यमो विदुरो भूत्वा धर्मादिकं कृत्वा शापनिर्मुक्तः पुनरपि यमो भवदित्यर्थः ॥५०॥ आत्मानं प्रति अ
नपेक्षतां तदाज्ञाय ज्ञात्वा तं नारायणमाप ॥५१॥ इति एवं प्रयाणं अलं अतिशयेन स्वस्त्ययनं मंगलास्पदं अलं पवित्रं च ॥ ॥इति प्रथमे पंचदशो

ततश्च षोडशे भूमिधर्मयोः कलिखिन्नयोः ॥ संवादेनएतेत्रास्त्रिः पालकस्य परीक्षितः ॥ १ ॥ द्विजवर्याणां शिक्षया सूत्यां जन्मन्यभिजातकोविदः जातकर्मविदः ॥ हे विप्र महतां गुणा यस्मिन् सः ॥ १ ॥ जनमेजयादीनित्यक्षराधिक्यं छांदसं ॥ २ ॥ आजहार कृतवानित्यर्थः ॥ शारद्वतं कृपं यत्र येष्वश्वमेधेषु ३ निजग्राह निगृहीतवान् ॥ कलिमेव निर्दिशति नृपेति ४ कस्य हेतोरिति ॥ अयमर्थः कलिं कस्माद्धेतोः केवलं निजग्राह न तु ह

सूत उवाच ॥ ततः परीक्षिद्द्विजवर्यशिक्षया महीं महाभागवतः शशास ह ॥ यथा हि सूत्यामभिजातकोविदाः समादिशन्विप्र महद्गुणस्तथा ॥ १ ॥ स उत्तरस्य तनयामुपयेम इरावतीं ॥ जनमेजयादींश्चतुरस्तस्यामुत्पादयत्सुतान् ॥ २ ॥ आजहाराश्वमेधांस्त्रीन् गंगायां भूरिदक्षिणान् ॥ शारद्वतं गुरुं कृत्वा देवा यत्राक्षिगोचराः ॥ ३ ॥ निजग्राहौजसा वीरः कलिं दिग्विजये क्वचित् ॥ नृपलिंगधरं शूद्रं घ्नंतं गोमिथुनं पदा ॥ ४ ॥ श्रीशौनक उवाच ॥ कस्य हेतोर्निजग्राह कलिं दिग्विजये नृपः ॥ नृदेवचिह्नधृक् शूद्रकोऽसौ गां यः पदाहनत् ॥ ५ ॥ तत्कथ्यतां महाभाग यदि कृष्णकथाश्रयं ॥ अथवास्य पदांभोजमकरंदलिहां सतां ॥ ६ ॥ किमन्यैरसदालापैरायुषो यदसद्व्ययः ॥

तवान् यतोऽसौ शूद्रकः अतिकुत्सितः ॥ यो गां पदा अहन्निति ॥ अहनदिति छांदसं ॥ ५ ॥ अथवा विकल्पः पदांभोजयोर्यो मकरंदस्तं लिहंतीत्या ह्लादयंति ये तेषां सतां महतां वा कथाश्रयमिति समासान्तिः कृष्णस्याद्भुतं प्रयोगः ॥ तर्हि कथ्यतां नो [illegible] किमन्यैरसद्भिरालापैः ॥ यत्र यैरायुषो व्ययात्कृपैः ॥ ६ ॥

चेट

अस्माकमयं सत्रप्रयत्नोऽपि हरिकथामृतपानार्थ एवेत्याह । क्षुद्रेत्यादिसार्द्धद्वाभ्यां । क्षुद्रमल्पमायुर्येषां ते तेषामंग ॥ अतो मर्त्यानां मरणवतां तथापि
अमृतं सत्यं मोक्षमिच्छतां यो मृत्युः स इह सत्रे शामित्रे रिदं शामित्रं कर्म पशुहिंसनं तदर्थं उपाहूतः ॥ ७ ततः किमत आह न कश्चिदिति ॥ ८ ततोऽपि कि
मत आह । अहो नृलोके हरिकथामृतं वचः पीयेत ते तदर्थं लीलेवामृतं यस्मिन् ॥ ९ तदभावे वृथैव जीवनमित्याह । मंदस्येति अलसस्य नक्तं रात्रौ य
द्वयः आयुश्च निद्रयादिवा अक्रिच यद्वयस्तद्व्यर्थकर्मभि ह्रियते ॥ १० तत्र तावत्कलिनिग्रहप्रसंगमाह । यदा निजचक्रवर्तिते स्वसेनयापालि

क्षुद्रायुषां नृणामंग मर्त्यानामृतमिच्छतां । इहोपहूतो भगवान्मृत्युः शामित्रकर्मणि ॥ ७ ॥ न कश्चिन्म्रियते तावद्यावदास्त इहांत
कः । एतदर्थं हि भगवानाहूतः परमर्षिभिः ॥ ८ ॥ अहो नृलोके पीयेत हरिलीलामृतं वचः । यस्मिन्नीते कृतं सर्वमिष्टापूर्त्ता
दिकं भवेत् ॥ ९ ॥ मंदस्य मंद प्रज्ञस्य वयो मंदायुषश्च वै । निद्रया ह्रियते नक्तं दिवा च व्यर्थकर्मभिः ॥ १० ॥ सूत उवाच ॥ यदा प
रीक्षित्कुरुजांगलेवसन् कलिं प्रविष्टं निजचक्रवर्तिते । निशम्य वार्त्तामनतिप्रियां ततः शरासनं संयुगशौंडिराददे ॥ ११ ॥ स्वलंकृ
तं श्यामतुरंगयोजितं रथं मृगेंद्रध्वजमास्थितः पुरात् । वृतो रथाश्वद्विपपत्तियुक्तया स्वसेनया दिग्विजयाय निर्गतः ॥ १२ ॥

तद्देशे कलिं प्रविष्टं श्रुत्वा तदा तामनतिप्रियां वार्त्तां किंचित्प्रियां न यतो युद्धकौतुके संपन्ने निशम्य ततः शरासनं दुष्टनिग्रहार्थमाददे । सं
युगशौंडिर्युद्धे प्रगल्भः । पाठोतरे युद्धे शौरितुल्यः ॥ ११ ततः स दिग्विजयाय निर्गतः । कथंभूतः । रथमास्थित आरूढः । कीदृशं मृ
गेंद्रध्वजं । श्यामतुरंगयोजितं रथं । पुनः कथंभूतः रथाश्वद्विपपत्तियुक्तया सेनयावृतो वेष्टितः ॥ १२ ॥ राम ॥

भद्राश्वादीनि पूर्वपश्चिमदक्षिणोत्तरतः सउडुलमानि वर्षाणि मेरोः सर्वत इलावृतं तत उत्तरतो रम्यकं हिरण्मयं च दक्षिणतो हरिवर्षं किंपुरुषं चा
तानि विजित्य १३ प्रगीयमानं यशः ॥ कृष्णादीनि शृण्वन् तेभ्यो ददाविति तृतीयेनान्वयः ॥ १४ किंच स्निग्धेषु पांडवेषु विष्णोर्यानि सारथ्या
दीनि कर्माणि तानि शृण्वन् तथा विष्णोर्जगत्कर्तृकां प्रणतिं च शृण्वन् नृपतिः परीक्षित् विष्णोश्चरणारविंदे भक्तिमकरोत् ॥ पारषदमिति

भद्राश्वं केतुमालं च भारतं चोत्तरान्कुरून् । किंपुरुषादीनि सर्वाणि विजित्य जगृहे बलिं ॥ १३ ॥ तत्र तत्रोपशृण्वानः स्वपूर्वेषां
महात्मनां । प्रगीयमानं च यशः कृष्णमाहात्म्यसूचकं ॥ १४ ॥ आत्मानं च परित्रातमश्वत्थाम्नोऽस्त्रतेजसः । स्नेहं च वृष्णिपार्था
नां तेषां भक्तिं च केशवे ॥ १५ ॥ तेभ्यः परमसंतुष्टः प्रीत्युज्जृंभितलोचनः । महाधनानि वासांसि ददौ हारान्महामनाः ॥ १६ ॥ सार
थ्यपारषदसेवनसख्यदौत्यवीरासनानुगमनस्तवनप्रणामं । स्निग्धेषु पांडुषु जगत्प्रणतिं च विष्णोर्भक्तिं करोति नृपतिश्च
रणारविंदे ॥ १७ ॥ तस्यैवं वर्तमानस्य पूर्वेषां वृत्तिमन्वहं । नातिदूरे किलाश्चर्यं यदासीत्तन्निबोध मे ॥ १८ ॥ धर्मः पदैकेन चरन्विच्छा
यामुपलभ्य गां । पृच्छति स्माश्रुवदनां विवत्सामिव मातरं ॥ १९ ॥

रेफषकारयोर्विश्लेषश्छांदसः ॥ तत्र पार्षदं सभापतित्वं ॥ सेवनं चित्रानुवृत्तिः ॥ वीरासनं रात्रौ खड्गहस्तस्य तिष्ठतो जागरणं ॥ १७ ॥ इतिम
तु वर्तमानस्य नातिदूरे शीघ्रमेव ॥ १८ ॥ धर्मो वृषरूपः ॥ विच्छायां हतप्रभां गां गोरूपां पृथ्वीं विवत्सां नष्टापत्यां ॥ १९ ॥ राम

तेऽआत्मनो देहस्य यद्यपि बहिरामयो न लक्ष्यते तथापि अंतर्मध्ये आधिः पीडा यस्याः सां त्वामालक्षये केन यतो विच्छायासि । अत ईषत् म्लाय-
ता वैवर्ण्यं भजता मुखेन लिंगेन । तत्र कारणविकल्पान्पृच्छति दूरे बंधुमित्यादि पंचभिः । दूरे स्थितं २० त्रिभिः पादैर्न्यूनं अत एवैकपादं मा-
मां वृषलैः अत ऊर्ध्वं भोक्ष्यमाणं च स्वमात्मपदविशेषणत्वात् ॥ हृता यज्ञभागा येषां यज्ञाकरणात् ॥ २१ हे उर्वि पृथ्वि भर्तृभिररक्ष्यमा-
णाः स्त्रियः पितृभिररक्ष्यमाणान् बालान् अथ उत तैरेव पुरुषादैरिव निर्दयैः आर्त्तान् क्लिष्टान् । वाचं देवीं सरस्वतीं कुकर्मनि दुराचारे स्थि-

धर्म उवाच ॥ कच्चिद्भद्रेऽनामयमात्मनस्ते विच्छायासि म्लायतेषन्मुखेन । आलक्षये भवतीमंतराधिं दूरे बंधुं शोचसि कंचनाम्ब ॥ २० ॥ पादैर्न्यू-
नं शोचसि मैकपादमात्मानं वा वृषलैर्भोक्ष्यमाणं । आहो सुरादीन् हृतयज्ञभागान् प्रजा उत स्विन्मघवत्यवर्षति ॥ २१ ॥ अरक्ष्यमाणाः
स्त्रिय उर्वि बालान् शोचस्यथो पुरुषादैरिवार्त्तान् । वाचं देवीं ब्रह्मकुले कुकर्मण्यब्रह्मण्ये राजकुले कुलाग्र्यान् ॥ २२ ॥ किं क्षत्रबंधू-
न् कलिनोपसृष्टान् राष्ट्राणि वा तैरवरोपितानि । इतस्ततो वाऽशनपानवासःस्नानव्यवायोन्मुखजीवलोकं ॥ २३ ॥ यद्वाऽम्ब ते भूरि-
भरावतारकृतावतारस्य हरेर्धरित्रि । अंतर्हितस्य स्मरती विसृष्टा कर्माणि निर्वाणविलंबितानि ॥ २४ ॥ इदं ममाचक्ष्व तवाधिमूलं व-
सुंधरे येन विकर्शितासि ॥ कालेन वा ते बलिनां बलीयसा सुरार्चितं किं हृतमघसौभगं ॥ २५ ॥ ॥

तां कुलाग्र्यान् ब्राह्मणोत्तमान् राजसेवकान् ॥ २२ ॥ उपसृष्टान् व्याप्तान् । अवरोपितानि ॥ व्यवायो मैथुनं निषेधानादरेण सर्वतोऽशनादिषून्मुखं प्रवर्त्त-
मानं जीवलोकं वा ॥ २३ ॥ हे अंब मातर्धरित्रि ते तव यो भूरिभारस्तस्यावतारणार्थं कृतावतारस्य । कर्माणि स्मरती तेन विसृष्टा सती शोचसि । निर्वाणं विलंबित-
माश्रितं येषु तानि पाठांतरे निर्वाणं विडंबितं उपहसितं यैः । मो न्दादप्यधिकसुखानीत्यर्थः ॥ २४ ॥ हे अंब ते सौभागं कालेन वा हृतं ॥ २५ ॥ श्रीराम

उद्भासितानि

भवान्ज्ञानात्येव तथापि वक्ष्यामीत्याह। भवानित्यादि। येन हेतुभूतेन त्वं चतुर्भिः पादैर्वर्त्तसे यत्र च सत्यादयो गुणा न वियंति तेन श्रीनिवासेन रहितं लोकं शोचामीति
षष्ठेनान्वयः। २६। सत्यं यथार्थभाषणं। शौचं शुद्धत्वं। दया परदुःखासहनं। क्षांतिः क्रोधप्राप्तौ चित्तसंयमनं। त्यागः अर्थिषु मुक्तहस्तता। संतोषो
लंबुद्धिः। आर्जवं अवक्रता। शमो मनोनैश्चल्यं। दमो बाह्येंद्रियाणां नैश्चल्यं। तपः स्वधर्मः। साम्यं शत्रुमित्राद्यभावः। तितिक्षा परापराधसहनं।
उपरतिर्लाभप्राप्तावौदासीन्यं। श्रुतं शास्त्रविचारः। २७। ज्ञानमात्मविषयं। विरक्तिर्वैतृष्ण्यं। ऐश्वर्यं नियंतृत्वं। शौर्यं संग्रामोत्साहः। तेजः प्रभा

धरण्युवाच॥ भवान्हि वेद तत्सर्वं यन्मां धर्मानुपृच्छसि॥ चतुर्भिर्वर्त्तसे येन पादैर्लोकसुखावहैः॥ २६॥ सत्यं शौचं दया क्षांतिस्त्यागः संतो
ष आर्जवं। शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतं॥ २७॥ ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः। स्वातंत्र्यं कौशलं कांतिर्धैर्यं मा
र्दवमेव च॥ २८॥ प्रागल्भ्यं प्रश्रयं शीलं सह ओजो बलं भगः। गांभीर्यं स्थैर्यमास्तिक्यं कीर्त्तिर्मानोऽनहंकृतिः॥ २९॥ इमे चान्ये
च भगवन्नित्या यत्र महागुणाः। प्रार्थ्या महत्त्वमिच्छद्भिर्न वियंति स्म कर्हिचित्॥ ३०॥ तेनाहं गुणपात्रेण श्रीनिवासेन सांप्रतं। शोचामि
रहितं लोकं पाप्मना कलिनेक्षितं॥ ३१॥ आत्मानं चानुशोचामि भवंतं चामरोत्तमं। देवान्पितॄनृषीन्साधून्सर्वान्वर्णांस्तथाश्रमान्॥ ३२॥

वः। बलं दक्षत्वं। स्मृतिः कर्त्तव्यार्थानुसंधानं। स्वातंत्र्यमपराधीनता। कौशलं क्रियानिपुणता। कांतिः सौंदर्यं। धैर्यमव्याकुलता। मार्दवं चित्ताकाठिन्यं। २८। प्रागल्भ्यं
प्रतिभातिशयः। प्रश्रयो विनयः। शीलं सुस्वभावः। सह ओजो बलानि मनसो ज्ञानेंद्रियाणां कर्मेंद्रियाणां च पाटवानि। भगो भाग्यभोगास्पदत्वं। गांभीर्यं मनक्षो
भ्यत्वं। स्थैर्यमचंचलता। आस्तिक्यं श्रद्धा। कीर्त्तिर्यशः। मानः पूज्यत्वं। अनहंकृतिर्गर्वाभावः॥ २९॥ एते एकोनचत्वारिंशत्। अन्ये च ब्रह्मण्यत्वशरण्यत्वाद
यो महांतो गुणा यस्मिन्नित्याः सहजा न वियंति न क्षीयंते स्म। ३०। तेन गुणपात्रेण गुणालयेन। पाप्मना पापहेतुना ईक्षितं दृष्टं लोकं ३१ भवंतमात्मानं देवान्
ऋषीन्। साधून्। वर्णान्। आश्रमानेतत्सर्वं शोचामि ३२॥

मा ६

स्व ३

भा०प्र०
६९

तद्यविरहोतीव दुःसह इत्याह ब्रह्मादय इत्यादिचतुर्भिः ब्रह्मादयो यस्याः श्रियोऽपांगमोक्षः स्वस्मिन् दृष्टिपातस्तत्कामाः संतो बहुतिथं बहुकालं तपः समचरन् सम्यक्चरंति स्म भगवद्भिरलब्धैः प्रपन्ना आश्रिता अपि सा श्रीर्यस्य पादतलावरणं अलमनुरक्ता सती सेवते ३३ तस्य भगवतः श्रीमद्भिः पादैः। केतुर्ध्वजः। अब्जादयः केतवश्चिह्नानि येषां तैः। यद्वा अब्जादीनामाश्रयैः समपदैरलंकृतमंगं यस्याः सा अहं ततो भगवतो विभूतिं संपदमुपलभ्य प्राप्य ग

ब्रह्मादयो बहुतिथं यदपांगमोक्षकामास्तपः समचरन् भगवत्प्रपन्नाः। सा श्रीः स्ववासमरविंदवनं विहाय यत्पादसौभग
मलं भजतेऽनुरक्ता ॥ ३३ ॥ तस्याहमब्जकुलिशांकुशकेतुकेतैः श्रीमत्पदैर्भगवतः समलंकृतांगी त्रीनत्यरोचमुपल
भ्य ततो विभूतिं लोकान्स मां व्यसृजदुत्स्मयतीं तदंते ॥ ३४ ॥ यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानु ६
ददात्मतंत्रः। त्वां दुःस्थमूनपदमात्मनि पौरुषेण संपादयन्यदुषु रम्यमबिभ्रदंगं ॥ ३५ ॥ ॥ राम ॥

त्रीन् लोकान् अतिक्रम्य अरोचे शोभितवत्यस्मि। पश्चात् यस्या विभूतेर्नाशकाले प्राप्ते सति उत्स्मयंतीं गर्वं कुर्वाणां मां स व्यसृजत् त्यक्तवान् ३४ ६९
किं च। यो वै इत्यादि। आसुरा एव वंशो येषां तेषां राज्ञां अक्षौहिणीशतरूपं ममातिभरं अपनीतवान् त्वां च ऊनपादत्वात् दुःस्थं संतं पौरुषेण पुरु
षकारेण आत्मनि स्वस्मिन् संपूर्णपदं स्वस्थं संपादयन् लक्षणहेत्वोः क्रियायाः इति हेतौ शतृप्रत्ययः। संपादयितुमित्यर्थः। अबिभ्रत् धृत
वानित्यर्थः ॥ ३५ ॥

तस्य विरहं को वा सहेत । प्रेमावलोकश्च रुचिरस्मितं वल्गुजल्पश्च तैः मधुमानिनीनां सत्यभामादीनां गर्वसहितं स्थैर्यं स्वबलं यो ह्यहरत ।
यस्यांघ्रिरजस्थिते विटंकितायाः । अलंकृतायाः । समस्यादिमिषेण रोमोत्सवोऽभवति ॥३६॥ कथयतोः । सतोः । प्राचीं पूर्ववाहिनीं कुरु
क्षेत्रे ॥३७॥ प्रथमे षोडशः ॥ ॥ ततः । सप्तदशे राज्ञः । कलेर्निग्रह उच्यते ॥ तस्यैवं वीर्यभाजोऽपि वैराग्यं वक्तुमद्भुतं ॥१॥ हन्यमानं ताड्यमानं ॥

को वा सहेत विरहं पुरुषोत्तमस्य प्रेमावलोकरुचिरस्मितवल्गुजल्पैः । स्थैर्यं समानमहरन्मधुमानिनीनां रोमोत्सवो मम य
दंघ्रिविटंकितायाः ॥३६॥ तयोरेवं कथयतोः पृथिवीधर्मयोस्तदा । परीक्षिन्नाम राजर्षिः प्राप्तः प्राचीं सरस्वतीं ॥३७॥ ॥इ
ति श्रीभागवते महापुराणे प्रथमस्कंधे षोडशोऽध्यायः ॥ ॥ सूत उवाच ॥ ॥ तत्र गोमिथुनं राजा हन्यमानमनाथव
त् । दंडहस्तं च वृषलं ददृशे नृपलांछनं ॥१॥ वृषं मृणालधवलं मेहंतमिव बिभ्यतं । वेपमानं पदैकेन सीदंतं शूद्रताडितं ॥२॥
गां च धर्मदुघां दीनां भृशं शूद्रपदाहतां । विवत्सामश्रुवदनां क्षामां यवसमिच्छतीं ॥३॥ पप्रच्छ रथमारूढः कार्तस्वरपरिच्छदो
मेघगंभीरया वाचा समारोपितकार्मुकः ॥४॥

मृणालं पद्मकंदस्तद्वद्धवलं । भयान्मेहंतं मूत्रयंतं ॥ इवेत्यनेन पादावशेषो धर्मो भयान्मूत्रयन्निव प्रतिक्षणं क्षीयमाणमूत्रांशं तस्याप्यनिर्वाहे
कंपमान इवेति दर्शितं ॥२॥ धर्मदुघां हविर्दोग्ध्रीं । क्षामां कृशां । यवसं तृणं । अत्रापि भस्यादिप्रसवनक्षयादिवत्सेवा यज्ञोत्सावात्कृशा ॥ अ
त एव यज्ञभागमिच्छतीं पृथ्वीति सूचितं ॥३॥ कार्तस्वरं सुवर्णं परिच्छदः परिकरो यस्य सुवर्णनिबद्धामित्यर्थः ॥ सज्जीकृतकार्मुकः ॥ कस्त

मितिपद्रक ४ राम

कृ मा

ति२

हंसि घातयसि। राजाहमिति चेत्तत्राह। नटइव वेषमात्रेण नरदेवोसि कर्मणा तु त्वं द्विजः शूद्रः॥ ५॥ अशोच्यान्निरपराधान् रहसि छन्नं प्रहर-
न्सि स शोच्यः सापराधोऽसि अतो वधमर्हसि॥ ६॥ वृषं प्रत्याह। त्वं वा कः स्वयमेव संभावयति। किंस्वित्त्वं कश्चिद्देवो वृषरूपेणास्मान्परिखेदयन्
वर्त्तसे॥ ७॥ दोर्दंडैः परिरंभिते सुरक्षिते ते शुचः अश्रूणि विनात्रान्येषाम् अश्रूणि न तु पतंति खेदहेतुस्त्वं दर्शितं॥ ८॥ एवं वृषमुक्त्वा नरपतिः शोचंतं
प्रत्याह। सौः सुरभेः पुत्र मा तु शोचः शोकं मा कुरु। व्येतु अपयातु। गां प्रत्याह। अंब मातः शास्तरि मयि जीवति सति ते भद्रमेवात्र तो

कस्त्वं मच्छरणे लोके वलाद्धंस्यवलान्वली। नरदेवोसि वेषेण नटवत्कर्म्मणा द्विजः॥ ५॥ कस्त्वं कृष्णे गते दूरं सह गांडीवधन्वना। शो-
च्योऽस्यशोच्यान्रहसि प्रहरन्वधमर्हसि॥ ६॥ त्वं वा मृणालधवलः पादैर्न्यूनः पदा चरन्॥ वृषरूपेण किं कश्चिद्देवो नः परि-
खेदयन्॥ ७॥ न जातु कौरवेंद्राणां दोर्दंडपरिरंभिते। भूतलेनुपतंत्यस्मिन्विना ते प्राणिनां शुचः॥ ८॥ मा सौरभेयात्र शुचो
व्येतु ते वृषलाद्भयं॥ मा रोदीरंब भद्रं ते खलानांमार्त्तिनिग्रहः॥ यस्य राष्ट्रे प्रजाः सर्वास्त्रस्यंते साध्व्यसाधुभिः। तस्य मत्तस्य नु-
नश्यंति कीर्त्तिरायुर्भगो गतिः॥ १०॥ एष राज्ञः परो धर्मो ह्यार्त्तानामार्त्तिनिग्रहः। अत एनं वधिष्याभि भूतद्रुहमसत्तमं॥ ११॥ कोवृश्चत्तव पादांस्त्रीन्सौ-
रभेय चतुःपद। मा भूवंस्त्वादृशा राष्ट्रे राज्ञां कृष्णानुवर्त्तिनां॥ १२॥ आख्याहि वृष भद्रं वः साधूनामकृतागसां। आत्मवैरूप्यकर्त्तारं पार्थानां कीर्त्ति-
दूषणं॥ १३॥ राम॥

३मपिशाचादि

मा रोदीः॥ ९॥ मम महितार्थमेवैनं हनिष्यामीति न तवोपकारायेत्याह। यस्येति द्वाभ्यां। हे साध्वि सर्वा याः काश्चिदपीत्यर्थः। असाधुभिस्त्रस्यंते पीड्यंते तदित्यर्थः। भ-
गो भाग्यं। गतिः परलोकः॥ १०॥ आर्त्तानामार्त्तिनिवर्त्तकोयं। एष हि राज्ञः परो धर्मः। अत एनं वधिष्यामि। यतोऽसत्तमं भूतद्रुहं च॥ ११॥ पुनरपि शोचंतं वृषं प्र-
त्याह। कः अवृश्चत् विच्छेद। त्वादृशाः स्वविधाः दुःखिताः॥ १२॥ वो भद्रमस्तु। आत्मनस्तव पादच्छेदेन वैरूप्यं कृतवंतं कीर्त्तिं दूषयतीति तथा तं आख्याहि॥ १३॥

वे२

तदारक्षानेस्यात्तेकथंभद्रंस्यादित्यतआह।जनइत्यादि।यस्मादनागसिजनेयोऽघंदुःखंयुंजन्कुर्वन्भवतिअस्यएवंभूतस्यमत्तःसकाशात्सर्वत्र
भयंभवतिततःसाधूनांभद्रंभवेदिति।२४।तस्यदंडेअहमसमर्थइतिमाशंकिष्ठेत्याह।अनागःस्विति।आगस्कृत्अपराधकर्त्तायःतस्यापिभुजं
आहर्त्तास्मिआहरिष्यामिसांगदमित्यनेनमूलगतपाद्याहरिष्यामीतिदर्शितं।२५।नन्वेकस्यनिग्रहेन्यस्यानुग्रहेतवकिंप्रयोजनंतत्राह।रा
ज्ञोहीति।अन्यान्अधर्मिष्ठान्शासतोदंडयतः।२६।आर्त्तानामभयंयस्मात्तद्वचोवोयुष्माकमुचितमेव।येषांगुणगणैःकृष्णोदौत्यादौकृतः।

जनेनागस्यघंयुंजन्सर्वतोस्यचमद्भयं।साधूनांभद्रमेवस्यादसाधुदमनेकृते।२४।अनागःस्विहभूतेषुयआगस्कृन्निरंकुशः।आ
हर्त्तास्मिभुजंसाक्षादमर्त्यस्यापिसांगदं।२५।राज्ञोहिपरमोधर्मःस्वधर्मस्थानुपालनं।शासतोऽन्यान्यथाशास्त्रमनापद्युत्पथानिह।२६। धर्मउवाच॥ एतद्वःपांडवेयानांयुक्तमार्त्ताभयंवचः।येषांगुणगणैःकृष्णोदौत्यादौभगवान्कृतः।
२७। नवयंक्लेशबीजानियतःस्युःपुरुषर्षभ।पुरुषंतंविजानीमोवाक्यभेदविमोहिताः।२८।केचिद्विकल्पवसनाआहु
रात्मानमात्मनः।दैवमन्येपरेकर्मस्वभावमपरेप्रभुं।२९।

२७ वयंतुयतःपुरुषात्प्राणिनांक्लेशहेतवोभवेयुस्तंपुरुषंनविजानीमः।यतोवादिनांवाक्यभेदैर्विमोहिताः।२९।वाक्यभेदानेवाहविक
ल्पंभेदंवसंतेआच्छादयंतियेयोगिनस्तआत्मानमेवात्मनःप्रभुंसुखदुःखप्रदंतयोःप्रदमाहुः।तदुक्तं।आत्मैवह्यात्मनोबंधुरात्मैवरिपु
रात्मनइति।यद्वाविकल्पैःकुतर्कैःप्रहतानास्तिकाःएवंहितेवदंति।नतावद्देवादीनांप्रभुत्वंकर्माधीनत्वात्।फलस्यनचापिकर्म
जडत्वात्कर्त्रधीनत्वात्।अतःअयमेवप्रभुःकर्मणःकश्चिदिति।अन्येदैवज्ञादैवंग्रहादिरूपं।परेतुमीमांसकाःकर्म।अपरेलोकायतिकाःस्व

नान्यः २

केष्वपि सेश्वरेष्वपीति दुर्लभत्वं दर्शितं। निश्चय इति सिद्धांततत्त्वं। अप्रतर्क्यात् मनोगोचरात्। अनिर्देश्यात् वचनागोचरात् परमेश्वरात् सर्वं भवती-
ति विमृश स्वविचारय स्वबुद्ध्या ॥२०॥ विखेदो गतमोहः पर्यचष्ट प्रत्यभाषत ज्ञातवानिति वा ॥२१॥ अनिर्दशितमिव स्तुवन्नाह तके जानन्नपि न सूचयेदित्यत्र
रूपं धर्मं ब्रवीषि अतो धर्मोऽसि। सूचने को दोष इत्यत आह। यदिति। स्थानं नरकादि ॥२२॥ यद्वा अज्ञानाद्दस्युकथनं भवतीत्याह। अथवेति। देवस्य मायाया
या गतिर्वध्यघातकाजलक्षणा वृत्तिः। भूतानां चेतसो वचसश्चाप्यगोचरः सुज्ञेया न भवतीति निश्चयः ॥२३॥ धर्मोऽसाविति ज्ञात्वा स्वपादाननुवादेन त्ववस्था-

अप्रतर्क्यादनिर्देश्यादिति केष्वपि निश्चयः। अत्रानुरूपं राजर्षे विमृश स्वमनीषया ॥२०॥ एवं धर्मे प्रवदति स सम्राड् द्विजसत्तमाः। समाहितेन मनसा
विखेदः पर्यचष्ट तं ॥२१॥ राजोवाच ॥ धर्मं ब्रवीषि धर्मज्ञ धर्मोऽसि वृषरूपधृक्। यदधर्मकृतः स्थानं सूचकस्यापि तद्भवेत् ॥२२॥ अथवा
देवमायाया नूनं गतिरगोचरः। चेतसो वचसश्चापि भूतानामिति निश्चयः ॥२३॥ तपः शौचं दया सत्यमिति पादाः प्रकीर्तिताः। अधर्मा-
शैस्त्रयो भग्नाः स्मयसंगमदैस्तव ॥२४॥ इदानीं धर्म पादस्ते सत्यं निर्वर्त्तयेद्यतः। तं जिघृक्षत्यधर्मोऽयमनृतेनैधितः कलिः ॥२५॥ ॥

श्री

माह। तप इति द्वाभ्यां। अधर्मपादैस्तव त्रयः। पादाः। त्रिभिरंशैर्भग्नाः। स्मयो विस्मयः ॥२४॥ इदानीं कलौ हे धर्म ते पादश्चतुर्थांशः। तत्रापि स-
त्यमेवावशिष्यतः सत्याइवानात्मानं निर्वर्त्तयेत् कथंचिद्धारयेत्। तमपि पादमनृतेन संवर्द्धितं महहृतं कलिरूपोयमधर्मो विनाशयितुमि-
च्छुः। तत्रेयं स्थितिः। कृतयुगेऽथ धर्मः संपूर्णश्चतुष्पाद्धर्मः। त्रेतायां चतुर्णामपि पादानां मध्ये स्मयेन तपः संगेन शौचं मदेन दया अनृ-
तेन सत्यमित्येवं चतुर्थांशो हीयते द्वापरे त्वर्द्धम्। कलौ चतुर्थांशोऽवशिष्यते सोप्यनृतेन नश्यतीति ॥२५॥ ॥ श्रीरामयनमः ॥ ॥

न्यासितोऽन्योन्यद्वारेणावतारित उरुर्भारो यस्याः कृतं कौतुकं मंगलं यस्याः॥ अश्रूणि कलयति मुंचतीत्यश्रुकला तेन हरिणा त्यक्ता सती शूद्रा भोक्ष्यंति
मामिति शोचती॥ निशातं निशितं॥ अधर्मस्य हेतुर्यः कलिस्तं हंतुमित्यर्थः॥ अभिप्रेत्य ज्ञात्वा॥ शरण्य आश्रयार्हः॥ श्लोक्यः सत्कीर्त्यर्हः॥ गु
डाकेशोऽर्जुनस्तस्य यशोधरा ये वयं तेषां तान्प्रति वद्धोऽजलिर्येन तस्य ते भयं नास्ति॥ किं तु कथंचन केनाप्यंशेन मदीये क्षेत्रे त्वया न वर्त्तित

इयं च भूर्भगवता न्यासितोरुभरा सती॥ श्रीमद्भिस्तत्पदन्यासैः सर्वतः कृतकौतुका॥ २६॥ शोचत्यश्रुकला साध्वी दुर्भगेवोज्झिता सती।
अब्रह्मण्या नृपव्याजाः शूद्रा भोक्ष्यंति मामिति॥ २७॥ इति धर्मं महीं चैव सांत्वयित्वा महारथः॥ निशातमाददे खड्गं कलयेऽधर्म
हेतवे॥ २८॥ तं जिघांसुमभिप्रेत्य विहाय नृपलांछनं॥ तत्पादमूलं शिरसा समगाद्भयविह्वलः॥ २९॥ पतितं पादयोर्वीरः कृपया दी
नवत्सलः॥ शरण्यो नावधीच्छ्लोक्य आह चेदं हसन्निव॥ ३०॥ श्रीराजोवाच॥ न ते गुडाकेशयशोधराणां बद्धांजलेर्वै भयमस्ति किंचि
त्॥ न वर्त्तितव्यं भवता कथंचन क्षेत्रे मदीये त्वमधर्मबंधुः॥ ३१॥ त्वां वर्त्तमानं नरदेवदेहेष्वनुप्रवृत्तोऽयमधर्मपूगः॥ लोभोऽनृतं चौर्य
मनार्यमंहो ज्येष्ठा च माया कलहश्च दंभः॥ ३२॥ न वर्त्तितव्यं तदधर्मबंधो धर्मेण सत्येन च वर्त्तितव्ये। ब्रह्मावर्त्ते यत्र यजंति यज्ञैर्यज्ञेश्वरं य
ज्ञवितानविज्ञाः॥ ३३॥ ॥

व्यं यस्मात्त्वमधर्मस्य बंधुः॥ तदेवाह॥ राजदेहेषु वर्त्तमानं त्वामन्वयमधर्मस्य पूगः समूहः सर्वतः प्रवृत्तः॥ अनार्यं दौर्जन्यं अंहः स्वधर्मत्यागः
ज्येष्ठा अलक्ष्मीः॥ माया कपटं॥ तत्तस्माद्वर्त्तितव्ये वर्त्तितुमर्हे ब्रह्मावर्त्ते देशे यज्ञस्य वितानं विस्तारस्तत्र विज्ञा निपुणा यत्र ब्रह्मावर्त्ते यज्ञै
र्यज्ञेश्वरं यज्ञफलप्रदं यजंति॥ अतस्तत्र त्वया न स्थेयमिति॥ ॥ श्रीराम॥ ॥

१३५॥

तृ

भा॰प्र॰

७२

इज्या यागस्तद्रूपा मूर्त्तिर्यस्य शं क्षेमं कामांश्च तनोति पूरयति। नन्विंद्रादयो देवा इज्यंते न तु हरिरित्यत्राह। एष स्थावरादीनामात्मेति। तथापि जीववन्नप
रिच्छिन्न इत्याह। अंतर्बहिरिति। यथा वायुः प्राणरूपेणांतःस्थोऽपि बहिरस्ति तद्वत्सर्वांतर्यामी ईश्वरोऽपीति। ३४॥ उद्यतासिं हतखड्गं। दंड
पाणिं यमं। उद्यतमुद्युक्तं॥ अत्र न तव स्थानमिति याचितवान् तया यत्र क्वापि वत्स्यामि। किंतु तत्र तत्रापि आत्तो गृहीत इषुः शरासनं
च येन तं त्वामेव लक्षये ३६॥ तस्मान्नियतो निश्चितो वत्स्ये वत्स्यामि ३७॥ पानं मद्यादेः। सूना प्राणिवधः [illegible]। द्यूते अनृतं पाने मदः। पू

॥ यस्मिन्हरिर्भगवानिज्यमान इज्यात्ममूर्त्तिर्यजतां शं तनोति॥ कामानमोघान्स्थिरजंगमानामंतर्बहिर्वायुरिवैष आत्मा॥
सूत उवाच॥ परीक्षितैवमादिष्टः स कलिर्जातवेपथुः॥ तमुद्यतासिमाहेदं दंडपाणिमिवोद्यतं ३५॥ कलिरुवाच॥
यत्र क्वाचन वत्स्यामि सार्वभौम तवाज्ञया॥ लक्षये तत्र तत्रापि त्वामात्तेषुशरासनं ३६॥ तन्मे धर्मभृतां श्रेष्ठ स्थानं निर्देष्टु
मर्हसि। यत्रैव नियतो वत्स्ये आतिष्ठंस्तेऽनुशासनं ३७॥ श्रीसूत उवाच॥ अभ्यर्थितस्तदा तस्मै स्थानानि कलये द
दौ॥ द्यूतं पानं स्त्रियः सूना यत्राधर्मश्चतुर्विधः ३८॥

र्वं मदो दयानाशकले मोऽनृतं॥ अत्र तु गर्वद्वारा तपोनाशकले न स्त्रीषु संगः। हिंसायां क्रौर्यं दयानाशकमिति ज्ञेयं। यद्यपि सर्वं सर्वत्र संभवति
तथापि प्राधान्येनानृतादीनां द्यूतादिषु यथासंख्यं ज्ञेयं। द्वादशस्कंधे तु सत्यं दया तपो दानमिति पादा विलोक्यंते अत्र दानशब्देन शौचमेवो
क्तं मनःशुद्धिरूपत्वा[illegible]ता अभयदानस्य चेतयाः धर्मपदानामुपाश्रो हीयते शनैः। अधर्मपादैरनृतहिंसासंतोषविग्रहैरित्यत्रासंतोषश
ब्देन तत्स्पृहे दुर्गोलन्त्यं ते विग्रहशब्देन च तद्धेतुः ~~[illegible]~~ संग इत्यविरोधः ३८॥

७२

दं

१ स्त्री

चतुर्विधस्याप्येकत्रैवावस्थानं देहीति पुनर्याचमानाय जातरूपं सुवर्णं दत्तवान् ततस्तु सुवर्णदानात् अनृतं मदं काममिति त्रिभिः संगं रज इति रजोमूलां हिंसामेतानि चत्वारि पंचमं
२ वैरं दादिति ॥३९॥ अमूनि अमूनि स्थानानि अन्यवसदित्यर्थः ॥४०॥ अथयतिहेतोः ॥ बुभूषुः उद्भवितुमिच्छुः ॥ श्रीसुवर्णयोरभेदेन नामतयोरत्नासक्तिः ॥४१॥ एवं
कलिं निगृह्य वृषस्य धर्मस्य पादान्नष्टान् प्रतिसंदधे तप आदीनि प्रवर्त्तितवानित्यर्थः ॥ महीं च समवर्द्धयत् असांत्वयत् ॥४२॥ युस्मैदीर्घसत्रप्रवृत्तिरपि तल्लाभो | न २

पुनश्च नाथमानाय जातरूपमदात्प्रभुः ॥ ततोनृतं मदं कामं रजो वैरं च पंचमं ॥३९॥ अमूनि पंच स्थानानि ह्यधर्मप्रभवः कलिः ॥ औत्त
रेयेण दत्तानि न्यवसत्तन्निदेशकृत् ॥४०॥ अथैतानि न सेवेत बुभूषुः पुरुषः क्वचित् ॥ विशेषतो धर्मशीलो राजा लोकपतिर्गुरुः ॥
॥४१॥ वृषस्य नष्टांस्त्रीन्पादांस्तपः शौचं दयामिति ॥ प्रतिसंदध आश्वास्य महीं च समवर्द्धयत् ॥४२॥ स एष एतर्ह्यध्यास्त आसनं
पार्थिवोचितं ॥ पितामहेनोपन्यस्तं राज्ञारण्यं विविक्षता ॥४३॥ आस्तेधुना स राजर्षिः कौरवेंद्रश्रियोल्लसन् ॥ गजाह्वये महा
भागश्चक्रवर्त्ती बृहच्छ्रवाः ॥४४॥ इत्थंभूतानुभावोयमभिमन्युसुतो नृपः ॥ यस्य पालयतः क्षौणीं यूयं सत्राय दीक्षिताः ॥
४५॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे सप्तदशोध्यायः ॥ ॥ राम ॥ ॥

देवेत्याह स एष इत्यादि त्रिभिः ॥ एतर्हि इदानीं युधिष्ठिरेणारण्यं प्रवेष्टुमिच्छता उपन्यस्तं समर्पितमासनमध्यास्ते ॥४३॥ अधुना पालयतीति वर्त्तमानसामीप्ये
भूतेपि वर्त्तमानवन्निर्देशः ॥ स्मेत्यध्याहारो वा ॥४४॥ आस्तेधुनेति स एष इत्यनेनैव चरितार्थत्वाद्द्विगीतमेतत्पद्यमतो न व्याख्यातं ॥ सत्राय सत्रं कर्तुं दीक्षि
तादीक्षां कृतवंतः ॥ ॥ श्री ॥ इति श्रीप्रथमे सप्तदशः ॥ ॥ ॥ राम ॥ ॥ ॥

राज्ञष्टादशे तस्य ब्रह्मशापो निरूप्यते। स चानुग्रह एवास्य यतो वैराग्यमाप्तवान्। १ परीक्षितो निर्याणमत्याश्चर्यं वक्तुं तत्संभावनाय जन्माश्चर्यमनुस्मारयति। यो वा इति॥ विप्लुष्टो निर्दग्धः सन्॥ १॥ ब्रह्मकोपादुत्थितात्तक्षकात्। यः प्राणविप्लवः प्राणनाश उपलक्षितात्तस्मान्न संमुमोह॥ अत्र हेतुः। यस्माद्भगवत्येवार्पिताशय इति॥ २॥ उत्सृज्येति। वैयासकेः शुकस्य शिष्यः सन्। विज्ञाता अजितस्य हरेः संस्थितिः स्वरूपं येन सः॥ ३॥ न चैतच्चित्रमित्याह नेति। उत्तमश्लोकस्यैव वार्ता येषु यतस्तत्पदांबुजमेव स्मरताम्। अत एव नित्यं तत्कथारूपममृतं जुषतां सेवमानानामन्तकालेऽपि संभ्रमो न स्यात्॥ ४॥ तस्मिन् राज्ञि सुतरां तन्न चित्रमित्याशयेनाह॥ तावदिति

सूत उवाच॥ यो वै द्रौण्यस्त्रविप्लुष्टो न मातुरुदरे मृतः। अनुग्रहाद्भगवतः कृष्णस्याद्भुतकर्मणः॥ १॥ ब्रह्मकोपोत्थिताद्यस्तु तक्षकात्प्राणविप्लवात्। न संमुमोहोरुभयाद्भगवत्यर्पिताशयः॥ २॥ उत्सृज्य सर्वतः संगं विज्ञाताजितसंस्थितिः। वैयासकेर्जहौ शिष्यो गंगायां स्वं कलेवरं॥ ३॥ नोत्तमश्लोकवार्तानां जुषतां तत्कथामृतं। स्यात्संभ्रमोऽन्तकालेऽपि स्मरतां तत्पदांबुजं॥ ४॥ तावत्कलिर्न प्रभवेत्प्रविष्टोऽपीह सर्वतः। यावदीशो महानुर्व्यामाभिमन्यव एकराट्॥ ५॥ यस्मिन्नहनि यर्ह्येव भगवानुत्ससर्ज गां। तदैवेहानुवृत्तोऽसावधर्मप्रभवः कलिः॥ ६॥ नानुद्वेष्टि कलिं सम्राट् सारंग इव सारभुक्। कुशलान्याशु सिध्यंति नेतराणि कृतानि यत्॥ ७॥

॥ आभिमन्योः पुत्रः एकराट् चक्रवर्ती ईशः प्रतिष्ठावान्॥ ५ न तु तदा कलेः प्रवेश एवास्तां न प्रविष्टोऽपि न प्राभवदिति॥ कुतस्तत्राह॥ नानुद्वेष्टीति॥ सारंगो भ्रमर इव सारग्राही॥ सारमाह। यद्यस्मिन् कलौ कुशलानि पुण्यानि आशु संकल्पमात्रेण फलंति। इतराणि पापानि यतस्तानि कृतान्येव सिध्यंति न तु संकल्पितमात्राणि॥ तस्मात्कलिं न हतवान्॥ उक्तं च कलौ कर्तैव लिप्यत इत्यादि॥ ७॥

७३
२ भोगेन निष्पंति

यस्मिन्नहनि यर्हि यस्मिन्नेव क्षणे गां पृथ्वीं अनुवृत्तः प्रविष्टः। अधर्म-
३ स्य प्रभावो यस्मिन्सः॥ ६॥ ननु अधर्महेतुं कलिं सर्वथा किं न हतवा-
न् तत्राह॥

नन्वदोषाधिक्यात्द्वेष एव युक्तो न धीरेषु तस्याकिंचित्करत्वादित्याह । धीरभीरुणा बालेषु शूरेण कलिना किंतु न किमपि बालेषु त्वधीरेषु त्वप्रमत्तोऽवहितः सन्
न्यो वृक इव वर्त्तते ॥ ८ ॥ पारीक्षितमाख्यानं । अपृच्छत पृष्टवंतो यूयं ॥ ९ ॥ किं बहुना नरैरेतावदेव कर्त्तव्यमिति सर्वशास्त्रसारं कथयति । या या इति ॥ कथनी-
यानि स्तुत्यानि कर्माणि यस्य तस्य गुणकर्मविषयास्तु बुभूषुभिः सद्भावमिच्छद्भिः ॥ १० ॥ पुनर्विस्तरेण कथनार्थं सूतं स्तुवंति संगं चाभिनंदंति ॥ ~~कथनीया~~
सूतेति त्रिभिः । शाश्वतीः समाः अनंतसंवत्सरान् जीव । अत्यंतसंयोगे द्वितीया । विशदं यशः कीर्त्तयसि । तच्चास्माकं मर्त्यानां अमृतं मरणनि-

॥ किंतु बालेषु शूरेण कलिना धीरभीरुणा ॥ अप्रमत्तः प्रमत्तेषु यो वृको नृषु वर्त्तते ॥ ८ ॥ उपवर्णितमेतद्वः पुण्यं पारीक्षितं मया ।
वासुदेवकथोपेतमाख्यानं यदपृच्छत ॥ ९ ॥ या याः कथा भगवतः कथनीयोरुकर्म्मणः । गुणकर्माश्रयाः पुंभिः संसेव्यास्ता बु-
भूषुभिः ॥ १० ॥ ऋषय ऊचुः ॥ सूत जीव समाः सौम्य शाश्वतीर्विशदं यशः ॥ यस्त्वं शंससि कृष्णस्य मर्त्यानाममृतं हि नः ।
११ ॥ कर्मण्यस्मिन्ननाश्वासे धूमधूम्रात्मनां भवान् ॥ आपाययति गोविंदपादपद्मासवं मधु ॥ १२ ॥ तुलयाम लवेनापि न
स्वर्गं नापुनर्भवं । भगवत्संगिसंगस्य मर्त्यानां किमुताशिषः ॥ १३ ॥

वर्त्तकं ॥ ११ ॥ किं च ॥ अस्मिन्कर्म्मणि सत्रे अनाश्वासे अविश्वसनीये वैगुण्यबाहुल्येन फलनिश्चयाभावात् धूमेन धूम्रो विवर्णस्त्र्प्रात्मा शरी-
रं येषां तान् अस्मान् कर्म्मणि षष्ठी गोविंदपादपद्मस्य आसवं मकरंदं मधुमधुरं आपाययति ॥ १२ ॥ भगवत्संगिनो विष्णुभक्तास्तेषां संगस्य
यो लवोऽल्पकालस्तेनापि स्वर्गं न तुलयाम समं न पश्यामः । न चापवर्गं । संभावनायां लोट् । मर्त्यानां तुच्छा आशिषो राज्याद्या न तुल-
यामेति किमुत वक्तव्यं ॥ नश्वरत्वात् ॥ १३ ॥ ॥ राम ॥

एवंसत्संगमलिनंध्यश्रवणौत्सुक्यमाविष्कुर्वंतिकोनामेति । रसवितः रसज्ञः महत्तमाणामेकांतेनपरमयनमाश्रयोयस्तस्यकथायांकोनामतृप्येत् । नको
पि । कथंभूतस्य अगुणस्यप्राकृतगुणरहितस्यकल्याणगुणानामंतंभवादयोयेयोगेश्वरास्तेनजग्मुः । एतावंतोगुणाइतिननिश्चितवंतः । १४
नोस्माकंमध्ये । भगवान्प्रधानंसेव्योयस्यसभवान्शुश्रूषमाणानांहरेश्चरितंविस्तारयतु १५ ॥ तच्चशुकपरीक्षित्संवादेनकथयेत्याशयेनाह । सवै

॥ कोनामतृप्येद्रसवित्कथायांमहत्तमैकांतपरायणस्य । नान्तंगुणानामगुणस्यजग्मुर्योगेश्वरायेभवपाद्ममुख्याः १४ ॥ तन्नोभवान्
वैभगवत्प्रधानोमहत्तमैकांतपरायणस्य । हरेरुदारंचरितंविशुद्धंशुश्रूषतांनोवितनोतुविद्वन् ॥ १५ ॥ सवैमहाभागवतः प
रीक्षिद्येनापवर्गाख्यमदभ्रबुद्धिः । ज्ञानेनवैयासकिशब्दितेनभेजेखगेंद्रध्वजपादमूलं ॥ १६ ॥ तन्नः परंपुण्यमसंवृतार्थमा
ख्यानमत्यद्भुतयोगनिष्ठं । आख्याह्यनंताचरितोपपन्नंपारीक्षितंभागवताभिरामं ॥ १७ ॥ ॥

इतिहासत्यांवैयासकिनाशुकेनशब्दितेनकथितेनज्ञानेनज्ञानसाधनेनअपवर्गइत्याख्यायस्यतत्खगेंद्रध्वजस्यहरेःपादमूलंभेजे ॥ १६ ॥ त
च्चअसंवृतार्थंयथातथाआख्याहि । तदेवनिर्दिशति ॥ परीक्षितेकथितंपारीक्षितंआख्यानंश्रीभागवतंपुराणं । परंपुण्यंसत्वशोधकंअत्य
द्भुतेयोगेनिष्ठायस्यअनंतस्याचरितैरुपपन्नंयुक्तं । अतएवभागवतानामभिरामंप्रियं । एतैर्विशेषणैःकर्मज्ञानभक्तियोगप्रकाश
कत्वंदर्शितं ॥ १७ ॥ राम ॥ ॥

७४

श्रीभागवतव्याख्याने तत्प्रसंगं महत्तमादरप्राप्तमात्मानं श्लाघते अहो वयमित्यादि द्वाभ्यां अहो इत्याश्चर्ये अह इति हर्षे वा वयमिति श्लाघायां प्रतिलोमजा अपि
अद्य जन्मभृतः सफलजन्मानः संजाताः ॥ स्मेति तिङंतप्रतिरूपकमव्ययम् ॥ वृद्धानामनुवृत्त्या आदरेण ज्ञानवृद्धेः शुकस्य सेवयेति वा यतो दुष्कुलत्वं त
न्निमित्तमाधिं च मनःपीडां महत्तमानां अभिधानयोगो लौकिकोपि संभाषणलक्षणः संवादो विधुनोति अपनयति १८ कुतः पुनः किं पुनर्वक्तव्यं तस्य
अनंतस्य नाम गृणतः पुंसो नर्हत्तमानामभिधानयोगो दौःकुल्यं विधुनोतीति । यद्वा नामग्रहणतः पुनर्दौःकुल्यमिति । यद्वा ग्रहणतः पुंसः महत्तमस्य नाम दोः

श्रीसूत उवाच ॥ ॥ अहो वयं जन्मभृतोऽद्य हास्म वृद्धानुवृत्त्यापि विलोमजाताः दौष्कुल्यमाधिं विधुनोति शीघ्रं महत्त
मानामभिधानयोगः ॥ १८ ॥ कुतः पुनर्गृणतो नाम तस्य महत्तमैकांतपरायणस्य ॥ योनंतशक्तिर्भग
वाननंतो महद्गुणत्वाद्यमनंतमाहुः ॥ १९ ॥ एतावतालं ननु सूचितेन गुणैरसाम्यानतिशायनस्य ॥ हि
त्वेतरान्प्रार्थयतो विभूतिर्यस्यांघ्रिरेणुं जुषतेऽनभीप्सोः ॥ २० ॥ ॥

कुल्यं विधुनोतीति किं वक्तव्यमिति कैमुत्यमेवाह । अनंताः शक्तयो यस्य स्वतोऽप्यनंतः । किं च महत्त्वगुणा यस्य स महद्गुणस्तस्य भावस्तस्मात् । यं गृणतो
ऽप्यनंतमाहुः ॥ १९ ॥ एतत्प्रपंचयति एतावतेत्यादित्रिभिः । तस्य पदसाम्यं अनतिशायनं च गुणैः स्वसाम्यं तदाधिक्यं चान्यस्य नास्तीत्यस्यार्थस्य एतावतालं सू
चितेन अलं पर्याप्तं कस्तद्विस्तरतो वक्तुं शक्नोतीति तदेवाह । इतरान् ब्रह्मादीन् प्रार्थयमानान् हित्वा विभूतिः श्रीः अनभीप्सोरपि यस्यांघ्रिरेणुं से
वत इति ॥ २० ॥ ॥ रामाय नमः ॥ ॥ ॥

अथेत्यर्थांतरे। यस्य पादनखादवसृष्टं निःसृतमपि विरिंच्येनोपहृतं समर्पितमर्हणांभोऽर्घोदकं सेशमीशसहितं जगत्पुनाति विरिंच्योपहृतं सेशमिति च त
योरस्य पासकत्वमुक्तं। तस्मात्मुकुंदव्यतिरिक्तः को नाम भगवत्पदार्थः सर्वेश्वर इत्यर्थः॥२१॥ धीराः संतः ऊढं दृढं तं अंत्यं चरमकाष्ठापन्नं। तदाह। य
स्मिन्नहिंसा उपशमश्च स्वाभाविको धर्मः॥२२॥ एवं भगवन्महिमानमभिनंद्य परीक्षितोपाख्यानमनुक्रमाह॥ अहं हीति। अर्यमणः हे सूर्यत्रयीमूर्तयः अ

अथापि यत्पादनखावसृष्टं जगद्विरिंच्योपहृतार्हणांभः। सेशं पुनात्यन्यतमो मुकुंदात्को नाम लोके भगवत्पदार्थः॥२१॥ यत्रानुर
क्ताः सहसैव धीरा व्यपोह्य देहादिषु संगमूढं। व्रजंति तत्पारमहंस्यमंत्यं यस्मिन्नहिंसोपशमः स्वधर्मः॥२२॥ अहं हि पृष्टोऽर्यम
णो भवद्भिराचक्ष आत्मावगमोऽत्र यावान्। नभः पतंत्यात्मसमं पतत्त्रिणस्तथा समं विष्णुगतिं विपश्चितः॥२३॥ एकदा धनु
रुद्यम्य विचरन्मृगयां वने। मृगाननुगतः श्रांतः क्षुधितस्तृषितो भृशं॥२४॥ जलाशयमचक्षाणः प्रविवेश तमाश्रमं। दद
र्श मुनिमासीनं शांतं मीलितलोचनं॥२५॥ प्रतिरुद्धेंद्रियप्राणमनोबुद्धिमुपारतं। स्थानत्रयात्परं प्राप्तं ब्रह्मभूतमविक्रियं
॥२६॥ राम

त्र यावानात्मावगमो मम ज्ञानं तावत् आचक्षे प्रवक्ष्यामि तथाहि। पक्षिणो नभः आत्मसमं स्वस्यानुरूपमेव उत्पतंति न त्वनंतं तथा विपश्चितोऽपि विष्णोर्गतिं लीलां
समं स्वमत्यनुरूपमेव वदंतीत्यर्थः॥२३॥२४॥ अचक्षाणः अपश्यन् तं प्रसिद्धमाश्रमं तस्मिन्मुनिं शमीकं॥२५॥ प्रतिरुद्धाः प्रत्याहृता इंद्रियादयो
येन अत एव उपारतं स्थानत्रयात् जाग्रदादिलक्षणात्परं तुरीयपदं प्राप्तं अत एव ब्रह्मभूतत्वादविक्रियं॥२६॥ राम॥ ॥

विप्रकीर्णाभिर्जटाभिराच्छन्नं। रुरोर्हरिणविशेषस्य चर्मणा चाच्छन्नं। विशेषेण शुष्यत्तालुर्यस्य सः तथाभूतं मुनिमुदकमयाचत ॥ २७ ॥ न लब्धं तृणं तृणासनं भूमि-
रुपवेशस्थानं च येन सः असंप्राप्तोर्घः सूनृतं प्रियवचनं च येन सः ॥ २८ ॥ मत्सरः परोत्कर्षासहनं ॥ २९ ॥ गतासुं मृतं। धनुःकोट्या चापाग्रेण ॥ ३० ॥ सर्पं निधा-
ने राज्ञोऽभिप्रायमाह। एष किं प्रत्याहृतसर्वेंद्रियः सन्मीलितेक्षणो जातः। यद्वा क्षत्रबंधुभिर्गतैरागतैर्वा किं नु स्यादित्यवज्ञया मृषासमाधिः सन्नि-

विप्रकीर्णजटाच्छन्नं रौरवेणाजिनेन च। विशुष्यत्तालुरुदकं तथाभूतमयाचत ॥ २७ ॥ अलब्धतृणभूम्यादिरसंप्राप्तार्घसूनृतः। अवज्ञा-
तमिवात्मानं मन्यमानश्चुकोप ह ॥ २८ ॥ अभूतपूर्वः सहसा क्षुत्तृड्भ्यामर्दितात्मनः। ब्राह्मणं प्रत्यभूद्ब्रह्मन्मत्सरो मन्युरेव च ॥
२९ ॥ स तु ब्रह्मऋषेरंसे गतासुमुरगं रुषा। विनिर्गच्छन्धनुःकोट्या निधाय पुरमागमत् ॥ ३० ॥ एष किं निभृताशेषकरणो मीलितेक्ष-
णः। मृषासमाधिराहोस्वित्किं नु स्यात्क्षत्रबंधुभिः ॥ ३१ ॥ तस्य पुत्रोऽतितेजस्वी विहरन्बालकोऽर्भकैः। राज्ञाघं प्रापितं तातं श्रुत्वा तत्-
त्रेदमब्रवीत् ॥ ३२ ॥ अहो अधर्मः पालानां पीव्नां बलिभुजामिव। स्वामिन्यघं यद्दासानां द्वारपानां शुनामिव ॥ ३३ ॥ ब्राह्मणैः क्षत्र-
बंधुर्हि द्वारपालो निरूपितः। स कथं तद्गृहे द्वाःस्थः सभांडं भोक्तुमर्हति ॥ ३४ ॥ कृष्णे गते भगवति शास्तर्युत्पथगामिनां। तद्भिन्नसेतून-
द्याहं शास्मि पश्यत मे बलं ॥ ३५ ॥ राम ॥ ॥

ति जिज्ञासयेत्यर्थः ॥ ३१ ॥ तस्य पुत्रः शृंगीनामा अघं दुःखं तत्र अर्भकमध्ये ॥ ३२ ॥ पालानां राज्ञां पीव्नां पुष्टानां अधर्ममेव निर्दिशति। स्वामिनि दासानां यदघं
पापाचरणं बलिभुजां काकानामिव द्वारपानां शुनामिवेति ॥ ३३ ॥ दासत्वं दर्शयति ब्राह्मणैरिति स भांडं भांडवर्गे स्थितं ॥ ३४ ॥ तत् तदनंतरमहं शा-
स्मि दंडयामीति पश्यत ॥ ३५ ॥ रामाय नमः ॥ ॥

ला०प्र०
७६

इतिवयस्यानुक्त्वारोषेणताम्रेअक्षिणीयस्यकौशिकीनदीतस्याअपउपस्पृश्यआर्षःवागवज्रंशापं ३६ इतिएवंसर्पनिक्षेपेणध्वंस्यतिततद्रुहंलन्दाधिष्
ति।पाठांतरेभस्मीकरिष्यति।स्मेतिपादपूरणे।कुलस्यांगारंतुल्यंममयाततेतिद्रुग्मार्ष ३७ गलेसर्पकलेवरंयस्यतत्पितुःकस्मात्समासः।मुक्तकंठमुच्चै

इत्युक्त्वारोषताम्राक्षोवयस्यानृषिबालकान्।कौशिक्यापउपस्पृश्यवाग्वज्रंविससर्जह।३६ इतिलंघितमर्यादंतक्षकःसप्तमे
हनि।धक्ष्यतिस्मकुलांगारंचोदितोमेततद्रुहं।३७ ततोऽभ्येत्याश्रमंबालोगलेसर्पकलेवरं।पितरंवीक्ष्यदुःखार्तोमुक्तकं
ठोरुरोदह ३८ सवाआंगिरसोब्रह्मन् श्रुत्वासुतविलापनं।उन्मील्यशनकैर्नेत्रेदृष्ट्वाचांसेमृतोरगं।३९ विसृज्यतंचपप्रच्छ
वत्सकस्माद्धिरोदिषि।केनवातेऽपकृतमित्युक्तःसन्यवेदयत् ४० निशम्यशप्तमतदर्हंनरेंद्रंसब्राह्मणोनात्मजमभ्यनंदत्।अ
होबताहोमहदद्यतेकृतमल्पीयसिद्रोहउरुर्दमोधृतः।४१ नवैनृभिर्नरदेवंपराख्यंसंमातुमर्हस्यविपक्वबुद्धे।यत्तेजसाद
विषहेणगुप्ताविंदंतिभद्राण्यकुतोभयाःप्रजाः।४२ अलक्ष्यमाणेनरदेवनाम्निरथांगपाणावयमंगलोकः।तदाहिचौ
रप्रचुरोविनंक्ष्यत्यरक्ष्यमाणोऽविवरूथवत्क्षणात्।४३॥ ॥

रित्यर्थः।३८ तंसर्पंविसृज्यकेनापकारःकृतः।३९।४० अनभिनंदनवाक्यं।अहोइत्यादि।बतकष्टंतेअल्पीयसिमहत्यापंकृतं।द्रोहेअपराधेदमोदंडः।४१ परैर्विषह्
रित्याख्यातिर्यस्यतंनरदेवंनृभिःसंमातुंसंमंइतुं।४२ अलक्ष्यमाणेऽदृश्यमानेअविवरूथवत्मेषसंघवत्।चोरप्रचुरोयंलोकःक्षणाद्विनंक्ष्यति।कस्मिन्नि
नृरथांगपाणाविव।४३॥ श्रीराम॥ ॥

७६

॥धी १ सबं

नष्टो नाथो यस्य लोकस्य तस्य वसोर्वसुनो धनस्य विलुंपकादपहर्तुश्चौरादेर्हेतोर्यत्पापं भविष्यति तत्तस्य सन्निमित्तत्वादस्मानुपैष्यति। अनन्वयं धर्मशून्यमेव सर्वं धालावात्
तदेव पापं दर्शयति। परस्परमिति। शपंति परुषं वदंति पश्वादीन्हृंजते। अपहरंति। पुरुदस्यवश्चौरवंचकाः॥४४॥ आर्यधर्मः सदाचारः॥ शुनां कपीनामिव
चार्थकामयोरेवाभिनिवेशितविज्ञानानां॥४५॥ एवं राजमात्रस्य शापानर्हत्वमुक्त्वा प्रकृते विशेषमाह। धर्मपाल इति सार्द्धेन। हयमेधराट् अश्वमेध

तदद्य नः पापमुपैत्यनन्वयं यन्नष्टनाथस्य वसोर्विलुंपकात्। परस्परं घ्नंति शपंति हंजते पशून्स्त्रियोऽर्थान्पुरुदस्यवो जना॥४४॥ तदार्यधर्मश्च
विलीयते नृणां वर्णाश्रमाचारयुतस्त्रयीमयः॥ ततोऽर्थकामाभिनिवेशितात्मनां शुनां कपीनामिव वर्णसंकरः॥४५॥ धर्मपालो न
रपतिः स तु सम्राड् बृहच्छ्रवाः॥ साक्षान्महाभागवतो राजर्षिर्हयमेधराट्॥ क्षुत्तृट्श्रमयुतो दीनो नैवास्मच्छापमर्हति॥ अपा
पेषु स्वभृत्येषु बालेनापक्वबुद्धिना॥४७॥ पापं कृतं तद्भगवान्सर्वात्मा क्षंतुमर्हति। तिरस्कृता विप्रलब्धाः शप्ताः क्षिप्ता हता अपि
॥४८॥ नास्य तत्प्रतिकुर्वंति तद्भक्ताः प्रभवोऽपि हि। इति पुत्रकृताघेन सोऽनुतप्तो महामुनिः॥४९॥ स्वयं विप्रकृतो राज्ञा नैवाघं
तदचिंतयत्। प्रायशः साधवो लोके परैर्द्वंद्वेषु योजिताः॥ न व्यथंति न हृष्यंति यत आत्माऽगुणाश्रयः॥५०॥ इति प्रथमे अष्टादशः॥ ॥

याजी॥४६॥ अस्य महापापस्यान्यत्प्रायश्चित्तमदृष्ट्वा पापं निवेदयन्भगवंतं प्रार्थयते। अपापेष्विति॥४७॥ राजा चेत्प्रतिशापं दद्यात्तर्हि निष्कृतिर्भवेदपि तत्तु न संभवति
तस्य भागवतत्वादित्याह। तिरस्कृताः निंदिताः विप्रलब्धा वंचिताः क्षिप्ता अवज्ञाताः हतास्ताडिताः॥ अस्य तिरस्कारादिकर्तुर्न तत्प्रतिकारं कुर्वंति। तद्भक्ता विष्णुभक्ताः
प्रभवः समर्था अपि॥४८॥ विप्रकृतोऽपकृतः। अघं अपराधं॥४९॥ उक्तं चैतदित्याह। प्रायश इति। द्वंद्वेषु सुखदुःखादिषु अगुणाश्रयः॥ अखंडः सुखाद्याश्रयो न भ

वति॥५०॥ इति भागवते प्रथमेऽष्टादशः॥ ॥

प्रायोपविष्टे गंगायां राज्ञि योगिजनावृतो शुकस्यागमनं तत्र प्रोक्तमेकोनविंशके ॥१॥ स्वकृतं तत्कर्म मुनिस्कंधे सर्पनिक्षेपनं गर्ह्यं निंद्यं चिंतयन्नसुदुर्मना जातः चिंतामेवाह अहो इति सार्द्धश्लो। नीचं पापं। अनीचमिति पाठे स एवार्थः। ब्रह्मणि ब्राह्मणे गूढं दंडं गुप्तं तेजो यस्य ॥ कृतं यद्देवहेलनं ईश्वरावज्ञा पापमित्यर्थः। तस्मान्मे व्यसनं ई[illegible]पतूलविपत्तिः। तत्तु नातिदीर्घात् कालात् अचिरदेवास्तु तत्रापि अहो साक्षात् न तु पुत्रादिद्वारेणेति प्रार्थनं। कामममसंकोचतः। एवं प्रार्थनायाः प्रयोजनं। अघस्य निःकृताय प्रायश्चित्ताय यथा पुनरेवं न कुर्यामिति चैवं साक्षात् स्वस्यैव व्यसनं प्रार्थितं ततः प्रागेव किंचित्प्रार्थयते अ

सूत उवाच ॥ महीपतिस्त्वथ तत्कर्म गर्ह्यं विचिंतयन्नात्मकृतं सुदुर्मनाः ।१। अहो मयानीचमनार्यवत्कृतं निरागसि ब्रह्मणि गूढतेजसि ॥ ध्रुवं ततो मे कृतदेवहेलनात् दुरत्ययं व्यसनं नातिदीर्घात्। तदस्तु कामं ह्यघनिःकृताय मे यथा न कुर्यां पुनरेवमद्धा ॥२॥ अद्यैव राज्यं बलमृद्धकोशं प्रकोपितो ब्रह्मकुलानलो मे। दहत्वभद्रस्य पुनर्न मेऽभूत् पापीयसी धीर्द्विजदेवगोभ्यः ॥३॥ स चिंतयन्नित्थमथाशृणोद्यथा मुनेः सुतोक्तो निर्ऋतिस्तक्षकाख्यः। स साधु मेने न चिरेण तक्षकानलं प्रसक्तस्य विरक्तिकारणं ॥४॥ ॥

द्यैवेति मे मम राज्यादि दहतु प्रकोपितं ब्रह्मकुलमेवानलः पुनर्द्विजादीन् पीडयितुं अधीर्मे मा भूत् न लभेदित्यर्थः। ॥ ३ ॥ इत्थं चिंतयन् स राजा मुनेः सुतेनोक्तः सप्तमेऽहनि निर्ऋतिर्मृत्युर्यथा भविष्यतीति तथाशृणोत् शमीकप्रेषितात् शिष्यात् शापं श्रुत्वा च स तक्षकस्य विषाग्निं साधु मेने। यतो विषयेषु प्रसक्तस्य विरक्तिकारणं शापः ॥४॥ ॥ श्रीराम ॥ ॥

हा

अथो अमुं तमिमं लोकौ पुरस्तात् तु राज्यमध्य एव हेयतया विचारितौ तौ विहाय श्रीकृष्णांघ्रिसेवामेव अधिमन्यमानः सर्वपुरुषार्थाधिकां जानन् अमर्त्यन-
द्यां गंगायां प्रायमनशनं तस्मिन्नित्यर्थः । तत्संकल्पेनोपाविशदिति यावत् । यद्वा प्रायं प्रकृष्टमयनं शरणं यथा भवति तथा ॥ ५ ॥ अमर्त्यनद्यामिति
विशेषस्य विशेषमाह । या गंगा लसती श्रीर्यस्याः तुलस्यास्तया विमिश्रिता ये कृष्णांघ्रिरेणवः एवं वै रत्यधिकं सर्वोत्कृष्टं यदंबु तस्य नेत्री तद्वाहिनी । अ-
मर्त्यनद्यां गंगायां ॥ उभयत्र अंतर्बहिश्च सेशान् लोकपालैः सहितान् लोकान् पुनाति मरिष्यमाणः आसन्नमरणो मरणस्यानियतकालत्वात् सर्वोपि अ

अथो विहायेममसुं च लोकं विमर्शितौ हेयतया पुरस्तात् । कृष्णांघ्रिसेवामधिमन्यमान उपाविशत्प्रायममर्त्यनद्यां ॥ ५ ॥ या वै लसच्छ्री-
तुलसीविमिश्रकृष्णांघ्रिरेण्वभ्यधिकांबुनेत्री । पुनाति लोकानुभयत्र सेशान्कस्तां न सेवेत मरिष्यमाणः ॥ ६ ॥ इति व्यवच्छिद्य स पांडवेयः प्रा-
योपवेशं प्रति विष्णुपद्यां । दध्यौ मुकुंदांघ्रिमनन्यभावो मुनिव्रतो मुक्तसमस्तसंगः ॥ ७ ॥ तत्रोपजग्मुर्भुवनं पुनाना महानुभावा मुनयः स-
शिष्याः । प्रायेण तीर्थाभिगमापदेशैः । स्वयं हि तीर्थानि पुनंति संतः ॥ ८ ॥ श्री रामाय नमः ॥ ॥

तथा अतस्तां को न सेवेत ॥ ६ ॥ इति एवं विष्णुपद्यां गंगायां प्रायोपवेशं प्रति व्यवछिद्य निश्चित्य पांडवेय इति तत्कुलोचितं दर्शयति नास्यान्यस्मिन्भा-
वो यस्य सः । मुनतः । मुनिव्रत उपशांतः । नत्यक्तः । मुक्तः समस्तसंगो येन सः ॥ ७ ॥ तत्र तदा तद्दर्शनार्थमेव सशिष्या मुनय उपागताः । ननु तीर्थ-
स्नानार्थं भू ॥ नन्वेतादृशानामपि तीर्थयात्रा दृश्यते । तत्राह । प्रायेणेति । तीर्थयात्राव्याजैस्तीर्थानि पुनंति हि स्वतः तीर्थत्वात् । कथंभूताः । भुवनं पु-
नानाः । पुनः कथंभूताः । महानुभावाः । अयं भावः । तीर्थे सत्संगस्ततो हरिकथाश्रवणादि ततः कृतार्थता ततस्तत्स्मरणाद्यथेकं मोक्षः ।
स्मरणाधीनत्वान्मोक्षस्य तीर्थे सत्संग इति हि तीर्थाधिक्यं ॥ ८ ॥ श्री राम ॥ ॥

स्मा

सा॰प्र॰ अरुणादिकांडे ऋषित्वविशेषेण पृथग्वि॰र्दिष्टाः॥ नानायान्यार्षेयाणि ऋषीणां गोत्राणि तेषु प्रवरान् श्रेष्ठान् शिरसाऽवंस्थ्याववंदे॥२१॥ विज्ञापनः

७८

अत्रिर्वसिष्ठश्च्यवनः शरद्वानरिष्टनेमिर्भृगुरंगिराश्च। पराशरो गाधिसुतोऽथ रामउतथ्य इंद्रप्रमदेध्मवाहौऽगस्त्यमेवातिथिर्दृ
वलश्चार्ष्टिषेणो भारद्वाजो गौतमः पिप्पलादः। मैत्रेयऔर्वः कवषः कुंभयोनिर्द्वैपायनो भगवान्नारदश्च॥२०॥ अन्येपि देवर्षि
ब्रह्मर्षिवर्या राजर्षिवर्या अरुणादयश्च। नानार्षेयप्रवरान्समेतानभ्यर्च्य राजा शिरसाववंदे॥२१॥ सुखोपविष्टेष्वथ तेषु भूयः कृत
प्रणामः स्वचिकीर्षितं यत्। विज्ञापयामास विविक्तचेता उपस्थितोऽग्रेलिगृहीतपाणिः॥२२॥ ॥

७८

र्थं स नः कृतप्रणामः विविक्तं शुद्धं चेतो यस्य अंजली गृहीतौ पाणी येन सः। स्वचिकीर्षितं प्रायोपवेशनादियुक्तं वेति विज्ञापयामास॥२२॥

क्रमपु१

अत्रमोदनेनानुग्रहमालक्ष्यश्लाघते।अहोइति।नृपाणांमध्येमहत्तमैरनुग्रहणीयंशीलंवृत्तंयेषां।एतच्चराज्ञामतिदुर्लभमित्याह।ब्राह्मणानांपादशौचा
त्पादप्रक्षालनोदकात्।दूराडुच्छिष्टविण्मूत्रपादाम्भांसिसमुत्सृजेदितिस्मृतेः।दूरेहितैस्ताद्विसृज्यते।ततोपिदूरादेवविसृष्टंहि।हंतत्रापिस्थानंतुनयो
ग्यमित्यर्थः॥गर्ह्यंकर्मयस्यतत्तात्मानस्तुहिश्लोकं॥१३॥ आसांतावदनुग्रहोब्रह्मशापोऽपिभगवत्प्रसादादेवजातइत्याह।तस्यैवेति।तस्यगर्ह्यकर्मण
एवअतोऽघस्यपापात्मनः॥गृहेष्वासक्तचित्तस्यमेघत्राहयेपरावराणामीशएवद्विजशापतयाबभूव।यत्रयस्मिन्शापेसतिगृहेषुप्र

परीक्षिदुवाच॥ ॥ अहोवयंधन्यतमानृपाणांमहत्तमानुग्रहणीयशीलाः।राज्ञांकुलंब्राह्मणपादशौचाद्दूराद्विसृष्टंबतगर्ह्यक
र्म॥१३॥ तस्यैवमेवस्यपरावरेशोव्यासक्तचित्तस्यगृहेष्वभीक्ष्णं।निर्वेदमूलोद्विजशापरूपोयत्रप्रसक्तोभयमाशुधत्ते॥१४॥तं
मोपयातंप्रतियंतुविप्रागंगाचदेवीधृतचित्तमीशे।द्विजोपसृष्टः॥कुहकस्तक्षकोवादशत्वलंगायतविष्णुगाथाः॥१५॥पुनश्चभू
याद्भगवत्यनंतेरतिः॥प्रसंगश्चतदाश्रयेषु।महत्सुयांयामुपयामिसृष्टिंमैत्र्यस्तुसर्वत्रनमोद्विजेभ्यः॥१६॥ ॥

सक्तोभयंधत्तेनिर्विण्णोभवति।यतोनिर्वेदोवैराग्यंमूलंप्राप्तिकारणंयस्मिन्।अस्यवैराग्यप्राप्युक्तत्वात्तस्यचभयमूलत्वात्तदर्थंद्विजशापंकारित
वानित्यर्थः॥१४॥ तानृप्रार्थयतेतमितिद्वाभ्यां।तंमांमामुपयातंशरणमागतंप्रतियंतुजानंतुदेवीदेवजानुरूपागंगाचप्रत्येतु।वाशब्दः॥प्रतिक्रि
यानादरेविष्णोर्गाथाः॥कथाः॥१५॥ सआश्रयोध्यवसायोयेषांतेषुप्रसंगः॥संगोस्तु।तस्यांतस्यांसृष्टौजन्मनिमहत्सुमैत्रीअस्तुसर्वत्रे
तिजंतुमात्रेमित्रतास्तु।द्विजेभ्योनमोयतएतदुत्पन्नम्॥१६॥ ॥श्रीराम॥ ॥

```
[OrderDescription]
,CREATED=30.05.20 17:19
,TRANSFERRED=2020/06/01 at 12:50:52
,PAGES=110
,TYPE=STD
,NAME=S0003041
,Book Name=M-2951-SHRIMAD BHAGWAT
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
```

```
FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
```

```
FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
```

```
FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
```

```
FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
```

```
FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,
```